[illegible]

[illegible]

नं० ६५८-घ

नं० ६४८-घ

वैशेषिकसूत्रोपस्कारः

पत्राणि ११२

नं ६४८ घ

वैशेषिकसूत्रोपस्कारः

११२ पत्राणि


कर्ता- कणादः- शंकरमिश्रः


नं. ६४८-घ

वैशेषिकसूत्रोपस्कारः

पत्राणि ११२







नं० ६४८ - घ

वैशेषिकसूत्रोपस्कारः
पत्राणि ११२ (संपूर्ण)

वै० सू० टी०
१

श्रीमन्महग्रीवायनमः ॐ ऊर्ध्वबद्धजटाजूटक्रोडक्रीड
त्सुरापगं नमामियामिनीकांतकांतभालस्थलंहरं १ याभ्यांवैशे
षिकेतंत्रेसम्यग्व्युत्पादितोस्म्यहं कणादभवनाथाभ्यांताभ्यांमम
नमःसदा २ सूत्रमात्रावलंबेननिरालंबेपिगच्छतः ममेवल्लवत्ल
माप्यत्रसाहसंसिद्धिमेष्यति ३ तापत्रयपराहताविवेकिनस्ताप
त्रयनिवृत्तिनिदानमनुसंदधानानानाश्रुतिस्मृतीतिहासपुराणे
ष्वात्मतत्त्वसाक्षात्कारमेवतदुपायमाकलय्यांबभूवुस्तत्प्राप्तिहेतुभू
तमपिपंथानजिज्ञासमानाः परमकारुणिकंकणादमुनिमुपसे
दुरथकणादोपिमहर्षिस्तत्त्वज्ञानवैराग्यैश्वर्यसंपन्नः षण्णांपदा
र्थानांधर्म्यवैधर्म्याभ्यां ~~तत्त्वज्ञानमेव~~ तत्त्वज्ञानमेवात्मसाक्षात्कारप्राप
येपरमपंथाइतिमनसिकृत्यतच्चनिवृत्तिलक्षणाद्धर्माद्विनेतेषामम
नायासेनसिध्यतीतिलक्षणतः स्वरूपतश्चधर्ममेवप्रथममुपदि
श्याथनंतरंषडपिपदार्थानुद्देशलक्षणपरीक्षाभिरुपदेक्ष्यामीतिहृदि
निधायतेषामवधानायप्रतिजानीते अथातोधर्मंव्याख्यास्या
मः अथेतिशिष्याकांक्षानंतर्यमाह अतइति यतःश्रव
णादिपटवोऽनन्यकार्याअंतेवासिनउपसेदुरित्यर्थः यद्वा
अथशब्दोमंगलार्थः तदुक्तं ॐकारश्चाथशब्दश्चद्वावेतौब्रह्म
णःपुरा कंठंभित्वाविनिर्यातौतेनमांगलिकावुभाविति युक्तं
चैतत्कथमन्यथाशिष्टाचारपरंपराप्राप्तकर्तव्यताकस्यमं
गलस्यवैशेषिकशास्त्रंप्रणयतोमहामुनेर्मंगलानाचरणंसं
भाव्यते नचकृतमंगलस्यापिफलादर्शनादकृतमंगलस्यापि
फलदर्शनादननुष्ठानं नहिनिष्फलेपिप्रेक्षावान्प्रवर्त्ततइ

तिवाच्यं अकरणस्थले जन्मांतरीयसाकरणस्थले चांगवैकल्य
प्यकल्पनयासफलत्वनिश्चयात् न हि शिष्टाचारानुमितश्रुतिबो
धितकर्त्तव्यताकस्यायाततः फलादर्शनमात्रेणाकारणत्वशंका
पि नचैहिकमात्रफलकत्वान्नजन्मांतरीयकानुमानं पुत्रेष्ट्यादिव
दैहिकमात्रफलत्वानुपपत्तेः कारीर्यादौतु तथाकामनयाऽनुष्ठा
नादैहिकमात्रफलकत्वं अत्रच समाप्तिकामोऽधिकारी स्वर्गका
मइव यागे· तत्रापूर्वद्वारं इहतु विघ्नध्वंस इति विशेषः निर्विघ्न
मारब्धं समाप्यतामिति कामनया प्रवृत्तेः नचविघ्नध्वंसमात्रं
फलं समाप्तिस्तु स्वकारणादेवेति वाच्यं तस्य स्वतोऽपुरुषार्थत्वा
त् समाप्तेस्तु सुखसाधनतया पुरुषार्थत्वात् उपस्थितत्वाच्च किं
च दुरितध्वंसमात्रं न फलं तस्य प्रायश्चित्तकीर्त्तनकर्मनाशादिपा
रगमनादिसाध्यतया व्यभिचारात् प्रारब्धपरिसमाप्तिप्रतिबंधक
दुरितध्वंसत्वेन फलत्वे समाप्तेरेव फलत्वौचित्यात् तत्रापि हिरण्य
दानप्रयागस्नानादिजन्यत्वेन व्यभिचारात् तेषामपि मंगलत्वाभि
धानं साहसं किंच मंगले सति समाप्तेरावश्यकत्वमिति त्वेवमंगल
स्य कारणता तदुक्तं श्रौतात्सांगात्कर्मणः फलावश्यंभावनिय
मादिति अत एव विकल्पितमपि कारणमेव फलानंतर्यनिय
मस्यैव वैदिककारणत्वात् विकल्पे वैजात्यकल्पनं च वैमान्यमेव
यत्रान्वयव्यतिरेकगम्या कारणता तत्र फलपूर्वभावनियमो ग्राह्यो
न तु वेदेपि तत्र व्यतिरेकभासस्य गुरुत्वेनानुपस्थितेः सा च सांगे मंग
ले समाप्तिरावश्यकीति न व्यभिचारः समाप्तिस्तु यस्मिन्ननुष्ठिते
संपूर्णमिदं कर्मेति प्रमा सा च ग्रंथादौ चरमवाक्यलिखनेयागा

वै०सू०वृ० दौचरमाहुतौ पटादावंत्यतंतुसंयोगे ग्रामगमनादौ ग्राम
२ चरणसंयोगे एवंतत्रतत्रोहनीयमिति मंगलजन्यसमाप्तौ
वैजात्यकल्पनेपिनोभयथाव्यभिचारः मंगलंचविघ्नध्वंसद्वा
रकसमाप्तिफलकंकर्मतच्चदेवतानमस्कारादिकैरूपमेव स्व
तः सिद्धविघ्नाभावस्थलेपिसामान्यतोगृहीतस्यविघ्नध्वंसद्वार
कत्वस्यानपायात् नमस्कारादीनांदृष्टेणैवप्रतिपत्तेर्नाव्याप्ति
रितिदिक् अथप्रतिज्ञातमर्थमाह यतोभ्युदयनिःश्रेयससि
द्धिःसधर्मः अभ्युदयस्तत्त्वज्ञानंनिःश्रेयसमात्यंतिकीदुःखनि
वृत्तिस्तदुभयंयतःसधर्मः अभ्युदयद्वारकंनिःश्रेयसमिति
मध्यमपदलोपीसमासःपंचमीतत्पुरुषोवासचधर्मोनिवृत्तिल
क्षणोवक्ष्यतेयदिष्टुनिदिध्यासनादियोगसाध्योधर्मोदृष्टमे
वतदाविधिरूपः वृत्तिकृतस्तु अभ्युदयःसुखंनिःश्रेयसमेक
कालीनसकलात्मविशेषगुणध्वंसःप्रमाणंचधर्मेवेदस्तच्छरी
रादिकंभोक्तृविशेषगुणप्रेरितभूतपूर्वकं कार्यत्वेसतितद्भोगसा
धनत्वात्तन्निर्मितस्रगादिवदित्याहुः तदेतद्व्याख्यानंप्रत्येकसमुदाया
भ्यामव्यापकत्वादर्वाचीनैरुपेक्षितंवस्तुतस्तुकोधर्मः किंलक्ष
णश्चेतिसामान्यतःशिष्यजिज्ञासायांयतोऽभ्युदयनिःश्रेय
ससिद्धिरित्युपतिष्ठतेतथाचयतोऽभ्युदयसिद्धिर्यतश्चनिःश्रे
यससिद्धिस्तदुभयंधर्मः एवंचपुरुषार्थसाधारणकारणं
धर्मइतिवक्ष्यतेपुरुषार्थयोः सुखदुःखाभावयोर्विशेषतः
परिचयार्थमभ्युदयनिःश्रेयससिद्धिरित्युक्तं स्वर्गापवर्गयो
रेवान्येच्छानधीनेच्छाविषयत्वेनपरमपुरुषार्थत्वात् साधयि

ष्यतेचदुःखाभावस्यापिपुरुषार्थत्वं· ननुनिवृत्तिलक्षणोधर्म
निःश्रेयस २. स्तत्त्वज्ञानद्वाराहेतुरित्यत्रश्रुति प्रमाणं· श्रुतेरेवप्रामाण्य
वयंविप्रतिपद्यामहे अनृतव्याघातपुनरुक्तदोषेभ्यः पुत्रेष्टौ
कृतायामपिपुत्रानुत्पादादनृतत्वं उदितेजुहोत्यनुदितेजुहो
तिसमयाध्युषितेजुहोतीतिविधेः प्राप्तएवोदितादिकालेहो।
श्यावो मोव्याहन्यते स्याहुतिमभ्यवहरतियउदितेजुहोतिशबलो
स्याहुतिमभ्यवहरतियोऽनुदितेजुहोति श्यावशबलौवा।
स्यावस्याहुतिमभ्यवहरतोयः समयाध्युषितेजुहोतीत्यादिना
तथात्रिः प्रथमामन्वाहत्रिरुत्तमामन्वाहेत्यनेनप्रथमोत्तमसा
मिधेन्योस्त्रिरुच्चारणाभिधानात्पौनरुक्त्यमेवनचाम्नायप्रामा
ण्यप्रतिपादकंकिंचिदस्ति नित्यत्वेविप्रतिपत्तौनित्यनिर्दोष
त्वमपिसंदिग्धंपौरुषेयत्वेतुभ्रमप्रमादविप्रलिप्साकरणापा
टवबहुचसंभावनया आप्तोक्तमपिसंदिग्धमेवेतिन निःश्रेयसं
नवातत्त्वज्ञानंनवाधर्मइतिसर्वमेतदाकुलमतआह तद्वच
नादाम्नायप्रामाण्यं तदित्यनुपक्रान्तमपिप्रसिद्धिसिद्धतये
श्वरंपरामृशति यथातदप्रामाण्यमनृतव्याघातपुनरुक्त
दोषेभ्यइतिगौतमीयसूत्रेतच्छब्देनानुपक्रान्तोऽपिवेदः प
रामृश्यतेतथाचतद्वचनात्तेनेश्वरेणप्रणयनादाम्नायस्यवेदस्य
प्रामाण्यं यद्वातदितिसन्निहितंधर्ममेवपरामृशतितथाध
र्मस्यवचनात्प्रतिपादनादाम्नायस्यवेदस्यप्रामाण्यं यद्धिका
कंप्रामाणिकमर्थंप्रतिपादयतितत्प्रमाणमेवयतइत्यर्थः
ईश्वरश्चतदास्तत्वंचसाधयिष्यतेयच्चोक्तमनृतव्याघातपुनरुक्त

दोषेभ्य इतितत्र। श्रुतत्वे जन्मांतरीयफलकल्पनं कर्मकर्तृसा
धनवैगुण्यात्कल्पनं वा श्रौतानां गाकर्मणः फलावश्यंभा
वनिश्चयात् नचकारीरिवदैहिकमात्रफलकत्वं तत्र हि शु
ष्कसस्यस्य जीवनकामस्याधिकारः पुत्रेष्टौ तु पुत्रकामस्ये
ति विशेषात् नच व्याघातोपि उदितादिहोमविशेषतः
प्रतिज्ञाय तदन्यकाले होमानुष्ठाने श्यावोस्याहुतिमभ्यवभ्यव
हरतीत्यादिनिंदाप्रतिपादनात् नच पुनरुक्ततादोषोपि एका
दशसामिधेनीनां प्रकृतौ याज्यानूपंचदशारेण वाग्वज्रे।
यावबाधे भ्रातृव्यमित्यत्र सामिधेनीनामेकादशानां पंचद
शत्वमस्य प्रथमोत्तमसामिधेन्योस्त्रिरभिधानमंतरेणानुपपत्तेस्त
थाभिधानात् शिष्याकांक्षानुरोधेन स्वरूपतो लक्षणत
श्च धर्मव्याख्यायाभिधेयसंबंधप्रतिपादनाय सूत्रं धर्मवि
शेषप्रसूताद्द्रव्यगुणकर्मसामान्यविशेषसमवायानां साध
र्म्यवैधर्म्याभ्यां तत्वज्ञानान्निःश्रेयसं एतादृशं तत्वज्ञानं वै
शेषिकशास्त्राधीनमिति तस्यापि निःश्रेयसहेतुत्वं दंडाद्य
पितं तत्वं ज्ञायतेऽनेनेति व्युत्पत्त्या शास्त्रपरत्वे धर्मविशेषप्र
सूतादित्यनेनानन्वयापत्तेः सर्वपदार्थप्रधानो द्वंद्वश्चात्र
समासः सर्वपदार्थतत्वज्ञानस्य निःश्रेयसहेतुत्वात् तत्र शा
स्त्रनिःश्रेयसयोर्हेतुहेतुमद्भावः शास्त्रतत्वज्ञानयोर्व्यापा
रव्यापारिभावः निःश्रेयसतत्वज्ञानयोः कार्यकारणभावः
द्रव्यादिपदार्थशास्त्रयोः प्रतिपाद्यप्रतिपादकभावः संबं
धोवगम्यते एतेषां च संबंधानां ज्ञानान्निःश्रेयसार्थिनामि

हर्शास्त्रेप्रवृत्तिः मोक्षमाणाश्चमुनेर्गृहीतास्वभावा एवशास्त्रेप्र
वर्तंते निःश्रेयसमात्यंतिकीदुःखनिवृत्तिश्चात्यंतिकत्वंसमाना
धि षिकरणदुःखप्रागभावासमानकालीनत्वं युगपदुत्पन्नसमानाधि
करणसर्वात्मविशेषगुणध्वंससमानकालीनत्वंवा अशेषवि
शेषगुणध्वंसावधिकदुःखप्रागभावो वा मुक्तिः नचासाध्यत्वा
न्नायंपुरुषार्थः कारणविघटनमुखेनप्रागभावस्यापिसाध्यत्वा
त् नचतस्यप्रागभावत्वक्षतिः प्रतियोगिजनकाभावत्वेनप्राग
भावत्वात् जनकत्वंचस्वरूपयोग्यतामात्रं नहि प्रागभावश्चरम
सामग्रीयेनतस्मिन्सति कार्यमवश्यंभवेत् तथासतिकार्यस्या
प्यनादित्वप्रसंगात् तथाचयथासहकारिविरहादियंतंका
लंनाजीजनत्तथाग्रेपितद्विरहान्नजनयिष्यति हेतूच्छेदेपु
रुषव्यापारादिस्तस्यापि प्रागभावपरिपालनएवतात्पर्यात् अ
तएवगौतमीयेद्वितीयसूत्रेदुःखजन्मप्रवृत्तिदोषमिथ्याज्ञाना
नामुत्तरोत्तरापायेतदनंतरापायादपवर्गइत्यत्र कारणाभि
वात्कार्याभावाभिधानंदुःखप्रागभावरूपामेवमुक्तिंद्रढय
तिनहिदोषापायेप्रवृत्त्यपायः प्रवृत्त्यपायेजन्मापायोजन्मा
पायेदुःखापायइत्यपायोध्वंसःकिंत्वनुत्पत्तिः साचप्रागभाव
एवनचप्रतियोग्यप्रसिद्धिःसामान्यतोदुःखत्वेनैवप्रतियोगि
प्रसिद्धेः प्रायश्चित्तवत् तत्रापिहिप्रत्यवायध्वंसद्वारादुः
खानुत्पत्तेरेवापेक्षितत्वात् लोकेप्यहिकंटकादिनिवृत्तेर्दु
खानुत्पत्तिफलकत्वदर्शनात् दुःखसाधननिवृत्त्यर्थमेवप्रे
क्षावतांप्रवृत्तिः किंचितु दुःखात्यंताभावएवमुक्तिःसच

यद्यपि नात्मनिष्ठस्तथापि लोष्टादिनिष्ठ एवात्मनि साध्यते सि-
द्धिश्च तस्य दुःखप्रागभावासहवृत्तिदुःखध्वंस एव तस्य तत्संबं-
धितयोपगमात् तस्मिन्सति तत्र दुःखात्यंताभावप्रतीतेः ए-
वं च सति दुःखेनात्यंतविमुक्तश्चरतीत्यादिश्रुतिरप्युपपादि-
ता भवतीत्याहुः तन्न दुःखात्यंताभावस्यासाध्यत्वेनापुरुषार्थ-
त्वात् दुःखध्वंसस्य च न तत्सम्बन्धित्वं परिभाषापत्तेः दुःखे-
नात्यंतविमुक्तश्चरतीति श्रुतेः दुःखप्रागभावस्यैव कारणवि-
घटनसुखेनात्यंताभावसमानरूपत्वेन तात्पर्यात् नन्वयं न पुरु-
षार्थः निरुपधीच्छाविषयत्वाभावात् दुःखकाले सुखं तावन्नो-
त्पद्यत इति सुखार्थिनामेव दुःखात्यंताभावार्थे प्रवृत्तेरिति चेत्
न वैपरीत्यस्यापि सुवचत्वात् सुखेच्छापि दुःखाभावोपाधिकी-
त्येव किं न स्यात् शोकाकुलानां सुखविमुखानामपि दुःखाभा-
वमात्रमभिसंधाय विशोद्बंधनादौ प्रवृत्तिदर्शनात् ननु पुरुषा-
र्थोऽप्ययं ज्ञायमान एव मुक्तेस्तु दुःखाभावस्य ज्ञायमानतैव ना-
स्ति अन्यथा मुग्धबोधवस्त्वार्थमपि प्रवर्तेतेति चेत् न श्रुत्यनु-
मानाभ्यां ज्ञायमानस्यावेद्यत्वानुपपत्तेः अस्ति हि श्रुतिर्दुःखेना-
त्यंतविमुक्तश्चरति तमेव विदित्वाऽतिमृत्युमेतीत्यादिका अ-
नुमानमप्यस्ति दुःखसंततिरत्यंतमुच्छिद्यते संततित्वात्प्रदी-
पसंततिवदित्यादि चरमदुःखध्वंसस्य दुःखसाक्षात्कारेण क्ष-
णमात्रं विषयीकरणात् अत्यक्षवेद्यतापि योगिनां योगजधर्म-
बलेनागामिनोऽपि दुःखध्वंसस्य प्रत्यक्षतोपगमाच्च तथापि तु-
ल्यायव्ययतया नायं पुरुषार्थः दुःखवत्सुखस्यापि हानेः हृ।

योरपिसमानसामग्रीकत्वादितिचेन् न वीतरागाणांदुःखदु
र्दिनभीरूणांसुखखद्योतिकामात्रेऽलंप्रत्ययवतांतत्रप्रवृत्तेः ननु
तथापिदुःखनिवृत्तिर्नपुरुषार्थः अनागतदुःखनिवृत्तेरसंभ
वात् अतीतदुःखस्यातीतत्वात् वर्त्तमानस्यपुरुषप्रयत्नमंत
रेणैवनिवृत्तेरितिचेन् न हेतूच्छेदेपुरुषव्यापारान्प्रायश्चित्तव
त् तथाहिसवासनंमिथ्याज्ञानंसंसारहेतुस्तदुच्छेदश्चात्मतत्त्वज्ञा
नात् तत्त्वज्ञानंचयोगविधिसाध्यमितितदर्थेप्रवृत्त्युपपत्तेः न
नुनित्यसुखाभिव्यक्तिरेवमुक्तिर्नतुदुःखाभावइतिचेन् न
नित्यसुखेप्रमाणाभावात् भावेवानित्यतदभिव्यक्तेर्मुक्तसंसा
रिणोरविशेषापातात् अभिव्यक्तेरुत्पाद्यत्वेनतन्निवृत्तौपुनः
संसारापत्तेः ब्रह्मात्मनिजीवात्मलयोमुक्तिरितिचेन् न लयोप
घेकीभावस्तदावाधात् नहिद्वयमेकंभवति लिंगशरीरापगमो
लयोलिंगंचैकादशेंद्रियाणितेषांशरीरस्यचविगमोलयइति
चेन् न एतावतादुःखसामग्रीविरहस्योक्तत्वात्दुःखाभा
वएवमुक्तिरितिपर्यवसानात् एतेनाविद्यानिवृत्तौकेवलात्म
स्थितिर्मुक्तिरात्माचविज्ञानसुखात्मकइत्येकदंडिमतमपा
स्तं आत्मनोज्ञानत्वेसुखत्वेवप्रमाणाभावात् नचनित्यंवि
ज्ञानमानंदंब्रह्मेतिश्रुतिर्मानं तस्याज्ञानवदानंदवत्प्रतिपा
दकत्वात् भवतिहिअहंजाने अहंसुखीतिप्रतीतिर्नत्वहंज्ञान
महंसुखमिति किंचब्रह्मणइदानीमपिसत्वात्मुक्तसंसारि
णोरविशेषापत्तिः अविद्यानिवृत्तेश्चापुरुषार्थत्वात् ब्रह्म
णोनित्यत्वेनासाध्यत्वात् तत्साक्षात्कारस्यतदात्मकत्वेनासा

ध्यत्वादेवमानंदस्यापि तदात्मकत्वेनासाध्यत्वमेवेति तदर्थं वृत्त्य
नुपपत्तिरेव नच निरुपप्लवचित्तसंततिर्मुक्तिः दुःखादिलक्ष
णस्योपप्लवस्य विगमो यदि निरुपप्लवत्वं तदा तन्मात्रस्यैव पुरु
षार्थत्वे चित्तसंततेरनुवृत्तौ प्रमाणाभावः तदनुवृत्तेरपि शरी
रादिसाध्यत्वेन संसारानुवृत्तेरावश्यकत्वादिति सिद्धं दुःखनि
वृत्तिरेवोक्तरूपा निःश्रेयसमिति तत्त्वस्य ज्ञानमिति कर्मणि
षष्ठी साधर्म्यवैधर्म्याभ्यामिति प्रकारे तृतीया तत्र साधर्म्य
मनुगतो धर्मो वैधर्म्यं च व्यावृत्तो धर्मः यद्यपि कचित्साधर्म्यम
पि कुतश्चिद्वैधर्म्यं वैधर्म्यमपि केषांचित्साधर्म्यं तथापि तादृप्ये
ण ज्ञाने विवक्षितं तत्र च द्रव्यादिपदार्थानामुद्देश एव विभाग
पर्यवसन्नः स च न्यूनाधिकसंख्याव्यवच्छेदफलकस्तेन षडे
व पदार्था इति नियमः पर्यवस्यतीति स वानुपपन्नः व्यवच्छेद्यप
दार्थान्तरस्याप्रतीतौ नियमानुपपत्तिः प्रतीतौ च व्यवच्छेदानुप
पत्तिः ननु नायमन्ययोगव्यवच्छेदः किं त्वयोगव्यवच्छेदः प
दार्थेषु षड्लक्षणायोगो व्यवच्छिद्यत इति चेन्न पदार्थ
पदेन प्रसिद्धपदार्थमात्रोपसंग्रहे सिद्धसाधनात् अन्यस्य
चाप्रतीतेरेव किं च लक्षणानां मिलितो योगो व्यवच्छेद्यः प्र
त्येकं वा आद्ये मिलितयोगः सर्वत्रेति व्यवच्छेदानुपपत्तिः
अंत्येपि प्रत्येकायोगः परस्परं सर्वत्रेति व्यवच्छेदानुपपत्तिरेवेति चे
न्न शक्तिसंख्यासादृश्यादिषु पदार्थेषु पराभिमतेषु षड्ल
क्षणायोगः यैः कैश्चित्तेन तद्व्यवच्छेदो नियमार्थः तथा च षडे
व पदार्था इत्यस्य प्रतीयमानेषु पदार्थेषु षण्णां लक्षणानां म

ध्येऽन्यतरलक्षणयोगो अस्त्येव नत्वयोग इत्यर्थः तत्रविशे
ष्यसंगतस्यान्ययोगव्यवच्छेदो विशेषणासंगतस्यायोगव्यवच्छे
दः क्रियासंगतस्यचात्यंतायोगव्यवच्छेदः धा... प्रतीयते त
त्रशक्तित्रयमेवकारस्येत्येके व्यवच्छेदमात्रे शक्तिरयोगान्य
योगात्यन्तव्यवच्छेदाः समभिव्याहारबललभ्या इत्यपरे धर्म
विशेषप्रसूनादिति तत्वज्ञानादित्यस्य विशेषणं तत्र धर्मवि
शेषो निवृत्तिलक्षणो धर्मः यदि तु तत्वज्ञायतेऽनेनेति तत्वज्ञा
नं शास्त्रमुच्यते तदा धर्मविशेष ईश्वरनियोगप्रसादरूपो वक्त
व्यः श्रूयते हीश्वरनियोगप्रसादावधिगम्य कणादो महर्षि
ः शास्त्रं प्रणीतवानिति तत्वज्ञानं चात्मसाक्षात्कार इह विवक्षित
स्तस्यैव सवासनमिथ्याज्ञानोन्मूलनक्षमत्वात् तमेव विदित्वा
ऽतिमृत्युमेति नान्यः पंथा विद्यतेऽयनायेत्यत्र हि ब्रह्मणी वेदि
तव्ये इत्यत्र च वेदपदस्य साक्षात्कारपरत्वात् पश्यन्यचक्षुरि
त्यत्रापि तथा स च शास्त्रान्मनननिदिध्यासनादिपरं परयेति
तत्वज्ञानादिति हेतुपंचम्या तथैवाभिधानात् इदानीमपव
र्गसाधनतया सर्वपदार्थाश्रयतया च प्रथमोद्दिष्टस्य द्रव्यपदा
र्थस्य विभागं विशेषोद्देशं च कुर्वन्नाह पृथिव्यापस्तेजो वायु
राकाशं कालो दिगात्मा मन इति द्रव्याणि इति कारोऽवधारणा
र्थः तेन नवैव द्रव्याणि नाधिकानि न न्यूनानि वेत्यर्थः न
नु विभागबलादेव न्यूनाधिकसंख्याव्यवच्छेदसिद्धौ किमि
तिकारेणेति चेत् न उद्देशमात्रपरतयापि सूत्रसंभवे वि
भागतात्पर्यस्फोरणार्थमेवेतिकरणात् सुवर्णादीनामी॥

वै० सू० वृ०
६
6

श्वरस्य चानैकांतभावात् अंधकारस्य चाधिकत्वेन दृश्यमानस्या
भावत्वमुत्पादनादेतदध्यवसेयं असमासकरणं तु सर्वेषां
प्राधान्यप्रदर्शनाय लक्षणमेतेषां स्वधर्म्यावसरे सूत्रकृदे
व दर्शयिष्यति ननु विभागवाक्यादेवन्यूनाधिकसंख्याव्यवच्छे
दसिद्धेः किमिति कारणेनेतिचेत् न उद्देशमात्रपरतयापि सूत्र
संभवे विभागतात्पर्यस्फोरणार्थमेवेति कारणात् सुवर्णादी
नामीश्वरस्य चानैकांतभावात् अंधकारस्य चाधिकत्वेन दृश्य
मानस्याभावत्वमुत्पादनादेतदध्यवसेयं असमासकरणं तु
करणं तु सर्वेषां प्राधान्यप्रदर्शनाय लक्षणमेतेषां स्वधर्म्याव
सरे सूत्रकृदेव दर्शयिष्यति ननु सुवर्णं न तावत्पृथिवी निर्गंध
त्वात् न जलं स्नेहसांसिद्धिकद्रवत्वशून्यत्वात् न तेजो गुरुत्व
वत्वात् अत एव न वायुर्न वा आकाशादि ततो नवभ्योऽभिन्नत्व
तिचेत् न आद्ययोरनाभासत्वेऽपि तृतीयस्य स्वरूपासिद्धत्वात्
ततः परं सिद्धसाधनं हेतोः स्वरूपासिद्धिश्च साधयिष्य
याते च सुवर्णस्य तेजसत्वमिति गुणत्वेन रूपेण गुणानां सर्व
द्रव्याश्रितत्वं द्रव्यलिंगत्वं द्रव्याभिव्यंग्यत्वं द्रव्याभिव्यंजकत्वं च
ति द्रव्यानंतरं गुणानामुद्देशं विभागं चाह रूपरसगंधस्पर्शाः
संख्याः परिमाणानि पृथक्त्वं संयोगविभागौ परत्वापरत्वे बुद्धयः
सुखदुःखे इच्छाद्वेषौ प्रयत्नाश्च गुणाः चकारेण गुरुत्वद्रव
त्वस्नेहसंस्कारधर्माधर्मशब्दान् समुच्चिनोति ते हि प्रसिद्ध
गुणभावा एवेति कंठतो नोक्ताः गुणत्वं चामीषां यथास्थानं ल
क्षणतः स्वरूपतश्च वक्ष्यति रूपरसगंधस्पर्शानां समानका

रूपरसगंधस्पर्शैः सामानाधिकरण्यं नास्तीति सूचनार्थं समासः
संख्यापरिमाणयोस्तु समानकालीन

ञीनै संख्यापरिमाणसाणसामानाधिकरण्यसूचनार्थं समा
सो बहुवचननिर्देशः यद्यप्येकत्वसमानाधिकरणं नैकत्वान्तरं न
च महत्त्वदीर्घत्वसमानाधिकरणं महत्त्वदीर्घत्वान्तरं तथापि
द्वित्वादीनामन्योन्यसामानाधिकरण्यं महत्त्वदीर्घत्वादीनां च।
विजातीयपरिमाणयोः सामानाधिकरण्यमस्त्येव रूपत्वं च
यद्यपि द्विपृथक्त्वादिसमानाधिकरणं तेन संख्या बहुत्वेनैव नि
र्देष्टुमर्हतीति तथाप्यवधिव्यंग्यत्वलक्षणं संख्यातो वैधर्म्यं सूच
यितुमेकवचननिर्देशः संयोगविभागयोर्द्वयोरप्येकैकक
र्मजन्यत्वसूचनाय द्विवचनं परत्वापरत्वयोरन्योन्याश्रय
निरूप्यतया दिक्काललिंगत्वाविशेषसूचनाय द्विवचनं बुद्धी
नां द्विधादिभेदेन सू बहुत्वसूचनाय संख्याभिमतैकमात्रबु
द्धिनिराकरणसूचनाय बहुवचनं सुखदुःखयोर्द्वयोरपि भो
गतावच्छेदेनैककार्यजनकत्वमविशेषेण चादृष्टान्नायकत्वं सुख
स्यापि दुःखत्वेन भावनं च ख्यापयितुं द्विवचनं इच्छाद्वेषयोर्द्वयो
रपि प्रवृत्तिप्रतिकारणत्वसूचनाय द्विवचनं प्रयत्नानां विहित
षिद्धगोचराणां दशविधानां पुण्यहेतुत्वं दशविधानां च पाप
हेतुत्वमभिसंधाय बहुवचनमित्युन्नेयं यद्वा रूपरसगंधस्प
र्शानां भौतिकेंद्रियव्यवस्थाहेतुत्वज्ञापनार्थं पाकजप्रक्रिया
व्यवस्थापनार्थं वा समस्योक्ता ४ संख्यायां द्वित्वबहुत्वादौ विप्र
तिपत्तिरिति तन्निराकरणसूचनार्थं बहुत्वेनाभिधानं पृथक्त्वे
तु संख्याबुद्धत्वेनैवास्यापि बहुत्वं चेति सूचनार्थमवधित्वानव
जनीयत्वं संख्यातो वैधर्म्यमिति सूचनाय पृथगभिधानं

वै० सू० वृ०
७
7

परिमाणेनुदीर्घत्वह्रस्वत्वादिविप्रतिपत्तिनिरासायबहुवचनं
संयोगविभागयोरन्योन्यविरोधज्ञापनायद्विवचनं परत्वाप
रत्वयोर्दैशिककालभेदेनभिन्नजातीयत्वसंभवेनचतुष्ट्वाप
त्तौगुणविभागोन्यूनः स्यादितितत्रद्विवचमिन्याधुन्नेयं॥ तेषां
चलक्षणमग्रेवक्ष्यते कर्मणांद्रव्यजन्यतयागुणजन्यतया
गुणजन्यतयाचरूपेद्रव्यसमवायात्प्रत्यक्षतेतिद्रव्यगुणा
भिधानांतरंकर्मोद्देशविभागावाह उत्क्षेपणमपक्षेपण
माकुंचनंप्रसारणंगमनमितिकर्माणि इतिरवधारणा
र्थः भ्रमणादेरपिगमनादव्यतिरेकात् अत्रचोत्क्षेपणत्वा
वक्षेपणत्वाकुंचनत्वप्रसरणत्वगमनत्वानिकर्मत्वसाक्षाद्व्या
प्याः पंचजातयः नन्वेतदनुपपन्नं गमनस्यकर्मपर्यायत्वा
त् सर्वत्रगत्वतीतिबुद्धेर्दृष्टत्वात् उत्क्षेपणत्वादीनांचतसृ
णीजातीनांपरस्परात्यंताभावसमानाधिकरण्यानांसामानी
धिकरण्यानुभवाच्चतस्माएवकर्म पर्यायत्वात् सर्वत्रगत्वमीति
[redacted] पृथगभिधानंतुभ्रमणरेचनस्यंदनोर्ध्वज्वलननमनो
न्नमनादीनांभिन्नभिन्नवुद्धिव्यपदेशभाजामेकेनशब्देन
संग्रहणार्थं यद्वा गमनत्वमपिकर्मत्वव्याप्यापंचमीजा
तिरेव तेनभ्रमणरेचनादिष्वेवगमनप्रयोगोमुख्यः उत्क्षे
पणापक्षेपणादिषुयदिगमनप्रयोगस्तदाभाक्तः भक्तिः स्वा
श्रयसंयोगविभागासमवायिकारणत्वमेवगौणमुख्यसाधा
रणोधर्मः गमनत्वजातेस्तुनियतदिग्देशसंयोगविभागका
रणत्वमेवव्यंजकं तच्चभ्रमणादिषुसर्वत्रैतिगमनग्रहणेनैव

त्वव्याप्याजातयः। रतीचेत्तत्त्वं कर्म पर्यायएवगमनं

तेषांग्रहणमिति निष्क्रमणाद्यप्रवेशनत्वादिकांतुनजातिः ए
कस्मिन्नेवकर्म्मणियत्रापवरकांतरादपवरकांतरंगच्छतिपुरु
षेकस्यचिन्नद्रष्टुःप्रविशतीतिप्रत्ययः कस्यचित्तुनिष्क्रामतीति जलभ्रमणत्वा
तत्रजातिसंकरःस्यात् तथाचभ्रमणादेरेकस्यानिलयनाद्या
निष्क्रम्यापरीप्रविशतोनिष्क्रामतिप्रविशतीतिप्रत्ययद्वयदर्श
नादुपाधिसामान्यमेवैतदध्यवसेयं उत्क्षेपणादौतुमुसल
सव्यमुत्क्षिपाम्यवक्षिपामीतीच्छाजनितेनप्रयत्नेनप्रयत्नवदा
त्मसंयोगादसमवायिकारणाद्धस्तेतावदुत्क्षेपणं ततउत्क्षेपण
विशिष्टहस्तनोदनादसमवायिकारणान्मुसलेप्युत्क्षेपणाख्यक
र्मोत्तरऊर्ध्वमुत्क्षिप्तयोर्हस्तमुसलयोरवक्षेपणेच्छाजनितप्र
यत्नवदात्मसंयोगाद्धस्तनोदनाद्वयुगपदेवहस्तेमुसलेचाव
क्षेपणमुलूखलयातानुकूल्यं संजायतेततोदृढतरद्रव्यसं
योगाघातात्कस्मान्मुसलस्योर्ध्वगमनंभवति तत्रनेच्छानवा
यत्नःकारणंकिंतुसंस्कारादेवमात्रादेवमुसलस्योत्पतनं तत्र
गमनमात्रंनतूत्क्षेपणंभाक्तस्तत्रोत्क्षेपणव्यवहारः एवमनुलो
मप्रतिमलोमवायुद्रव्यसंघट्टवशाद्वाद्योत्क्षेप्रेरितत्तृणतूलका
दावुत्क्षेपणव्यवहारोभाक्तः एवंस्रोतोद्रव्यसंघट्टवशाज्जलोर्ध्व
गमनेपि एवमुत्क्षेपणावक्षेपणव्यवहारः शरीरतदवयवत
संयुक्तमुसलतोमरादिष्वेवमुख्यो भवतिहिहस्तमुत्क्षिपतिमुस
लमुत्क्षिपतितोमरमुत्क्षिपत्येवमवक्षिपतीत्यपि आकुंचनं
तुचैवतिपत्रंसंकुचतिवस्त्रंसंकुचतिचर्मेत्याति प्रत्ययः एवम
वयवानांपूर्वोत्पन्नानारंभकसंयोगविनाशकविभागजन
तत्स्थेवाव यवानामारंभकसंयोगेषु परस्परमवयवाना
मनारंभकसंयोगोत्पादकं वस्त्राद्यवयवेकर्मकुञ्चितेत्पादकं
कर्मयत्तामयवान्सर्वं तथैवस्तु =२

वै० सू० वृ०
८
8

कंकर्मप्रसरणंयतोभवतिप्रसरतिवस्त्रंप्रसरतिचर्मविकसति
पद्मभित्यादिप्रत्ययः एतच्चतुष्टयभिन्नंयत्कर्मजातंतत्सर्वं
गमनविशेषः तत्रभ्रमणंप्रयत्नवदात्मसंयोगाद्धस्तेकर्मकर्म
वताचहस्तेननोदनाख्यसंयोगादेवघट्टनातश्चक्रादौतिर्यक्
संयोगानुकूलंकर्म एवंभ्रमरयन्त्रादीनामपिगुरुत्वप्रति
बंधकप्रयत्नवदात्मसंयोगकारणंकर्मभ्रमणं एवंरेचनाद्यपिव्या
ख्येयं स्फुटीकरिष्यतेचाग्रे तदेतेषांकर्मणांविहिततयाग
स्नानदानादिषुधर्मानुकूलप्रयत्नवदात्मसंयोगजन्यत्वं निषिद्ध
देशगमनहिंसाकलंजभक्षणादिष्वधर्मानुकूलप्रयत्नवदात्मसं
योगजन्यत्वमध्यवसेयमिति द्रव्यादीनामुद्देशप्रकरणानं
तरंत्रयाणांसाधर्म्यप्रकरणमारभ्यते तत्रद्रव्यादीनांत्रयाणां
साधर्म्यस्यतत्त्वज्ञानानुकूलतयाप्रथमंशिष्याकांक्षितत्वा
त्सामान्यादिपदार्थत्रयस्योद्देशात्प्रागेवत्रयाणांसाधर्म्यमा
ह सदनित्यंद्रव्यवत्कार्यंकारणंसामान्यविशेषवदितिद्रव्य
गुणकर्मणामविशेषः विशेषेसत्यप्यविशेषशब्दःसाध
र्म्यमात्रपरः सदितिसदाकारप्रत्ययव्यपदेशविषयत्वंत्रया
णामेव सत्तायोगित्वात् अनित्यमिति ध्वंसप्रतियोगितय
द्यपिनपरमाण्वाकाशादिसाधारणंतथापिध्वंसप्रतियोगिवृ
त्तिपदार्थविभाजकोपाधिमत्त्वंविवक्षितंद्रव्यवदिति द्रव्यं
समवायिकारणतयाऽस्यास्तीतिद्रव्यवत् एतदपिपरमा
ण्वादौनास्तीतिद्रव्यसमवायिकारणकवृत्तिपदार्थविभाज
कोपाधिमत्त्वंविवक्षितं कार्यमिति प्रागभावप्रतियोगिवृत्ति

पदार्थविभाजकोपाधिमत्त्वं विवक्षितं कारणमिति ज्ञानेतरका
र्यनियतपूर्ववृत्तिजातीयवृत्तिपदार्थविभाजकोपाधिमत्त्वं तेन ख
साक्षात्कारविषयत्वेन कारणेगोत्वादौ नातिप्रसक्तिर्नवा पारिमां
डल्यादावजनकेऽव्याप्तिः सामान्यविशेषवदिति सामान्यं स
द्विशेषोऽन्यान्यव्यावर्तकतया द्रव्यत्वगुणत्वकर्मत्वादिस्तद्वत्त्वमि
त्यर्थः ननु गौरश्वादेः पदानस्पष्टमेतिधर्मो धर्मजनकत्वजा
तेरपीति कारणत्वमतिव्यापीतिचेत् न अवच्छेदकतामात्रेण
जातेर्विनियोगात् उपलक्षणं चैतत् स्वसमवायार्थशब्दाभि
धेयत्वमपि त्रयाणीसाधर्म्यं द्रष्टव्यं यदितु कार्यत्वानित्यत्वेका
रणवत्तामें कारणत्वं चान्यत्र पारिमांडल्यादिभ्य इति प्रशस्तदेवा
चार्यव्यवच्छिन्नं साधर्म्यमुच्यते तदा पदार्थविभाजकोपाधिम
त्त्वतया न विरोधः सूत्रोक्तरीत्या त्रयाणां गुणजनकत्वं गुणजन्य
त्वं चान्यत्र नित्य द्रव्येभ्य इति इदानीं द्रव्यगुणयोरेव साधर्म्यमा
ह द्रव्यगुणयोः सजातीयारंभकत्वं साधर्म्यं एतदेव सूत्रां
तरेण स्पष्टयति द्रव्याणि द्रव्यांतरमारभंते गुणाश्च गुणां
तरं १० अंत्यावयविविभुद्रव्याणि तथाऽन्त्यावयविगुणान्द्वित्व
द्विपृथक्त्वानी परत्वापरत्वादीन् गुणांश्च विहाय सजातीयारं
भकत्वं साधर्म्यं द्रष्टव्यं सजातीयारंभकवृत्तिपदार्थविभाजको
पाधिमत्त्वं वा विवक्षितं तेन नाजनकव्यक्तीनामसंग्रहः न
नु कर्माणि कुतो न कर्मांतरमारभंते इत्यत आह कर्म कर्मसा
ध्यं न विद्यते ११ विद्रियं ज्ञानार्थो न तु सत्ताभिधायी सजाती
यारंभद्रव्यगुणयोरिव कर्म साध्यं कर्मणि प्रमाणं नास्ती त्यर्थः

इदमत्राकूतं कर्म्मयदिकर्मजनयेत्स्वोत्पत्त्यनंतरमेवजनयेत्तश
ब्दवत् तथाचपूर्वकर्मणैवयावत्संयोगिद्रव्येभ्योविभागेजनि
तेद्वितीयंकर्मकेनसहविभागंजनयेत् विभागस्यसंयोगपूर्वक
त्वात् संयोगांतरस्यचतत्राधिकरणेऽनुत्पन्नत्वात् विभागाजन
नेतुकर्मलक्षणक्षतेः नचक्षणांतरेकर्म्मांतरंजनयिष्यतीतिवा
च्यं समर्थस्यक्षेपायोगादपेक्षणीयांतराभावात् पूर्वसंयो
गनाशेऽपिजननेविभागजनकत्वानुपपत्तिरेव उत्तरसं
योगोत्पत्तिकालेऽपिजननेतथैव उत्तरसंयोगोत्पत्तिकालस्य
कर्मनाशकालएव तथाचसुष्ठूक्तं कर्मकर्मसाध्यंनविद्यत
इति गुणकर्मभ्यांद्रव्यस्यवैधर्म्यमाह [illegible]व्यंकार्यकार
णंचवधति [illegible]द्रव्यंनस्वकार्यंहंतिनवास्वकारणंहंति
कार्यकारणभावापन्न[illegible]योर्द्रव्ययोर्वध्यघातकभावोनास्ती
त्यर्थः आश्रयनाशारंभकद्रसंयोगोत्पत्तिका[illegible]कर्मना
शकालएव तथाचसुष्ठूक्तंकर्मकर्मसाध्यंनविद्यतइ
गुणकर्मभ्यांद्रव्यस्यवैधर्म्यमाह नद्रव्यंकार्यंकारणंचवध
ति १२ नद्रव्यंनस्वकार्यंहंतिनवास्वकारणंहंति कार्यका
रणभावापन्नयोर्द्रव्ययोर्वध्यघातकभावोनास्तीत्यर्थः आ
श्रयनाशारंभकसंयोगद्रव्यनाशाभ्यामेवनाशादितिभावः
वधतीतिसौत्रोनिर्देशः गुणस्यकार्यकारणवध्यत्वमाह उभ
यथागुणः कार्यवध्यः कारणवध्यश्चेत्यर्थः आद्यादिश
ब्दबुद्ध्यादीनांकार्यवध्यत्वंचरमस्यतुकारणवध्यत्वं उपान्त्य
नशब्देनान्त्यस्यनाशात् गुणानांकार्यकारणोभयविरोधि

त्वमुक्त्वा कर्मणः कार्यमात्रविरोधित्वमाह कार्यविरोधिकर्म

कार्यं यस्य विरोधि यस्येति बहुव्रीहिः स्वजन्योत्तरसंयोगना

श्यत्वात् कर्मणः द्रव्याणां कारणाविरोधित्वं नियतमेव गुणक

र्मणोस्त्वनियमः आश्रयनाशासमवायिकारणनाशनिमित्त

नाशविरोधिगुणानां नाशकत्वस्य वक्ष्यमाणत्वात् शिष्याकां

क्षानुरोधेन साधर्म्यत्रयाणामभिसंधाय तेषां लक्षणप्रकर

णमारभमाण आह क्रियागुणवत् समवायिकारणमिति द्र

व्यलक्षणं क्रियाश्च गुणाश्च विद्यन्तेऽस्मिन्निति क्रियागु

णवत् अत्र लक्षणशब्दश्चिह्नवचनः समानासमानजाती

यव्यवच्छेदकव्यतिरेकिलिंगविशेषवचनः लक्ष्यतेऽनेनेति व्यु

त्पत्तिबलात् तत्र क्रियाकर्मणा द्रव्यमिदमिति लक्ष्यते गुणवत्त्वे

न च समानासमानजातीयेभ्यो व्यावृत्तं द्रव्यं लक्ष्यते तत्र समा

नजातीया भावत्वेन गुणादयः पंच असमानजातीयस्त्वभावः

ते न द्रव्यं गुणादिभ्यो भिन्नं गुणवत्त्वात् यन्न गुणादिभ्यो भिद्य

ते तन्न गुणवत् यथा गुणादीति गुणवत्त्वं यद्यथा घ लक्षणे

अवयविनि नास्ति तथापि गुणात्यंताभावविरोधित्वं चावि

वक्षितं गुणप्रागभावप्रध्वंसयोरपि गुणात्यंताभावविरोधि

त्वात् एवं समवायिकारणत्वमपि षट्पदार्थीमेदकमेव द्रव्य

पदार्थस्य लक्षणं न च साध्याप्रसिद्धिः गुणादिभेदस्य घ

टादावेव प्रत्यक्षसिद्धत्वात् न चांशतः सिद्धसाधनं घ

टत्वावच्छेदेनेतरभेदे न स्य सिद्धत्वेपि द्रव्यत्वावच्छेदेन सा

ध्यत्वात् पक्षतावच्छेदकभेदेन सिद्धसाधनं यथाऽनित्ये

कार्य

वाभनसेइत्यत्रैकेचिन् तन्न पक्षतावच्छेदकावच्छिन्नेकचिद
पिसाध्यसिद्धौपक्षतासत्तेः सत्त्वावश्यकत्वात् इतिशब्द
श्चेत्यादिपरः तेनसंख्यावत्त्वपरिमाणवत्त्वपृथक्त्वैकत्वसंयो
गवत्त्वविभाकत्वान्यपिद्रव्यलक्षणत्वेनसंगृह्यन्ते द्रव्यानंतरं
गुणानामुद्देशात्तल्लक्षणमाह द्रव्याश्रय्यगुणवान्संयोगवि
भागेष्वकारणमनपेक्षइतिगुणलक्षणं द्रव्यमाश्रयितुंशी
लमस्येतिद्रव्याश्रयी एतद्द्रव्येपिगतमतआह अगुणवान्
तथापिकर्मण्यतिव्याप्तिरित्यतआहसंयोगविभागेष्वकारणं
तथापिसंयोगविभागधर्माधर्मेश्वरज्ञानानामसंग्रहः स्याद
तउक्तंअनपेक्षइति अत्रानपेक्षइत्यनंतरंगुणइतिपूर्णीयं
संयोगविभागेष्वनपेक्षः सन्कारणंयोनभवतिसगुणइत्यर्थः
संयोगविभागादीनांसंयोगविभागौप्रतिसापेक्षत्वं नित्यवृत्ति
नित्यवृत्तिसत्ताव्याप्यजातिमत्त्वंगुणत्वं संयोगविभागौप्रसिद्धि
तौप्रतिसमवायिकारणत्वासमवायिकारणत्वरहितेसामान्य
वतियत्कारणत्वंतद्गुणत्वाभिव्यंजकंसंयोगविभागयोःप्रत्ये
कमेवसंयोगविभागकारणत्वंनमिलितयोः धर्माधर्मेश्वर
ज्ञानादीनांद्वयोर्निमित्तकारणत्वमात्रं नसमवायिकारणत्वं
नाप्यसमवायिकारणत्वमितितेषांसंग्रहः यद्वा संयोगवि
भागसमवायित्वासमवायिकारणत्वशून्यंसामान्यसमाना
धिकरणंगुणत्वव्यंजकं सामान्यवत्वेसतिकर्मान्यत्वेचस
र्याणत्वमेववागुणलक्षणं गुणानंतरमुद्दिष्टस्यकर्मणो
लक्षणमाह एकद्रव्यमगुणंसंयोगविभागेष्वकारणमनपे

क्षमिति कर्मलक्षणं पूर्वकमेवद्रव्यमाश्रयोयस्यतदेकद्रव्यं नवि
द्यते गुणोऽस्मिन्निति अगुणं संयोगविभागेष्वनपेक्षकारणमिति
स्वोत्पत्त्यनंतरोत्पत्तिकभावभूतानपेक्षत्वमनपेक्षत्वं तेनसमवा
यिकारणापेक्षायाः पूर्वसंयोगाभावापेक्षायांचनासिद्धत्वं स्वोत्प
त्त्यनंतरोत्पत्तिकानपेक्षत्वंवा पूर्वसंयोगध्वंसस्यापि स्वोत्पत्त्य
नंतरोत्पत्तिकत्वात् नित्यावृत्तिसत्तासाक्षाद्व्याप्यजातिमत्वं कर्मत्वं
चलतीति प्रत्ययासाधारणकारणतावच्छेदकजातिमत्वंवा गुणा
न्यनिर्गुणवृत्तिजातिमत्वंवा तावत्स्यव्यवहितोत्तरक्षणवृत्तिविभाग
कारणतावच्छेदकजातिमत्वंवा॰ सचायंचलतीति प्रत्ययसाक्षि
कः पदार्थोनाविरलदेशोत्पादादिनोपाधि क्षणभंगस्यापिनि
राकरिष्यमाणत्वात् लक्षणस्येतरभेदसाधकत्वंसाधर्म्यप्रकरण
मुपक्रमते द्रव्यगुणकर्मणांद्रव्यंकारणंसामान्यंसमानमेकंव
सामान्यमेकमित्यर्थः अनयोः समानामात्तेतिवत् एक
स्मिन्नेवद्रव्येसमवायिकारणेद्रव्यगुणाकर्माणि कार्याणिव
र्तंत इत्यर्थः द्रव्यसमवायिकारणकवृत्तिजातिमत्वंत्रयाणां
साधर्म्यं गुणासमवायिकारणकत्वंत्रयाणांसाधर्म्यमाह
उभयथागुणः गुणासमवायिकारणंवृत्तिजातिमत्वंत्रितय
साधर्म्यं द्रव्याणांसंयोगोऽसमवायिकारणंकार्यगुणानांरू
परसगंधस्पर्शसंख्यापरिमाणपृथक्त्वादीनांसजातीयगु
णासमवायिकारणकत्वं पार्थिवपरमाणुगुणानामग्निसंयो
गासमवायिकारणकत्वं कर्मणांनुनोदनाभिघातगुरुत्व
द्रवत्वसंस्कारादृष्टवदात्मसंयोगाप्रयत्नवदात्मसंयोगासम

वै० सू० वृ० वायिकारणकत्वं यथाखमूहनीयं क्वचिदेकस्यापिकगु
११ णस्यत्रयाणांद्रव्यगुणकर्मणामारंभकत्वंतद्यथा वेगवत्तू
लपिंडसंयोगस्तूलपिंडांतरेकर्मकरोति द्वितूलकंचद्रव्यमा
रभतेतत्रपरिमाणंक्वचिदवच्छेदकोगुणोद्रव्यगुणावारभते
यथातूलपिंडसंयोगएववेगानपेक्षः प्रचयाख्योद्वितूलकंद्र
व्यंतत्रचपरिमाणमारभते एकस्यकर्मणःक्वचिदनेकार्थका
रित्वमाह संयोगविभागवेगानांकर्म समानंकारणमित्यनु
षंगः द्रव्येयत्रकर्मोत्पन्नंतद्यावद्भिर्द्रव्यैः समंतद्द्रव्यंसंयुक्त
मासीत्तावद्भिरेवश्यतसंख्यान्विभागाञ्जनयित्वातावतः सं
योगानपिपुनरन्यत्रजनयतिवेगंपुनरेकमेवस्वाश्रयेकरोति
वेगपदंस्थितिस्थापकमप्युपलक्षयति ननुक्रियावताद्रव्येणा
रंभकसंयोगेजनितेतेनचद्रव्यमारब्धंयत्तद्रूपिकर्मजन्यमेवक
र्मणस्तत्कर्तृत्वादतआह नद्रव्याणां कर्मनद्रव्याणांकार
णमित्यर्थः कुतएवमतआह व्यतिरेकात् व्यतिरेकादिति
वृत्तेरित्यर्थः उत्तरसंयोगेनकर्मणिनिवृत्तेद्रव्यमुत्पद्यतइति
नकर्मणोद्रव्यकारणत्वं विनश्यदवस्थंचकर्मनद्रव्यकार
णंकिंच द्रव्यस्य कर्मासमवायिकारणंवाभवेन्निमित्त
कारणंवा नतावदाद्यः द्रव्यस्यासमवायिकारणनाशस्यचे न
ऽवयवकर्मनाशादेवद्रव्यनाशापत्तेः नद्वितीयः महाप
टनाशेऽवस्थितसंयोगेभ्यएवखंडपटोत्पत्तौनिष्कर्मणामेवा
वयवानांद्रव्यारंभदर्शनाद्व्यभिचारात् बहूनामेकस्या
रंभकत्वादिदानीमेकस्मिन्कार्येबहूनामारंभकत्वमाह द्रव्या

णांद्रव्यंकार्यंसामान्यं द्रव्यैचद्रव्याणिचद्रव्याणितत्रद्वाभ्यांतंतुभ्यां
द्वितंतुकःपटोबहुभिरपितंतुभिरेकःपटआरभ्यतेननचैकतंतुको
पिपटोदृश्यते यत्रैकेनैवतन्तुनातानप्रतितानोभवतइतिचेत्
न तत्रैकस्यसंयोगाभावेनासमवायिकारणाभावात्पटानुत्प
त्तेः नचांशुतंतुयोगोऽसमवायिकारणं अवयवावयविनोर्यु
तसिद्धत्वेनसंयोगाभावात् आरभ्यारंभकवादानभ्युपगमात् मू
र्त्तोनांसमानदेशताविरोधात् दृश्यतेतावदेवमितिचेत् न त
त्रवेमाद्यभिघातेनमहावयविनस्ततोनाशात् खंडावयविना
तंक्रियतेतेषामन्योन्यसंयोगात्पटोपटोत्पत्तेः वस्तुगत्यातत्रना
नात्वेषुतंतुष्वेकत्वाभिमानात् ननुयथाद्रव्याणांद्रव्यंका
र्यंगुणानांचगुणास्तथाकिंकर्मणामपिकर्मकार्यमित्यतआ
ह गुणावैधर्म्यान्नकर्मणां कर्मकार्यमितिशेषः द्रव्यगुण
योःसजातीयारंभकत्वंसाधर्म्यमुक्तं तत्रकर्मकर्मसाध्यंनवि
द्यतइतिसूत्रेणकर्मणांकर्मजनकत्वंप्रतिषिद्धमेवतदिहानू
द्यतइतिभावः इदानीमासज्यवृत्तीनांगुणानामनेकद्रव्यारभ्य
त्वंदर्शयन्नाह द्वित्वप्रभृतयःसंख्याःपृथक्त्वंसंयोगविभागाः
अनेकद्रव्यारभ्याइतिशेषः द्वित्वादिसमभिव्याहृतंपृथ
क्त्वपदमपिद्विपृथक्त्वादिपरं एवंचद्वित्वादिकाःपरार्द्धपर्यंताः
संख्याःद्विपृथक्त्वादीनिचसंयोगविभागाश्चद्वाभ्यांद्रव्याभ्यां
बहुभिश्चैवद्रव्यैवारभ्यंतेअनेकवृत्तित्वममीषांतत्त्वसकलौ
न्योन्याभावसामानाधिकरण्यंनन्ववयविद्रव्याणांगुणा
नांचोक्तानांयथाआसज्यवृत्तित्वंतथाकर्मणामपिकिंनस्या

वै० सू० वृ०
१२
12

दत आह असमवायात्सामान्यकार्यं कर्म न विद्यते असमवा
यादित्यात्र द्रव्ययोर्द्रव्येष्विति योज्यं तथा च न द्रव्ययोरेकं कर्म
समवैति न वा द्रव्येष्वेकं कर्म समवैति तेन सामान्यस्य समुदा
यस्य कार्यं कर्म न विद्यते अत्रापि विदितो नार्थो न सत्तावच
नः यदि कर्मव्यासज्यवृत्ति स्यादेकस्मिन् द्रव्ये चलति द्वयोर्द्रव्य
योर्बहुषु वा द्रव्येषु चलतीति प्रत्ययः स्यात् न चैतदस्ति तस्मा
न्न कर्म व्यासज्यवृत्तीत्यर्थः ननु शरीरतदवयवानां कर्म शरी
रतदवयवैर्नानुभिरारभ्यत एव कथमन्यथा शरीरे चलती
करचरणादावपि चलति प्रत्यय एवमन्यत्राप्यवयविनीति चेत्
न अवयविकर्म सामग्र्या अवयवकर्मसामग्रीव्याप्यत्वात्तयो
पलब्धेः ननु वैपरीत्यं न ह्यवयवे चलति सर्वत्रावयविनि च
लतीति प्रत्ययः अन्यथा कारणाकारणसंयोगात्कार्याकार्यसं
योगोपि न स्यात् कारणकर्मणैव कार्यस्यापि संयोगोपपत्तेः
पुनर्बहूनामेकं कार्यमाह संयोगानां द्रव्यं बहूनां संयोगा
नां द्रव्यमेकं कार्यमित्यर्थः निरवयवानां द्रव्याणामन्त्यावयविनां
विजातीयद्रव्याणां चावयवे संयोगास्तान्विहायेति द्रष्टव्यं द्रव्या
नी बहूनां गुणानामेकं कार्यमाह रूपाणां रूपं रूपमेकं
कार्यमित्यन्वयः रूपपदमुभयमपि लाक्षणिकमजहत्स्वा
र्था चेयं लक्षणा कारणैकार्थसमवायप्रत्यासत्त्या जन्यज
नकभावाश्रयत्वं वा शक्यलक्षणसाधारणो धर्मः तेन रूप
रसगंधस्पर्शस्नेहसांसिद्धिकद्रवत्वैकपृथक्त्वानि संगृह्यं
ते एते हि कारणे वर्तमानाः कार्येषु समानजातीयमेकमे

वगुणमारभंते हि धात्वसमवायिकारणानां गतिः केचित्कार
णैकार्थसमवायप्रत्यासत्त्याजनयंतिकारणमिह समवायिकार
णं विवक्षितं तच्च जन्यस्य रूपादिलक्षणस्य कार्यस्य तेन रूपादि
लक्षणकार्यस्य समवायिकारणं घटादि तेन सह कपालेवर्त्त
मानं रूपं कारणे कार्यसमवेते घटे रूपमारभंते एवं रसाद्यपि
कचित्वे कार्थसमवायप्रत्यासत्त्याऽसमवायिकारणत्वं यथाका
रणमपि शब्दो नभसि कार्यमपि शब्दांतरं नभस्येव रूपाद्यपि
पार्थिवपरमाणावग्निसंयोगेन कार्यैकार्थसमवायप्रत्यास
त्याजन्यते एकस्य कर्मणोऽनेककार्यत्वमाह गुरुत्वप्रयत्नसंयो
गानामुत्क्षेपणं उत्क्षेपणमेकं कार्यममीषामित्यर्थः अत्रगु
रुत्वं वस्य हस्तलोष्ठादिवर्त्तिनो निमित्तकारणत्वं प्रयत्नवदात्म
संयोगस्यासमवायिकारणत्वं हस्तनिष्ठोत्क्षेपणस्य मुस
लनिष्ठोत्क्षेपणस्य तु हस्तनोदनमसमवायिकारणम् गुरुत्वप्र
यत्नौ निमित्तकारणं अत्राप्युत्क्षेपणपदमवक्षेपणाद्यु
पलक्षणिकं ननु मूर्त्तगुणामूर्त्तगुणानां कार्याणां कारण
गुणपूर्वकत्वं स्वाश्रयगुणपूर्वकत्वमुक्तं द्रव्यकर्मणोश्चन
कर्मकारणमित्युक्तं तथा च कर्मणः किमपि न कार्यमि
त्यायातं तथा चातींद्रियाणां सूर्य्यादिगतीनामनुमानमपि
दुर्लभं लिंगाभावादतः संयोगविभागवेगानां कर्म्मेतिस्त्रो
क्तमेवस्मारयन्नाह संयोगविभागाश्च कर्म्मणा जन्या
इति शेषः व्यक्त्यभिप्रायेण बहुवचनं संस्कारेत्युपलक्ष
णीयः ननु द्रव्यकर्मणी न कर्म कार्य्यं इति पूर्वमुक्तं सा

वै० सू० वृ०
१३
13

योगविभागोनुसंयोगविभागकार्योवेव तथा चैदानीकर्म्म
णः कारणत्वाभिधानं नविरुद्धमित्यत आह कारणसामा
न्येद्रव्यकर्म्मणांकर्म्माकारणमुक्तमिति कारणसमान्य
पदेनतुप्रकरणमुपलक्ष्यते तेनकारणसामान्याभिधाने
प्रकरयोद्रव्यकर्मणोप्रतिकर्म्मणाऽकारणत्वमुक्तं ननुसर्व्व
थाप्यकारणमेवकर्म्मेतिविवक्षितं येनसंयोगविभागाश्चकर्म
णामितिसूत्रंव्याहन्येतेतिभावः इतिश्रीमद्भगवत्कणाद
सूत्रोपस्कारेप्रथमाध्यायस्यप्रथममाह्निकं ॐनमः श्रीम
न्महागणपतयेनमः श्रीरामचंद्रायनमः नन्वनेनग्रंथखंडे
नद्रव्यादीनांत्रयाणांपदार्थानांकार्यैकत्वघटितंकारणैकत्व
घटितंचसाधर्म्यमुक्तं तच्चानुपपन्नं कार्यकारणभावस्यै
वासिद्धेरत आह कारणाभावात्कार्य्याभावः दृश्यतेहि
हिमत्वक्सलिलसूत्रादौदंडाभावाद्घटाभावो बीजाभावा
दंकुराभावः सचदंडघटयोर्बीजांकुरयोर्वाकार्यकारण
भावमंतरेणानुपपन्नोऽन्यथावेमाभावेपटाभावःशिलास
कलाभावेअंकुराभावःस्यात् किंच घटपटादीनांकादा
चित्कत्वमनुभूयतेतदपिहेतुफलभावमंतरेणानुपपन्नोन
हिकिंचित्कालासत्वेसतिकिंचित्कालसत्वंकादाचित्कत्वंभावा
नांकारणापेक्षामंतरेणसंभवति तदाहिस्यादेवनस्यादे
वननुकदाचित्स्यात् नहिभावोनभवत्येव नाप्यहेतोर्भव
ति नवासस्मादेवभवति नवानिरुपाख्यादेवशशविषा
णादेरेवभवतिकिंतुदंडचक्रादेःसोपाख्यस्यावधेर्घटप

टादौ कार्यदर्शनादबाधितकारणमेव कार्यकारणभा
वाभावे प्रवृत्तिनिवृत्तीनस्यातां तथाच निरीहं जगज्जायेत
नहीष्टसाधनताज्ञानमंतरेण प्रवृत्तिरनिष्टसाधनताज्ञानमं
तरेण वा निवृत्तिः ननु सदेवोत्पद्यतेनासत् सदेव सोम्येद
मग्र आसीदित्यादि श्रुतिप्रामाण्यात् अन्यथाऽसत्त्वाविशे
षेतंतुभ्य एव पटोन कपालेभ्य इतिनियमोनस्यादितिचेत् न
परिणामवादिभिरपि संबंधलक्षणकैरयं नियमोऽभ्युपगंतव्य
एव अन्यथा घटाभिव्यक्तिः कपालेष्वेवनतंतुष्विति कथं स्या
त् किंच यद्यभिव्यक्तिरपि पूर्वमासीदेव तदा तस्यापि नित्यत्वे आ
विर्भावतिरोभावस्तु स्यादविनाशाविरिक्तं वचः अथाविर्भो
वतिरोभावौ कारणापेक्षौ तदा घटपटादीनामपि कारणापेक्षै
वास्तामयुत्पत्तिरित्यायातं यत्तु कारणानुपपत्तिरित्युक्तं तत्र
स्वभावनियममेनैवोत्तरं सच स्वभावनियमोऽन्वयव्यतिरेकग
म्यो भगौवति भवतिहि दंडमंतरेणन घटोदंडे सति घट इति
सर्वसाक्षिको एवंचानन्यथासिद्धनियतपूर्ववर्तिजाती
यत्वं सहकारिवैकल्यप्रयुक्तकार्याभावत्वं कारणत्वं यद्यपि
यवैर्यजेत व्रीहिभिर्वेत्यादौ नियतपूर्ववर्तित्वं नास्ति नहि यव
करणयागनिष्पाद्ये फले व्रीहिकरणकयागस्य पूर्ववर्ति
त्वं विकल्पितमपिहि कारणं कारणमेव फलैककार्ये पिद्व
योः कारणत्वोपपत्तेः तथाच सहकारिवैकल्यप्रयुक्तका
र्याभावत्वं लोकवेदसाधारणीकारणता नियतपूर्ववर्तित्व
त्वन्वयव्यतिरेकगम्या कारणता लौकिकी नहि स्वर्गकामोय

वै० सू० वृ०
२५
15

जैतेन्यादौ व्यतिरेकभागोपि विषयः प्रवृत्तेरन्वयमात्रज्ञा
नादेवोपपत्तेः अतएव विकल्पे उभयमशास्त्रार्थं इत्यपि
घटते तज्जातीयस्य फलस्यैकेनैवोपपत्तेरपरानुष्ठान
वैयर्थ्यात् अतएव श्रौतस्मार्त्तकर्मणः फलावश्यंभा
वनियम इत्ययुक्तं आगममूलत्वात्तस्यार्थस्येत्यपाचार्या
भिधानं कल्पयेत्तान्ययथैवं तृणारणिमणिस्थलेतुका
र्यवैजात्यमावश्यकं तत्रान्वयव्यतिरेकगम्यत्वात् विका
ल्पस्थलेतु फलवैजात्यकल्पनेराजसूयवाजपेयादावपि वै
कल्पिकी कारणतेति स्यादिति। कार्यकारणभावनियम
मेवोपपादयन्नाह ननु कार्याभावात्कारणाभावः यदि
कार्यकारणभावनियमो न भवेत्तदा कार्याभावादपि कारणा
भावः स्यात् कार्याभावः कारणाभावं प्रत्यतंत्रं कारणाभा
वस्तु कार्याभावं प्रतितंत्रं तेन दुःखाभावार्थं जन्माभावे जन्माभावार्थे
प्रवृत्त्यभावे तदर्थं च दोषाभावे मिथ्याज्ञाननिवृत्तये तदर्थं
तत्त्वसाक्षात्कारार्थं मुमुक्षूणां प्रवृत्तिः प्रयोजनमौपोद्घातिकस्या
पि तस्य द्वित्रकप्रकरणस्य। पदार्थप्रयोगोद्देशलक्षणा
नंतरमिदानीमुद्दिष्टस्य सामान्यपदार्थस्य लक्षणमाह सामा
न्यं विशेष इति बुद्ध्यपेक्षं सामान्यं द्विविधं परमपरं च तत्र
परं सत्ता अपरं सत्ताव्याप्यं द्रव्यत्वादि तत्र सामान्यस्य तद्वि
शेषस्य च लक्षणं बुद्धिरेव अनुवृत्तबुद्धिः सामान्यस्य व्या
वृत्तबुद्धिर्विशेषस्य लक्षणं इति नाद्वयमप्यवच्छिद्य
परामृश्यते तेन बुद्ध्यपेक्षमिति नपुंसकनिर्देशः वृत्तिकार

त्वविशेषांशेव्यन्यथमाह परंतुनपुंसकमनपुंसकेनैकव
त्वास्या न्यतरस्यामित्यनेनैकवद्भावोनपुंसकताचबुद्धिरपे
क्षालिंगलक्षणाबाधस्यतद्बुद्ध्यपेक्षः तत्रनित्यमनेकव्यक्तिवृत्ति
सामान्यंनित्यत्वेसतिस्वाश्रयान्योन्याभावासमानाधिकरणंवा
परमपिसामान्यं तथाऽपरमपिसामान्यं तथाअपवंतुसान्य
विशेषसंज्ञामपिलभतेयथाद्रव्यमिदंद्रव्यमिदमित्यनुवृत्त
प्रत्ययेसत्येवनायंगुणोनाकर्मेतिविशेषप्रत्ययोपितेनत्वेतिद्र
व्यत्वादीनांसामान्यानामेवविशेषत्वमपि ननुविधिरूपंसामान्य
नास्त्येव अनुगतमतेरतद्व्यावृत्त्यैवोपपत्तेः भवतिहिगोर
यमितिप्रतीतेरगोव्यावृत्तोयमितिविषयः जातिवादिनापिगो
त्वादिविशिष्टप्रत्ययस्यतद्विषयत्वाभ्युपगमात् नहिवैशिष्ट्य
मतद्व्यावृत्तेरन्यत् गवादिपदप्रवृत्तिनिमित्तमप्यगोव्यावृत्या
दिरेवकिंचगोत्वंकुत्रवर्त्ततेनतावद्गवि गोत्ववृत्तेः पूर्वतस्या
भावात् नाथगविविरोधात् यत्र वागोपिंडउत्पद्यतेनैत
त्रकुतआगत्यगोत्वंवर्त्तते नतावत्तत्रैवासीद्देशस्यापितस्यगो
त्वापत्तेः नापिगोत्वमपितत्रतदानीमेवोत्पन्नं नित्यत्वाभ्युपग
मात् नाप्यन्यतआगतंनिः क्रियत्वाभ्युपगमात् नचैकस्मै
वानंशस्यानानाव्यक्तिवृत्तित्वं कार्त्स्न्यैकदेशविकल्पानुपपत्तेः
नहिकृत्स्नमेकत्रैववर्त्तते अन्यत्रतद्विशिष्टप्रत्ययानुदयात्
नाप्येकदेशेनजातेरेकदेशस्याभावात् तदुक्तं नयातिनच
तत्रासीन्नचोत्पन्नंनचांशवत् जहातिपूर्वंनाधारमहोव्य
समसंततिरिति ० सामान्यमस्तितत्वसंस्थानमात्रव्यंग्य

वै० सू० वृ०
१५
15

गोत्वघटत्वादिवन्नगुणकर्मगतमपीतिसगोत्रकत्वमहः अ
त्रोच्यते सामान्यंनित्यंव्यापकंच व्यापकत्वमस्यस्वरूप
तःसर्वदेशसंबद्धत्वंनचदेशानांगोव्यवहारापत्तिः समवाये
नतद्व्यवहारस्याभ्युपगमात् कालेरूपादिसत्त्वेपिकालोरूप
वानित्यप्रतीतिव्यवहारात् नचकालोनास्त्येववयं।चभिह्नवः
संज्ञाभेदमात्रमितिवेन्नाभ्युपगमादितिचेत् कालस्यसाध
यिष्यमाणत्वात् तथाचयत्रपिंडउत्पद्यतेतत्रस्थमेवगो
त्वंतेनसंबध्यते जातःसंबद्धश्चेत्येकःकालइत्यभ्युपगमा
त् एतेनकीदृश्याश्रयेवर्त्ततइत्यत्रयत्रयत्रप्रतीयतइत्येवो
त्तरंकुत्रवर्त्ततइत्यत्रयत्रवर्त्ततइत्युत्तरं गोत्ववृत्तेःपूर्वंसपिंडः
कीदृगासीदित्यादिपरिदेवनमात्रं अतद्व्यावृत्तिरेवगोत्वमि
त्यत्रगौरयमितिविधिमुखःप्रत्ययएवबाधकः नह्यनुभ
वोपिव्याख्यायते तदुक्तं विधिजःप्रत्ययोन्यायंव्यतिरेका
समर्थनइति नहिगौरयमित्यत्रागोव्यावृत्तिरपिभासते क।
त्स्न्यैकदेशविकल्पस्सतदाभवेत्सौयधेकस्यसामान्यस्यकार्त्स्न्येभ
वेदेकदेशेनवाकृत्स्नत्वघनेकाश्रयतासाचैकस्मिन्ननुपप
न्ना गौरयमित्याद्यनुभवएवासद्विषयोनवस्तुव्यवस्थाप
नक्षमइत्यत्रतुवक्ष्यते प्राभाकरास्तु संस्थानमात्रघंग्यंसा
मामान्यमाचक्षते तद्यद्यनुगतिमतिसाक्षिकंतदाकिमपरा
द्धंगुणकर्मगतैःसामान्यैः भवतिहिरूपरसादावनुगत
धीःसाचजातिव्यवस्थापिकैवबाधकाभावात् रूपत्वर
सत्वादिजातिषुनतावद्व्यक्त्यभेदोबाधकआकाशत्वादिव

इत्यत्र वैनाशदिवेला
इत्युत्तरं एवं वचनापातीत्या

त् रूपरसादिव्यक्तीनामनेकत्वात् नापिबुद्धिवज्ज्ञानत्ववत्
घटत्वकलशत्वादिवद्वातुल्यत्वंबाधकंतत्त्वान्यूनानतिरिक्त
व्यक्तिकत्वंगुणत्वापेक्षयान्यूनव्यक्तिकत्वात् नीलत्वाद्यपे
क्षयाचाधिकवृत्तित्वा अतएवनसंकरः मूर्तत्वमूर्तत्ववत् प
रस्परात्यंताभावसामानाधिकरण्येसतिमिथःतरेणसामानाधिकर
ण्याभावात् नाप्यनवस्था रूपत्वादिगतसामान्यांतरानभ्युप
गमात् नापिरूपहानिर्विशेषत्ववत् यदिविशेषाद्रव्याश्रि
तत्वेसतिजातिमंतः स्युर्गुणाःकर्माणिवास्युः विभुवृत्तित्वेसति
यदिजातिमंतःस्युर्गुणाःस्युरितियथाविशेषपदार्थस्वरूप
हानिस्तथाप्रकृतेऽभावात् नापिसमवायत्ववदसंबंधः स
मवायेसमवायाभ्युपगमेऽनवस्थाभयात्तथात्वेः प्रकृतेतुस
मवायस्यैवसंबंधस्याभ्युपगमात् यद्यपिसमवायत्वजातिभेदे
धकोव्यक्त्यभेदएवतथापियन्मतेऽन्यादविनाशस्तीव्रावस्त्वः
समवायास्तन्मतेद्रष्टव्यं । अभावत्वादिजात्यभ्युपगमेबाध
कमेतत् विवादपदमनुगतबुद्धिरनुगतनिमित्तसाध्याऽबा
धितानुगतमतित्वात् दामकुसुमबुद्धिवत् इतिजातौमा
नमितिवृत्तिकाराः तच्चैवं सामान्यंविशेषइतिद्वैविध्यंय
दुक्तंतदुपपादयन्नाह भावोऽनुवृत्तेरेवहेतुत्वात्सामान्यमे
व भावःसत्तासाचानुवृत्तेरेवहेतुः ननुव्यावृत्तेरपिहेतुः
तथाचविशेषसंज्ञांनलभते केषांसामान्यानांविशेषसंज्ञेत्य
पेक्षायामाह द्रव्यत्वंगुणत्वंकर्मत्वंचसामान्यानिविशेषाः
चकारःपृथिवीत्वादीनिद्रव्यगतजातीःरूपत्वादीनिगुणग

वै० सू० वृ०
६
16

तज्जातीकक्षेपणत्वादीनिकर्मगतजातीः समुच्चिनोति च सामान्या
निविशेषाः चकारः पृथिवीत्वादीनिद्रव्यगतजातीः रूप
त्वादीनिगुणगतजातीकक्षेपणत्वादीनि [redacted]
समुच्चिनोति द्रव्यत्वमित्यादावसमासः परस्परंव्याप्यव्या
पकभावाभावसूचनार्थः सामान्यंवविशेषाश्चेत्यत्रासमा
सः सामान्यत्वेसत्येवविशेषत्वंयथाज्ञायेत तदर्थं अन्यथासा
मान्यविशेषाइतिषष्ठीसमासभ्रमः स्यात् तथाचसामा
न्यत्वेसतिविशेषत्वंनप्रतीयेत ननुद्रव्याकारानुगतमतिसि
साक्षिकं नतावत् द्रव्यत्वं पृथिव्यादौकथंचित्तत्सत्त्वेपिवा
आकाशादौतदसंभवात् नचगुणत्वावच्छिन्नकार्यसमवायि
कारणतावच्छेदकतयातत्सिद्धिः नित्यानित्यवृत्तितयागु
णत्वस्यकार्यतानवच्छेदकत्वात् गुणत्वार्थमपिपर्यनुयो
गस्यतादवस्थ्यात् मैवं संयोगत्वावच्छिन्नकार्यसमवा
यिकारणतावच्छेदकतयाद्रव्यत्वसिद्धेः साहिनपृथिवीत्वाद्य
वच्छेद्या न्यूनवृत्तित्वात् नापिसत्तावच्छेद्या अधिकवृत्तित्वा
त् अवश्यंत्ववच्छेदकेनभवितव्यमन्यथाआकस्मिकताप
त्तेः तत्रपरमाणुषुद्व्यणुकासमवायिकारणत्वंतथाद्व्यणु
केषुत्र्यणुकासमवायिकारणत्वंतथाविभुचतुष्टयस्यसक
लमूर्त्तसंयोगितयैवसिद्धेर्मनसीन्द्रियमनःसंयोगाधार
अत्यन्तद्रव्येष तयावायौनुदनादिनोदनाश्रयतयाप्रत्यक्षतएवसंयोगा
भ्युपगमस्यावश्यकत्वात् अजस्रसंयोगोनास्त्येवयेनसं
योगत्वस्यापिकार्याकार्यवृत्तितयाकार्यतावच्छेदकतान

स्यात् एवं विभागसमवायिकारणतावच्छेदकतयापि द्रव्यत्व
सिद्धेः सुप्रतिपदत्वात् गुणत्वं तु संयोगविभागसमवायिकारण
त्वासमवायिकारणत्वशून्ये सामान्यवति यत्कारणत्वं तदवच्छे
दकतयैव सिद्धमित्युक्तत्वात् कर्मत्वमपि प्रत्यक्षद्रव्येषु चल
तीति प्रत्ययसाक्षिकमन्यत्र तु संयोगविभागानुमेयं संयोगविभा
गोभयासमवायिकारणतावच्छेदकतयापि कर्मत्वसिद्धेरेव
श्यकत्वात् अत एवादित्यस्य देशांतरप्राप्त्या गत्यनुमानं तत्र
च देशांतरस्याकाशादेरतींद्रियत्वेपि तत्क्रियासंयोगविभाग
योस्तन्मंडलेन प्रत्यक्षत्वात्तत एव गत्यनुमानं देशांतरप्राप्ति
मानादित्यः अविनाशित्वे द्रव्यत्वे च सति प्राङ्मुखोपलब्धस्य
प्रत्यङ्मुखेन तेनैवोपलब्धत्वात् तथा प्रत्यभिज्ञायमानत्वादिति
देशांतरप्राप्त्यनुमितया आदित्यगत्यनुमानमित्युद्योतक
राचार्याः ननु य एव विशेषपदार्थ उद्दिष्टः स एव किं सा
मान्यविशेषत्वेनाभिधीयत इति शिष्याशयमपनयन्नाह
अन्यत्रांत्येभ्यो विशेषेभ्यः अंत्या विशेषा नित्यद्रव्यवृत्त
योऽभिहितास्तान्वर्जयित्वा सामान्यविशेषाभिधानमि
त्यर्थः अंतेऽवसाने भवंतीत्यंत्याः यतो न व्यावर्त्तकांतरम
स्तीत्याचार्याः उत्पादविनाशयोरंतेऽवसाने भवंतीत्यंत्या नि
त्यद्रव्याणि तेषु भवंतीत्यंत्या विशेषा इति वृत्तिकृतः ते हि
विशेषा एव व्यावृत्तिबुद्धिमात्रहेतवो ननु सामान्यरूपा अ
पीति सत्तासामान्यमित्यत्र बहूनां विप्रतिपत्तिरतस्तत्प्र
माणमाह सदिति यतो द्रव्यगुणकर्मसु सा सत्ता

वै०सू०वृ०
१७
17

इतिकारेणप्रत्ययव्यवहारयोः प्रकारमुपदिशति तथा चद्र
व्यादिषुत्रिषुसत्सदितिप्रकारकोयत्रप्रत्ययः सदिदंसदिदंमि
त्याकारः शब्दप्रयोगोयदधीनःसासत्ता ननुद्रव्यगुणकर्म।
भ्यः पृथग्भावेनक्वापिसत्तानानुभूयतेऽतोद्रव्याद्यन्यतमै
वसत्ता यतोहियद्भिन्नंभवतितत्ततोभेदेनानुभूयतेयथाघटः
पटात् नचसत्तातेभ्योभेदेनानुभूयतइतितद्भ्रमिकैवेत्यत
आह द्रव्यगुणकर्मभ्योऽर्थांतरंसत्ता द्रव्यादयोऽननु
गताः सत्ताचानुगतातदाचाननुगतत्वानुगतत्वलक्षणविरुद्ध
धर्म्माध्यासेनतेभ्योभेदस्यसिद्धत्वात्सत्तु तेभ्योऽत्यन्तनोपल
भ्यतेतदयुतसिद्धिबलात् घटपटयोस्तुयुतसिद्धिः नचव्य
क्तिस्वरूपमेवसत्ता व्यक्तीनामननुगमात् स्वरूपत्वेयद्यनु
नुगतंतदासैवसत्ता अननुगतैरपिस्वरूपैरनुगतव्यवहार
श्चेत्तदागोत्वादिभिरपिगतंअतएवयत्रसत्तासमवैतितादृशे
एधारैरेवतद्व्यवहारोपपत्तौकिंसत्तयेत्यपास्तं अतए
वार्थक्रियाकारित्वंप्रामाणिकत्वंवासत्वमित्यपुक्तं तदनु
संधानेपिसत्प्रत्ययात् भेदकांतरमाह गुणकर्मसुच
भावान्नकर्मनगुणः नगुणोनकर्मेतिवक्तव्येप्रत्ययाभि
धानंनद्रव्यमित्यपिसूचयति नहिकर्म्मकर्मसुवर्त्ततेन
वागुणोगुणेषु नवाद्रव्यंगुणेकर्मणिवासत्तानुगुणेक
र्मणिचवर्त्ततेतेनद्रव्यगुणवैधर्म्यात्तेभ्योभिन्नैवसत्ता भे
दकांतरमाह सामान्यविशेषाभावेनच यदिसत्ताद्रव्यं
गुणः कर्मवास्यात्तदासामान्यविशेषवती स्यान्नचसत्तायां

द्रव्यत्वादयः सामान्यविशेषा उपलभ्यंते॰ नहि भवति सत्ताद्र
व्यं गुणः कर्मवेति केषांचित्प्रत्ययः एवं सामान्याद्द्रव्यगुणकर्म
भ्यो ऽर्थांतरत्वमभिधाय द्रव्यत्वस्य तेभ्यो ऽर्थांतरत्वमाह अ
नेक द्रव्यवत्त्वेन द्रव्यत्वमुक्तं अनेकं द्रव्यं समवायियस्य त
द नेकद्रव्यवत् अनेक पदं सर्वपरं तेन पृथिवीत्वादिभ्यो भेदः
नित्यत्वं तु सामान्यलक्षणप्राप्तमेव॰ तेनावयविभ्यो भेदः अने
कद्रव्यवत्त्वं च अनेकद्रव्यमात्रसमवेतत्वं॰ तेन सत्ताभेदः तेन नि
त्यमनेकद्रव्यमात्रसमवेतं द्रव्यत्वं॰ अजः संयोगेनेष्टतरत्वमुक्तं
द्रव्यत्वं च साधितमेव द्रव्यत्वमुक्तमिति॰ द्रव्यत्वमपि सत्तादेव
व्याख्यातमित्यर्थः ननु द्रव्यत्वमपि जात्याश्रयाद भिन्नमेव स्या
त् को दोष इत्यत आह सामान्यविशेषाभावेनच यदि द्र
व्यत्वं जातिर्द्रव्यात्मिकैव स्यात् तदा तस्याः पृथिवीच जलत्व तेज
स्त्वादयः सामान्यविशेषाः स्युरित्यर्थः नहि भवति द्रव्यं त्वं
पृथिवी जलं तेजो वेति केषांचित्प्रत्यय इत्यर्थः गुणत्वमाह
तथा गुणे
स्वभावाद्गुणत्वमुक्तं गुणेष्वेव भावा समवायाद्गुणत्वं द्रव्यगुण
कर्मभ्यो भिन्नं सत्तावदेवोक्तमित्यर्थः भेदकांतरमाह सामा
न्यविशेषाभावेनच यदि द्रव्यत्वं गुणकर्मभ्यो गुणत्वमतिरि
क्तं न भवेत्तदा द्रव्यं च गुणत्व कर्मत्व तदवांतरजातिमत्तयोपल
भ्येतेत्यर्थः द्रव्यगुणकर्मभ्यो भेदकं कर्मत्वस्याह कर्मसु
भावात्कर्मत्वमुक्तं कर्मस्वेव भावा समवायात्कर्मत्वमपि जा
त्यंतरं द्रव्यगुणकर्मभ्यो भिन्नमुक्तं सत्तावदित्यर्थः भेदकां
तरमाह सामान्यविशेषाभावेनच कर्मत्वं यदि द्रव्याद्यात्म

र्कं भवेत्तदा द्रव्यत्वादिसामान्यविशेषस्तत्र समवेयादित्यर्थः से
यमेकाकारा चतुःसूत्री सत्ताद्रव्यत्वगुणत्वकर्मत्वानां चतसृ
णां जातीनां द्रव्यगुणकर्मभेदप्रतिपादनायैकप्रकरणेनो
क्तेत्यवधेयं ननु सत्ताद्रव्यगुणकर्मसु वर्त्तमाना द्रव्यत्वाद्यव
च्छेदभेदेन भिन्नैव कथं कस्यादत आह सदिति लिंगाविशेषा
द्विशेषलिंगाभावाच्चैको भावः सदित्याकारं ज्ञानं शब्दप्रयो
गो वा सत्ताया लिंगं तच्च द्रव्यगुणकर्मसु समानमविशिष्टं ते
न भावः सत्तायेकैव तेषु वर्त्तते त्रीन्यथा द्रव्यत्वादिमिक्तस्यव्यक्ति
कतया सत्तावानस्यात्तानिवानसुः विशेषलिंगाभावेति वि
शेषो भेदस्तत्र यल्लिंगमनुमानं तदभावान्न भेद इत्यर्थः भवति
हि स एवायं दीप इत्यनुगमस्तत्र यथा विशेषलिंगं दीर्घत्वह्रस्व
त्वादिपरिमाणभेदस्तथात्र विशेषलिंगं नास्तीति भावः इति
श्रीमच्छंकरकृते कणादसूत्रोपस्कारे प्रथमाध्यायस्य द्विती
यमाह्निकं समाप्तश्चायं प्रथमोध्यायः श्रीमन्महाहयग्री
वायनमः ॐ नमः श्रीमन्महागणपतयेनमः द्वितीयाध्या
प्रथमाह्निकस्य नवानां द्रव्याणां लक्षणमर्थः तत्र पृथिव्यप्ते
जसां लक्षणप्रकरणं वायुसिद्धिप्रकरणं ईश्वरप्रकरणं
आकाशानुमानप्रकरणं तत्र प्रथमोद्दिष्टायाः पृथिव्या लक्ष
णमाह रूपरसगंधस्पर्शवती पृथिवी रूपं नीलपीताद्य
नेकप्रकारकं पृथिव्याः तथाचानीलरूपसमानाधिकरण
द्रव्यत्वव्याप्यजातिमत्वं लक्षणं एवं पीतादिपदप्रक्षेपेण लक्ष
णान्यूह्यानि रसोपि कटुम्लवणादिरनेकप्रकारकः पृथिव्या

मेव तथाकटुरससमानाधिकरणद्रव्यत्वव्याप्यजातिमत्वं लक्ष
णं एवंकषायादिषट्प्रक्षेपेण लक्षणान्यूहनीयानि गंधोद्वि
विधः सुरभिरसुरभिश्च तथाचगंधसमानाधिकरणद्रव्यत्व
व्याप्यजातिमत्वं लक्षणं तथागंधसमानाधिकरणगंधासमाना
धिकरणगुणासमानाधिकरणजात्यधिकरणत्वंस्पष्टं नच
पाषाणादौगंधरसयोरननुभवात्तत्राव्यापकमिदमुभयमपीति
वाच्यं तत्रापितत्तोगंधरसयोरननुभवेपितद्दीयभस्मसुतदुभयो
पलंभाद्य एवावयवाः पाषाणारंभकास्तएवतद्भस्मारंभका अपीति
नाव्याप्तिः कथंतर्हि सुरभिः समीरणस्तिक्तंकारवेल्लजलमिति
प्रतीतिरितिचेन्न पार्थिवौपाधिकत्वात्तयोः तयोर्गंधरसयोः स्प
र्शोप्यनुष्णाशीतःपाकजः पृथिव्यामेव तथाचपाकजस्पर्शस
मानाधिकरणाद्रव्यत्वव्याप्यजातिमत्वं लक्षणं पाकजत्वंच
विशेषांतरव्यंग्यपृथिवीस्पर्श एवविशेषांतरंचकार्पासतूलस्पर्शा
दौदिवाससि सुखासकादौच शिरीषलवंगीकुसुमादौचस्पर्शवि
शेषेस्फुटतरं नत्वेवंजलादिस्पर्शेषुध्वप्यवयविनिपाकाद्गनिसं
योगात्स्पर्शोनवृषोनजायंतेतथापितत्परप्रभवतयातत्रापिविशेषोजा
त्यविशेषोनुसरणीयः ननुलक्षणमिदंव्यतिरेकिलिंगमितरभेदसाधकं व्यवहारसाधकंवा तत्रपृथिवीतरेभ्योभिद्य
तेगंधवत्वात्यन्नेतरभिन्नंनतद्गंधवत् यथाजलादि इतरभे
दभावव्याप्याभावप्रतियोगिगंधवतीचेयंतस्मादितरभिन्नात
न्नेतरभेदस्यसाध्यस्याप्रसिद्धेस्ततोहेतोर्व्यतिरेकेसपक्षविपक्ष
व्यावृत्ततयाऽसाधारण्यंअव्यतिरेकेचान्वयित्वं अप्रसिद्धेः

त्यर

चाप्रसिद्धविशेषणः पक्षः तथाचनसंदेहोन सिसाधयिषा
नवातद्विशिष्टज्ञानरूपानुमितिः किंच व्यतिरेकयोर्व्याप्तिस्त
थाचनव्याप्तस्यपक्षधर्म्मत्वं पक्षधर्मस्यचनव्याप्तिरितिवैष
म्यं अतएवोपनयवैयर्थ्यमपि व्याप्तत्वमुपनीयते नत्वग
हीतव्याप्तिकमपि तदुक्तं साध्याप्रसिद्धिर्वैषम्यं व्यर्थतोपनय
स्यच अन्वयेनैवसिद्धिश्चव्यतिरेकिणिदूषणमिति एवंव्य
वहारसाध्यकेपि तत्रयद्यपिव्यवहारश्चपृथिवीपदवाच्य
त्वं तच्चपृथिवीत्वजातावप्यस्ति पृथिवीत्वं हेतुर्नास्तीत्यसा
धारण्यं तथापिपृथिवीत्वप्रवृत्तिनिमित्तकपृथिवीपदवाच्य
त्वंसाध्यमितिनासाधारण्यं यद्वापृथिवीत्वंकाचित्कपदप्रवृ
त्तिनिमित्तंजातित्वात् घटत्ववदितिसामान्यतः सिद्धेपृथिवीप
दं पृथिवीत्वप्रवृत्तिनिमित्तकं जातित्वात् घटत्ववदितिसामान्य
तः सिद्धेपृथिवीपदं पृथिवीत्वप्रवृत्तिनिमित्तकंइतराप्रवृत्ति
निमित्तत्वेसतिसप्रवृत्तिनिमित्तकत्वात् यन्नैवंतन्नैवमितिसा
ध्यं तथाचात्रापिसाध्यप्रसिद्धिरेवेतिचेत् मैवं इतरेषांज
लादीनांभेदस्यघटप्रवप्रसिद्धेः वाय्वादेरतीन्द्रियस्यापिभे
दस्यान्योन्याभावस्यघटादौप्रत्यक्षतएवसिद्धत्वात् अन्यो
न्याभावग्रहेऽधिकरणयोग्यतामात्रस्यतंत्रत्वात् स्तंभःपि
शाचोनेत्यादौतथादर्शनात् नचैवंघटएवतर्हिदृष्टा
न्तोस्तु किंव्यतिरेकिणा ऋजुमार्गेणसिद्धौतंकोहिवक्रेणसाध
येदितिवाच्यं व्यतिरेकिलिंगेदूषणाभासंतदायमपिमार्गो
वक्रत्वंप्रतिभासतएव साध्याप्रसिद्धेर्निरासेतन्मूलकदोषा

णां निरस्तत्वाद्व्यतिरेकसहचारेणान्वयव्याप्तेरेवग्रहात् व्यति
रेकव्याप्त्याऽन्वयव्याप्तेरनुमानाद्ग्रहे नवैषम्यं नचोपनयवै
यर्थ्यं गृहीतव्याप्तेरेवहेतोः पक्षउपसंहारात् तदुक्तं निय
म्यत्वनियंतृत्वेभावयोर्याद्दृशीमते तेएवविपरीतेतुविज्ञेयेत
दभावयोरिति अवहारस्तुगंधवतीपृथिवीत्युपदेशादेव
यथार्कवुभ्रीवौवान्युपदवाच्यइतितथापिकुत्रचिदेव घृता
दौमृदाद्योगंधवत्वेनोपलक्षणेनपृथिवीव्यवहृतिनिमित्तकत्वे
नोपदेशाद्गृहीतं गंधवत्त्वं पृथिवीत्वेनपृथिवीपदवाच्यं
गंधवत्त्वाद्यन्नैवतन्नैवमितिव्यतिरेकीतस्याप्यवतरस्येव न
नुभेदसाध्यकव्यतिरेकिणि भेदोवैधर्म्यंस्वरूपभेदोवा न्या
न्याभावोवा नतावदाद्यो भ्रमपक्षतएवतद्वगमात् नतृती
यः अभावभेदस्यापिसाध्यत्वेनतदन्योन्याभावस्यापितत्रा
भावात् तेनसहस्वरूपभेदेसाध्येसाध्याननुगमादितिचेत् न
अभावप्रतियोगिकान्योन्याभावस्यापिसाध्यत्वात् सचघति
रिक्तस्तदास्वावानवेस्वरूपमादायेतत्पर्यवसानात् वक्ष
मानेभिन्नएव तहेधर्म्यस्यतदन्योन्याभावव्याप्यत्वात् नचानवस्था
पावन्येवानुभवस्वाव स्ववविश्रामात् अन्यत्रवननुभावनेव
विश्रामात् पत्नु त्रयोदशान्योन्याभावास्त्रयोदशसुप्रसिद्धाः
मिलिताः पृथिव्यांसाध्यंतइति तत्तुबन्ध्र स्यकप्रसिद्धेरतंत्र
त्वात् मिलितप्रसिद्धेरभावात् किंतुनिर्गंधत्वावच्छिन्नप्रतियो
गिकएक एवान्योन्याभावः साध्यतेप्रतियोगितावच्छे
दकभेदेनाभावभेदस्यावश्यकत्वात् सचघटादावेवप्रपक्ष
के

सिद्धश्चास्तुक्तत्वात् आकाशाद्यौकागतिरितिचेत् आकाश
मितरभिन्नं शब्दाश्रयत्वात् यन्नैवं-तन्नैव मिथ्यादौ यद्यपिय
क्षैक देशेन साध्यं प्रसिद्धं तथापि पक्षाद्धि धर्म्यवत्त त्प्रतियो
गिकान्योन्याभाववदिति सामान्येन व्याप्तिबलेन शब्दाश्रयत्वा
भाववत्प्रतियोगिकान्योन्याभावस्य पूर्वमेव सिद्धौ केवलं पक्ष
निष्ठतयेदानीं बोध्यते वह्निरिव पर्वतनिष्ठतयेत्यस्मत्सिद्धा
न्तात् तद्धि धर्म्यस्य तदन्योन्याभावव्याप्यत्वात् शब्दाश्रयत्वात्य
ताभाववत्त्वमात्र विपक्षेन गृहीतं गृहीमिति चेत् तत्र शब्दाश्रय
त्वस्य लक्षणत्वं न त्वालिंगत्वं विपक्षगामित्वशंका प्रसक्तत्वादि
ति- पृथिव्यनंतरमुद्दिष्टानामपां लक्षणमाह रूपरसस्प
र्शवत्य आपो द्रवाः स्निग्धाश्च शुक्लमधुरशीता एव रूपर
सस्पर्शाः द्रवत्वं च सांसिद्धिकं स्नेहस्तु स्वरूपतः ननु शुक्ल
मेव रूपमपामित्युक्तं कालिंदीजलादौ नैल्यस्यैवोपलंभा
त् मधुर एव रस इत्यप्ययुक्तं जंबीरकरवीररसादौ तैक्त्या प्राम्ल्य
स्यैवोपलंभात् शीत एव स्पर्श इत्यप्यनुपपन्नं मध्यंदिने
औष्ण्यस्यैवोपलंभात् सांसिद्धिकं च द्रवत्वमव्यापकं हिमक
रकादावभावात् स्नेहस्तु स्वरूपासिद्धोऽतिव्यापकश्च जले
ऽननुभवात् घृतादौ पार्थिवे अनुभवाच्च न च जलत्वं जाति
र्वा जललक्षणं व्यावर्त्तकाभावेन तदनुपपत्तेः न च स्नेहस
मवायिकारणतावच्छेदकत्वेन तत्सिद्धिः स्नेहत्वस्य कार्याकार्य
वृत्तितया कार्यतानवच्छेदकत्वात् ततो भेदकाभावाज्जलं न भि
द्यते इति चेत् अभास्वरशुक्लमात्ररूपस्यैव तद्भेदकत्वात् का

लिंदीजलादौनैल्यस्याश्रयोपाधिकत्वात् वियद्विकीर्णेकालिं
दीजलेधावल्यस्योपलंभात् तेनशुक्लेतररूपासमानाधिक प्रभास्वर
रणद्रव्यत्वसाक्षाद्व्याप्यजातिमत्त्वमपांलक्षणं रसोपिमधुरए
व जंबीरकरवीररसादौसतैक्ष्ण्यस्यपार्थिवोपाधिकत्वात् ग्राह्य
जलेमाधुर्य्यनानुभूयतएवेतिचेत् न कषायद्रव्यभक्ष।
णानंतरंतदभिव्यक्तेः नचहरीतक्याएवतन्माधुर्यंजलाभि
व्यंग्यंतत्रकषायरसस्यैवोपलंभात् हरीतक्यांचामलक्यामि
व कषायएवरसः तस्यैवानुभवात् नचगुणविरोधेनत
त्ररसानारंभः अवयवानामपितत्रकषायरसत्वात् षड्रसत्व
प्रवादस्तुतत्तद्रसकार्यत्वनिबंधनः चित्ररसस्तुप्रमाणाभावादेव कारित्व
निरस्तः चित्ररूपेतुपटोपलंभएवप्रमाणं सुरभ्यसुरभ्यवय
वारंभकस्तुगुणविरोधनिरस्तएव चित्रगंधेप्रमाणाभावात् तस्मा
द्धरीतकीभक्षणानंतरंयन्माधुर्यमनुभूयते तज्जलस्यैव उ
ल्वणतातुद्रव्यविशेषसन्निधानाधीना श्रीखंडसन्नियोगाज्जले
शैत्योल्बणतेव कर्कटीभक्षणानंतरंतुतिक्ततायाऽनुभूयते
साकर्कट्याएव तदवयवेजलपानमंतरेणापितिक्ततोपलंभा
त् रसनाग्रवर्त्तिपित्तद्रव्यतिक्ततायाएवतत्रानुभवात् तथाच
ममधुरेतररसासमानाधिकरणरससमानाधिकरणद्रव्यत्वसा
क्षाद्व्याप्यजातिमत्त्वमपांलक्षणं एवंशीतस्पर्शसमानाधि
करणद्रव्यत्वव्याप्यजातिमत्त्वमपांलक्षणं मध्यंदिनेतुयदौ
ष्ण्यंतत्तेजःसंबंधात् तदन्वयव्यतिरेकाधीनत्वात्तथोपगमा
त् एवंसांसिद्धिकद्रवत्वंस्वरूपतएवलक्षणं सांसिद्धिक

वै० सू० वृ०

२९

२।

द्रवत्ववद्वृत्तिजातिमत्त्वं जलत्वं स्नेहस्तु गुणविशेषो ननु दुग्ध
त्ववत् दधित्वव सामान्यविशेषः स्निग्धस्निग्धतरस्निग्ध
तमेतितारतम्यप्रतीतेश्च न च जातौ तारतम्यं संभवति भवतु
स्नेहो गुणः स तु जलेव वर्त्तत इत्यत्र किं प्रमाणमिति चेत् न
सक्तुसिकतादौ जलेन संग्रहे तदनुमानात् संग्रहो हि द्रव स्नेह
त्वकारितः संयोगविशेषः स हि न द्रवमात्राधीनः काच
कांचनद्रवत्वेन संग्रहानुपपत्तेः नापि स्नेहमात्रकारितः
स्त्यानैर्घृतादिभिः संग्रहानुपपत्तेः तस्मादन्वयव्यतिरेका
भ्यां स्नेहद्रवत्वकारितः स च जलेनापि सक्तुसिकतादौ दृश्य
मानः स्नेहं द्रढयति इयं च प्रत्यक्षोपष्टंभिकैव युक्तिः स्नेह
स्य प्रत्यक्षत्वात् घृतादौ तु स्नेहस्तु उपष्टंभकजलनिष्ठः सं
युक्तसमवायेन तु तद्गततया भानात् एवं तैलरसादिष्वपि
उपष्टंभकं तु चातिशयितस्नेहमेव जलं स्नेहाधिक्यादेव
तस्य जलस्य नानलविरोधित्वं यदि पृथिवीविशेषगुणः स्ने
हः स्यात् सर्वपार्थिववृत्तिः स्याद्गंधवत् जलत्वं च द्रव्यत्वसाक्षा
द्व्याप्यजातिः स्नेहवन्मात्रवृत्तिसंयोगासमवायिकारणताव
या जातिपरमाणुसा च्छेदिका अनित्यस्नेहत्वसमवायिकारणतावच्छेदकतया
धारण्येन सिद्धत्वात् जलावयविषु सिद्धं जलपरमाणुः स्वीयाश्रयवृत्तिद्रव्यत्वसा
क्षाद्व्याप्यजातिमान् परमाणुत्वात् पार्थिवपरमाणुवत् त
त्र गंधसमवायिकारणतावच्छेदकजातेः परमाणुसाधारण्ये
न सिद्धत्वात् उद्देशक्रमानुरोधेन तेजोलक्षणमाह तेजो रू
पस्पर्शवत् रूपं भास्वरं स्पर्शश्चोष्णस्तद्वत्तेज इत्यर्थः ननु भा

स्वत्वं परप्रकाशकत्वं तादृशं चरूपं नोष्मणि नवाचामीकरस्थे
भर्जनकपालस्थे वारिस्थे वा तेजसि शुक्लं चरूपमुक्तं पुनः क्वापि
उष्णस्पर्शस्य शीनचंद्रेन वाचामीकरे तत्कथमेतदिति चेन्न न
भास्वररूपानुमानात्
ऊष्मादौ तेजस्त्वेनोष्णस्पर्शानुमानात् तेजस्त्वमेव तत्र स्वरूपा
सिद्धमिति चेन्न न उष्णस्पर्शावच्चेन तदनुमानं चामीकरे क
थमिति चेन्न तत्र भास्वररूपाभावेपि अत्यंतानलसंयोगेनुच्छि
द्यमानद्रवत्वाधिकरणत्वेन व्यतिरेकिणा तेजस्त्वानुमानादिति व
क्ष्माणत्वात् भर्जनकपालनिष्ठे चोष्णस्पर्शवत्त्वेन तेजस्त्वानुमा
नात् चतुर्विधं हि तेजः किंचिदुद्भूतरूपस्पर्शं यथा सौ सैन्धवं
रादि किंचिदुद्भूतरूपमनुद्भूतस्पर्शं यथा चांद्रं किंचिदनुद्भूतरूप
स्पर्शं यथा नायनं किंचिदनुद्भूतरूपमुद्भूतस्पर्शं यथा मेदस्विलेदा दाघं
र्थकं नैदाघं वारि भर्जनकपालादिगतं तेजः नायनमग्रे साध
यिष्यते क्रमप्राप्तं वायुलक्षणमाह स्पर्शवान्वायुः रूपास
मानाधिकरणस्पर्शसमानाधिकरणजातिमत्त्वं रसासमाना
धिकरणानुष्णाशीतस्पर्शसमानाधिकरणजातिमत्त्वं गंधास
मानाधिकरणानुष्णाशीतस्पर्शसमानाधिकरणजातिमत्त्वं स्प
र्शेतरविशेषगुणासमानाधिकरणविशेषगुणसमानाधिक
रणजातिमत्त्वं वा वायुलक्षणं नन्वाकाशकालदिगात्मना
मपि रूपादिमत्त्वं कथं न लक्षणमत आह तु आकाशेन विद्यंते
अत्रापि विदिरूपलब्धिवचनः नोपलभ्यंते यतोऽतो नैते रूपा
द यानियोगते समुच्चयतो विकल्पतो वा वर्तंते नभः प्रभृति
षु द्रव्येष्वित्यर्थः ननु दधि धवलमाकाशमिति कथं प्रती

वै० सू०वृ० २२ 22

निरिति न मिहिरमहसां विम्बारूणामुपलंभात्तथाभिमाना
त् कथंतर्हि नीलं नभइति प्रतीतिरिति चेत् सुमेरोर्द्दक्षिणां
दिशमाक्रम्यास्थितस्येंद्रनीलमयशिखरस्यप्रभामालोकय
तां तथाभिमानात् यद्वादूरंगच्छच्चक्षुः परावर्त्तमानंस्वचक्षु
:कनीनिकामाकलयत्तथाभिमानंजानयतीतिमतंतयुक्तं
पिंगसारनयनानामपि तथाभिमानात् इहेदानींरूपादिक
मितिदिक्कालयोरपिरूपादिस्वत्तुर्धकत्वलिंगमितिचेत् न सम
वायेन पृथिव्यादीनां तल्लक्षणाच्चस्योक्तत्वात् ननुसंबंधांत
रेणापि इहेदानींरूपाद्यस्तीताभावइतिचपिप्रतीतेः सर्वा
धारतैवदिक्कालयोः नन्वयांद्रवत्वंलक्षणमुक्तं तदयुक्तं
पृथिव्यामपिद्रवत्वोपलंभादित्यतआह सर्पिर्जतुमधूच्छिष्टा
नामग्निसंयोगात्द्रवताद्भिःसामान्यं सर्पिरादीनांयत्द्रव
त्वमस्ति तदग्निसंयोगान्निमित्तात् ननुसांसिद्धिकं तादृशं
चोपांलक्षणं द्रवत्वत्वमात्रंतुपृथिव्याअद्भिःसामान्यंननुसां
सिकद्रवत्वमपीति नाव्याप्तिरित्यर्थः ननुतथापित्रपुसीसलो
हादौतेजसिगतत्वेनतद्वत्स्थेत्वातिव्याप्तिरित्यतआह त्रपुसी
सलोहरजतसुवर्णानामग्निसंयोगात्द्रवताद्भिःसामान्यं
उपलक्षणंचैतत् कांस्यताम्रारेकूटपारदादीनामुपसंग्रहः
शक्यलक्ष्याधारणंचार्यंताग्निसंयोगानुच्छिद्यमानद्रव
त्वाधिकरणत्वमेववस्तु तथाचसुवर्णादीनामपिद्रवत्वंनैमि
त्तिकमेव निमित्तस्याग्निसंयोगस्यान्वयव्यतिरेकसिद्धत्वा
त्परंतुपूर्वेस्तत्रैःग्निपरमोष्मापकर्षवत्तेजःपरमिहतुवह्नि

प्रत्ययात्

परमितिविशेषः ननुहिरण्यादीनामपिपार्थिवत्वमेवद्रव्यांत
रत्वंपी पीतिमगुरुत्वादेः पार्थिवत्वव्यवस्थापकत्वात् द्रवत्वा
नुच्छेदस्यपृथिवीत्वे धर्म्मस्याप्यनुभवात् द्रव्यांतरत्वव्यवस्थाप
कत्वादितिचेत् न सुवर्णतैजसमत्यंताग्निसंयोगेप्यनुच्छिद्यमा
नद्रवत्वाधिकरणत्वात् यन्नैवंत ऐवंमितिव्यतिरेकिणाएव
तैजसत्वसिद्धेः नचजलपरमाणु विरुद्धता द्रवत्वस्यानित्यत्वे
नविशेषणाद्व्यत्वात् नचप्रदीपादेः सपक्षाद्धेतोर्व्यावृत्तेरसाधा
रण्यं सुसुवर्णेनपार्थिवमितिसाध्यार्थत्वात् नचात्यगुरुत्वाश्रयस्य
पक्षत्वेबाधः तदतिरिक्तस्यपक्षत्वेवाश्रयासिद्धिः द्रवत्वाधि
करणत्वेनपक्षत्वात् नचात्यंतिकत्वंदुर्वचं प्रहरपर्यंतमग्नि
संयोगेप्यनुच्छिद्यमानद्रवत्वाधिकरणत्वादितिविवक्षितत्वात्
नचद्रुततरद्रुततमादिप्रत्ययादाश्रयनाशाद्द्रवत्वनाशोप्य
वश्यवाच्यइतिवाच्यं समानाधिकरणद्रवत्वसामग्र्यासमवहि
ध्वं तान्गिसंयोगजन्यध्वंसप्रतियोग्यवृत्तिद्रवत्वसामान्यवद्द्रवत्ववत्वा
दितिहेत्वर्थात् यद्वापीतिमगुरुत्वाश्रयःपीतरूपभिन्नरूपो
त्पत्तिप्रतिबंधकद्रव्यसंयुक्तः प्रहरपर्य्यंतानलसंयोगेपि
पीतरूपभिन्नरूपानाश्रयत्वात् अनलसंयुक्तजलमध्या
स्थितपीतपटवत् ननुचांधकारेसुवर्णरूपग्रहापत्तिः तदी
नीतद्रूपस्याभिभवाप्रभावात् बलवत्सजातीयग्रहणकृतस्या
ग्रहणस्याभिभवत्वादितिचेत् तत्रफलबलेनबलेनबल
वत्संबंधमात्रस्यैवाभिभवपदार्थत्वात् तदुक्तं भूसंसर्गवशा
द्वास्यरूपंनैवप्रकाशतइतिदिक् एवंस्पर्शवत्द्रव्यत्व

क्लक्षणप्रकरणं समाप्य वायोर्लक्षणमाश्रयासिद्धमेवेतिन
न्यपरिजिहीर्षया वाय्वाद्यादावनुमानं प्रमाणमुपन्यसिष्यन् अनुमा
नस्यैव प्रथमं दृष्टान्तानुसारेण प्रतिपाद्य वायुसाधारणप्रकर
णमारभते विषाणी ककुद्मान्प्रान्तेबालधिः सास्नावानिति
गोत्वे दृष्टं लिंगं यथैषां गोत्वं प्रति विषाणादीनि लिंगानि सक
ललोकसिद्धानि गृहीतव्याप्तिकानि । तथातीन्द्रियवाय्वादिद्रव्य
पंचकलिंगान्यपि सामान्यतोदृष्टानि प्रमाणभावमासादयं
तीति भावः अत्र यद्यपि विषाणित्वमात्रं न गोत्वे लिंगं महि
षादौ व्यभिचारात् न च सास्नादिमत्त्वविशेषणं तत् विशेष्यस्यै
व सामर्थ्यात् तथापि गोविषाणे महिषमेषादिविषाणापे
क्षया वैलक्षण्यमाकलयतां धूमरवत्तद्विशेषं लिंगमभावमोर
यस्यैव विषाणे ह्यपित्र्यस्त्वक्कत्वकठिनत्वसुकुमारत्वह्रस्वत्वदी
र्घत्वादयस्ते ते विशेषा निपुणतरवेद्याः सन्त्येव तथा च व्यव
हितविप्रकृष्टगोपिंडे अयं गौः विषाणविशेषवत्त्वात् पूर्वा
नुभूतगोपिंडवदित्यनुमानमप्रत्यूहमेव एवं ककुद्मत्त्वादपि लिं
गं गोत्वे प्रान्तेबालधिमत्त्वमपि स्वतन्त्रमेव लिंगं गोत्वे । प्रान्तेबाला
आधीयन्ते स्मिन्निति प्रान्तेबालधिः पुच्छरूपांगविशेषः अलुकु
समासात्कोमरण्येवान्ते बालधिशब्देनोच्यते न हि यथा गोः पुच्छप्रा
न्ते बालधिर्वं तथा अश्वमेषवत्सादिपुच्छेषु तेषां सामस्त्येन वा
लमयत्वात् महिषादिपुच्छादौ तु तादृशप्रलंबता नास्त्येवं
स्तीति वैलक्षण्यात्प्रान्तेबालधित्वमपि गोत्वे लिंगमनुमेयाद्गो
पिंड उच्यते तथा च अयं गौः प्रान्तेबालधिमत्त्वात् पूर्वानुभू

तगोपिंडवदितिसास्नावत्त्वानुप्रसिद्धेर्वलिंगं· एवंसकललोकया
त्रावाहिनोऽनुमानस्यदृष्टांतानुसारेणप्रामाण्यमभिधायवा
युसाधनप्रकरणमारभमाणआह स्पर्शश्च वायोर्लिंग
मितिशेषः चकाराच्छब्दधृतिकंपाःसमुच्चीयंते ननूपल
भ्यमानःस्पर्शःपृथिव्याएवानुद्भूतरूपायाःस्यादितिचेत् न
उद्भूतस्पर्शपृथिवीस्पर्शस्योद्भूतरूपनांतरीयकत्वात् तथाच
योऽयंस्पर्शोऽनुभूयतेसक्वचिदाश्रितःस्पर्शत्वात्पृथिव्या
दिस्पर्शवदितिसामान्यतोदृष्टेनस्पर्शाश्रयसिद्धौसस्पर्शाश्र
योनपृथिव्यादित्रयात्मकः नीरूपत्वात् नाकाशादिपंचात्म
कः स्पर्शवत्त्वादितीतरबाधसहकृतेनाष्टद्रव्यत्वाश्रयत्वसि द्रव्यातिरिक्त
द्धिः एवंशब्दविशेषोपिवायोर्लिंगं तथाहि असतिरूपवत्
द्रव्याभिघातेयोयंपर्णादिषुशब्दसंतानःसस्पर्शवद्वेगवद्द्रव्या
भिघातनिमित्तकः अविभज्यमानावयवद्रव्यसंबंधिशब्द
संतानत्वात्दंडाभिघातजभेरीशब्दसंतानवत् रूपवद्द्रव्याभि
घातव्यतिरेकस्तुयोग्यानुपलब्धिगम्यः तत्रस्पर्शवद्वेगवद्द्र
व्यमष्टद्रव्यातिरिक्तमेवपरिशेषात् एवंधृतिविशेषोपि
वायोर्लिंगं तथाहितृणतूलस्तनयित्नुविमानानांनाभसि
धृतिःस्पर्शवद्वेगवद्द्रव्यसंयोगजाचेतनानधिष्ठितद्रव्यध
तित्वात् प्रवाहेतृणकाष्ठनौकादिधृतिवत् अभिध्यानकृत
विषादिधृतौवाऽस्मदाद्यधिष्ठानमेव एवंपक्षिकांडादिधृता
वपि· नचेश्वराधिष्ठितत्वेनहेतुविशेषणासिद्धिः चेतनपदेनत
दितरस्यविवक्षितत्वात् एवंकंपोपिवायुसत्त्वे तथाहि इदं

वै० सू० वृ० रूपवद्द्रव्याभिघातमन्तरेण तृणादौ कर्म्म स्पर्शवद्वेगवद्द्रव्या
२५
25
भिघातजं गुरुत्वप्रयत्नवदात्मसंयोगाजन्यकर्म्मत्वात् नदीपू
राहतवेतसवनकर्म्मवत् गुरुत्वपदेनादृष्टवदात्मसंयो
गद्रवत्वसंस्काराणामुपग्रहः तेन तदजन्यकंपत्वं हेतुः न
नु प्रत्यक्ष एव वायुः किमत्र लिंगगवेषणयेति चेत् न वा
युर्न प्रत्यक्षः नीरूपबहिर्द्रव्यत्वात् गगनवदित्यनुमानेन्द्रिय
स्यैव सिद्धेः नच वायुः प्रत्यक्षः प्रत्यक्षस्पर्शाश्रयत्वात् घटादिवत्
ति प्रत्यक्षानुमानमिति चेत् न उद्भूतरूपवत्त्वस्यात्रोपाधि
त्वात् रूपादावात्मनि च साध्याव्यापकमेतत् पक्षधर्मबहिर्द्रव्य
त्वावच्छिन्नस्य साधनधर्मावच्छिन्नस्य वा साध्यस्य व्यापकत्वात्
न च चाक्षुषप्रत्यक्षत्वे तन्त्रं तत्रैव तदन्वयव्यतिरेकात् स्पा
र्शनप्रत्यक्षे तु योग्यस्पर्शवत्तामात्रस्यैव तन्त्रत्वादिति वाच्यं
रूपान्वयव्यतिरेकयोरुभयत्रापि तन्त्रत्वात् नह्युभयसिद्धा
स्पार्शनैकप्रत्यक्षता रूपोपग्रहमन्तरेण दृष्टा किंच यदि
वायुः प्रत्यक्षः स्यात् संख्यादिसामान्यगुणोपलंभोऽपि तत्र
स्यात् नन्वस्त्येव पूत्कारादौ संख्यायाः परिमाणस्य च हल
वित्तस्यादेरुभयपार्श्ववर्त्तिनोर्वाय्वोः पृथक्त्वस्य च परत्वापरत्व
योश्च प्रत्यक्षता वायुजातीयस्य व्यक्तिपरतयानुमतत्वा
पि नियमः पृष्ठलग्नवस्त्रादौ तदनुपलंभादिति चेत् न
व्यक्तिपरतयैव नियमात् पृष्ठलग्नवस्त्रादौ चार्जवावस्था
ने संख्यादीनां ग्रहणात् अनार्जवावस्थितत्वदोषात्तु
त्तदग्रहणं उद्भूतरूपवत्त्वमुद्भूतस्पर्शवत्त्वं द्वयमपि बहि

द्रव्यप्रत्यक्षत्वे तंत्रं प्रभायान्नयनगतपीतद्रव्यस्य च द्रमहस्त्व।
स्पर्शानुभवादप्रत्यक्षत्वं निरासः। अणयो विशेषकावयवाघट
व्यादीनां च रूपानुद्भवादप्रत्यक्षत्वमिति न्यायवार्त्तिकटीकाकृ
तः स्पर्शानुद्भवेपि त्रसरेण्वादीनां प्रत्यक्षतैवातएव चंद्रालोके नभ
सि पक्षिकांडादिसंयोगविभागयोः प्रत्यक्षतेति संप्रदायविदः
ननु चोद्भूतस्पर्शवत्त्वमेव सामान्यतो बहिर्द्रव्यप्रत्यक्षताप्रयो
जकमिति वाच्यं इंद्रनीलप्रभाया अप्रत्यक्षत्वापत्तेः नचोद्भू
तविशेषगुणवत्त्वमेव तंत्रं आकाशस्यापि प्रत्यक्षत्वापत्तेः न
चन्यमहत्त्वसमानाधिकरणोद्भूतविशेषगुणवत्त्वं तंत्रं रस
नाग्रवर्त्तिपित्तद्रव्यस्य तैक्ष्योद्भवेप्यप्रत्यक्षत्वात् तस्मादुद्भूत
रूपवत्त्वमेवात्मेतरद्रव्यप्रत्यक्षतायां तंत्रं वायोर्नास्तीत्यतो वायुः
ननु प्रत्यक्षतो दृष्टमिह लिंगं नास्ति नहि वह्निधूमयोरिवेह
प्रत्यक्षेण व्याप्तिग्रहः किं च पृथिव्याद्यन्यतमस्यैव स्पर्शोप्य
यं भविष्यतीत्यत आह नच दृष्टानां स्पर्श इत्यदृष्टलिंगो वा
युः अयं स्पर्शो यस्यैष पक्षः क्रियते स दृष्टानां पृथिव्यप्तेजसां
न भवति रूपासहचरत्वात् तथा चायं स्पर्शः क्वचिदाश्रित
इत्यनुमेयमित्यदृष्टलिंगो सामान्यतो दृष्टलिंगो वायुः प वायुः
क्षधर्मताबलायात इत्यर्थः यद्यपि दृष्टमेव स्पर्शादिचतुष्कं
लिंगमिति यापि वायुना सहागृहीतव्याप्तिकत्वाद् दृष्टलिंग
त्वमुक्तं न ह्ययं धर्मी वायुरिति प्रतिज्ञाय वायुः साधयितुं
शक्यते न या च सामान्यतो दृष्टादेवेतरबाधसहकृताद्वायुसि
द्धिरिति भावः उपलभ्यमानस्पर्शाश्रयमवयविनं साधयि

त्वापरमाणुलक्षणं वायुं साधयितुमाह अद्रव्यवत्त्वेन द्रव्यं
द्रव्यमाश्रयभूतं तस्यास्तीति द्रव्यवत् न द्रव्यवत् अद्रव्यवत्
द्रव्यानाश्रितमित्यर्थः तथा चाकाशवत्परमाणुलक्षणो
वायुर्द्रव्यं अन्येषां पदार्थानां द्रव्याश्रितत्वात् आश्रितत्वं चा
न्यत्र विषयद्रव्येभ्यः द्रव्यमिधानात् परमाणुभ्यां द्व्यणुकारंभा
त् द्व्यणुकादिप्रक्रमेणावयविनो महत आरंभस्योपपादनी
यत्वात् वायुपरमाणोर्द्रव्यत्वसाधकं हेतुद्वयं समुच्चिन्वन्ना
ह- क्रियावत्त्वाद्गुणवत्त्वाच्च वायुपरमाणुर्द्रव्यमिति विशेषः
यद्यपि द्रव्यत्वे सिद्धे क्रियावत्त्वं च गुणवत्त्वं च सिध्यति तत्सिद्धौ
च द्रव्यत्वसिद्धिरित्यन्योन्याश्रयः तथाप्युपलभ्यमानस्पर्शा
श्रयस्यावयविनो मूलभूतस्य परमाणोरसमवायिकारणसं
योगान्यथानुपपत्त्या क्रियावत्त्वं अवयविरूपस्पर्शादेश्च का
रणपूर्वकत्वनियमाद्गुणवत्त्वं च सिद्धं ताभ्यां द्रव्यत्वमिति परो
षः तत्र क्रियावत्त्वं सपक्षैकदेशवृत्ति गुणवत्त्वं च सपक्षव्याप
कत्वं चकारात्समवायिकारणत्वं द्रव्यत्वसाधकं समुच्चिनो
ति ननु परमाणावेव न प्रमाणं कस्य द्रव्यत्वं साध्यत इ
ति चेत् न स्थूलकार्यस्य क्रियाविभागादिन्यायेन भज्यमा
नस्याल्पतरतमादिभावा यतो नाल्पीयः स एव परमाणुः न
अवयवावयविप्रसंगस्यानवधित्वेऽनंतावयवारब्धत्वाविशेषेण
मेरुसर्षपादीनां परिमाणाविशेषापत्तिः कारणसंख्यावि
शेषमंतरेणापरिमाणप्रचययोरपि परिमाणभेदं प्रत्यतंत्र
त्वात् नाशविनाशावधिरेवायमवयवावयविप्रसंग अं

त्यस्य निरवयवत्वेन विनाशानुपपत्तेः सावयवत्वे तु निरवधि
त्वोपत्तेस्तत्र च दोषस्योक्तत्वात् ननु त्रुटिरेवावधिर्दृश्यमान
त्वाद् दृश्यकल्पनायां प्रमाणाभावादिति चेन् न तस्याश्चाक्षु
षद्रव्यतया महत्त्वानेकद्रव्यवत्त्वयोरावश्यकत्वात् तस्मात्तस्या
स्त्रसरेण्ववयवावयव एव परमाणुर्यथा पृथिव्यादौ तथा वा
यावपीति सिद्धो वायुपरमाणुः ननु क्रियावत्त्वाद्गुणवत्त्वाद्वा
घटादिवत्परमाणोरनित्यत्वमनुमेयमित्यत आह अद्र
व्यवत्त्वेन नित्यत्वमुक्तं परमाणुलक्षणवायोरिति शेषः द्र
व्यं हि समवायिकारणासमवायिकारणयोरन्यतरनाशा
न्नश्यति परमाणोस्तु निरवयवतया नैतदुभयमस्ति तथा
च विनाशकाभावान्न विनश्यति क्रियावत्त्वे गुणवत्त्वे च हे
तौ सावयवत्वमुपाधिः स च पक्षधर्मे द्रव्यत्वावच्छिन्नसाध्य
व्यापकः केवलसाध्यव्यापकस्तु प्रागभावप्रतियोगित्वमुपा
धिः द्व्यणुकादिप्रक्रमेणारंभसिद्धौ सिद्धौ सिद्धमपि वायु
नानात्वं प्रकारान्तरेणापि साधयितुमाह वायोर्वायुसंमूर्छ
नं नानात्वे लिंगं वायुसंमूर्छनमिति वायोर्वायूनां वा सं
मूर्छनं संमूर्छनं च संयोगविशेषः स च समानजवयोर्वि
रुद्धदिक्क्रिययोः सन्निपातः स च तृणतूलकादेरूर्ध्वग
मनेनानुमीयते वायोरूर्ध्वगमनस्य सन्निपातस्य वाती
न्द्रियत्वात् तृणादीनां तु प्रत्यक्षाणामूर्ध्वगमनलक्षणा
याः क्रियायाः प्रत्यक्षायाः स्पर्शवद्वेगवद्द्रव्याभिघातनो
दनान्यतरजन्यत्वमनुमीयते तथाहि निर्यग्गमनवायोरू

र्ध्वगमनंपरस्परप्रतीघातमंतरेणानुपरस्परप्रतीघातंसाधय
ति नदीपयःपूरयोस्तथादर्शनात् ऊर्ध्वगमनंचतृणाद्यूर्ध्व
गमनानुमेयंनहितृणादीनामूर्ध्वगमनंस्पर्शवद्वेगवद्द्रव्या
भिघातनोदनान्यतरंविनेति ननुदृष्टलिंगोवायुरित्युक्तंत
थाचकथमेतदित्याह वायुसन्निकर्षेप्रत्यक्षाभावाद्दृष्टं
लिंगंनविद्यते दृष्टंलिंगंयत्रप्रत्यक्षेणव्याप्तिग्रहस्तदुच्य
ते यथाधूमोग्नेः प्रकृतेतुवायुसन्निकर्षेवायुनासहावि
नाभावोप्रत्यक्षंनास्तिनहिभवतियोयःस्पर्शःकंपादिर्वास भान्
सवायुरितिकस्यचित्प्रत्यक्षः वायोरेवाप्रत्यक्षत्वादतएता
दृशंलिंगंप्रत्यक्षगृहीतव्याप्तिकलिंगंनास्तीत्यर्थः तर्हिवा
योरनुमानमेवकथमित्यतआह मेवद्रढयितुमाह सा
मान्यतोदृष्टाच्चाविशेषः अनुमानंहित्रिधंपूर्ववशेषव
सामान्यतोदृष्टंचतथाचायमनुभूयमानाः स्पर्शः क्वचिदा
श्रितःस्पर्शत्वाद्गुणत्वाद्वेति सामान्यतोदृष्टादेवेतरबाधस
हकृतादष्टद्रव्यातिरिक्तद्रव्याश्रितत्वंसिद्ध्यतीत्यर्थः गतंत
र्हिकेवलव्यतिरेकिणेतिचेत् न इतरबाधानंतरंयत्र
सामान्यतोदृष्टंप्रवर्त्ततेतत्राष्टद्रव्यानाश्रितत्वंपक्षविशेषणं
सिद्धमादायाष्टद्रव्यानाश्रितत्वंपक्षविशेषणंस्पर्शःक्वचि
दाश्रितइतिप्रतिज्ञार्थोष्टद्रव्यातिरिक्तद्रव्यानश्रितत्वमना
दायनपर्य्यवस्यतीतिप्रतीत्यर्थोपर्यवसानात् याऽन्वयि
नएवतत्प्रसिद्धिः यत्रनुपूर्वमेवबाधावतारःसामान्यतोदृ
ष्टंतत्रप्रतीत्यर्थोपर्यवसानात् केवलव्यतिरेकीत्यभ्युपग

मात् प्रकारार्थे केवलव्यतिरेकीति उन्नुक्तमेव उक्तस्थले
प्रकारस्यान्वयिन एवोपस्थितेः व्यापकतावच्छेदकप्रकारि
कैवानुमितिरितिनियमस्त्वप्रामाणिकः सामग्रीविशेषसा
चिव्यात् प्रकारांतरभानस्यापिसंभवात् ननु चाविशेष इति
वायुरयमित्याकारेणानुमितिर्नभवतिकिंत्वष्टद्रव्यातिरिक्तद्रव्या
श्रितत्वेनैवप्रकारेणेतियदि विवक्षितंतदानस्यद्रव्यस्यद्रव्यस्य
वायुसंज्ञायांकिंप्रमाणमित्यत आह तस्मादागमिकं यस्माद्वि
शेषाकारेणनानुमितिस्तस्माद्वायुरितिनामागमिकं आगमोवे
दस्ततः सिद्धमित्यर्थः वायुर्वैक्षेपिष्ठादेवता· वायव्यंश्वेतमाल
भेतवायुश्चसर्वेवर्णोयंसर्वगंधवहः शुचिरित्यादिविधिशेषीभू
तार्थवादादेवसंज्ञागमोवेदस्ततः सिद्धमित्यर्थः वायुर्वैक्षेपिष्ठा
देवता· वायव्यंश्वेतमालभेतवायुश्चसर्ववर्णोयंसर्वगंधवहः शु
चिरित्यादिविधिशेषीभूतार्थवादादेवसंज्ञाधिगतिः यथायन्न
दुःखेनसंभिन्नंनचग्रस्तमनंतरंमित्याद्यर्थवादात्स्वर्गसंज्ञायाः
वसंतेसर्वसस्यानांजायतेपत्रशातनं मोदमानाश्चतिष्ठंति
वाः कणिशशालिनइत्यर्थवादाद्वसंतसंज्ञायाः वराहंगा
वोधावंतीत्यर्थवादाद्वसंज्ञायाः अन्यथास्वर्गकामोयजेते
त्यादौविशिष्टसुखानुपस्थितौयागादिषुस्वर्गार्थिनांप्रवृत्तिर्नस्या
त् नस्याद्वयवमयश्चरुर्भवति वैतसेकटेप्राजापत्यंचिनोति
वाराहीचोपानदित्यादौम्लेच्छप्रसिद्धिर्मास्थितौयागादिषुस्व
र्गार्थिनध्यवसायः म्लेच्छाहियववराहवेतसशब्दान्कंगु
वायसजंबुषुप्रयुंजते तयाचार्थवादमंतरेणसंदेहः स्या

वायु

त्वजो वेतसर
त्यर्थवादाद्वेतस
संज्ञायाः

धि

ध्यवसाय
...वसाय:

दित्यागमादेव तदर्थप्रतीतिरिति भावः नाममात्रमागमिकं
वायुसिद्धिस्तु सामान्यतो दृष्टादेव एवं वायुप्रकरणं समाप्य
तत्किं मुक्ताभिमतडित्थडवित्थादिसंज्ञायी यागमस्य सर्वज्ञप्रणी
तत्वमुपपादयन्नेवोद्द्योतिकमीश्वरप्रकरणमारिप्समान आ
ह संज्ञाकर्मत्वस्मद्विशिष्टानां लिंगं तुशब्दः स्पर्शादिलिंग
व्यवच्छेदार्थः संज्ञा नामकर्मकार्यं क्षित्यादि तदुभयमस्मद्विशि
ष्टानामीश्वरमहर्षीणां सत्वे लिंगं कथमेतदित्यत आह प्रत्य
क्षप्रवृत्तत्वात्संज्ञाकर्मणः अत्रापि संज्ञा च कर्म चेति समाहा
रद्वंद्वादेकवद्भावः संज्ञाकर्तुर्जगत्कर्तुश्चाभेदसूचनार्थः त
थाहि यस्य स्वर्गापूर्वादयः प्रत्यक्षाः स एव तत्र स्वर्गापूर्वादिसं
ज्ञां कर्तुमीष्टे प्रत्यक्षे चैत्रमैत्रादिपिंडे पित्रादेश्चैत्रमैत्रादिसंज्ञा
निवेशनवत् एवं च घटपटादिसंज्ञानिवेशनमपीश्वरसंके
ताधीनमेव यः शब्दो यत्रेश्वरेण संकेतितः स तत्र साधुः य
थाकश्चिद्दोषधिर्नकुलदंष्ट्रास्पृष्टा सा सर्वोपि सर्पो विषं हं
ती येत्तादृशी संज्ञा अस्मदादिविशिष्टानां लिंगमनुमापकं
यापि चैत्रादिसंज्ञा पित्रा पुत्रे क्रियते सापि द्वादशेऽह्नि पिता ना
म कुर्यादित्यादिविधिना नूनमीश्वरप्रयुक्तैव तथा च सिद्धं
संज्ञाया ईश्वरे लिंगत्वं एवं कर्मापि कार्यमपीश्वरे लिंगं त
थाहि क्षित्यादिकं सकर्तृकं कार्यत्वाद्घटवदिति अत्र यद्य
पि शरीरजन्यं जन्यं वाजन्यप्रयत्नाजन्यं जन्यं वा सकर्तृकत्वा
कर्तृकत्वेन विवादाध्यासितं सर्वं वा संदिह्यमानकर्तृकं वा क्षि
त्यादित्वेन न विवक्षितं अदृष्टद्वारा क्षित्यादेरपि प्रयत्नजन्यत्वा

त्रविवादसंदेहयोश्चातिप्रसक्तत्वेन पक्षतानवच्छेदकत्वात् किं
चसकर्तृकं त्वमपि यदि कृतिमज्जन्यत्वं तदा अस्मदादिना सिद्ध
साधनं असमदादिकृतेरप्यदृष्टद्वारा क्षित्यादिजनकत्वात् उ
पादानगोचरकृतिमज्जन्यत्वेपि तथा असमदादिकृतेरपि किं
चिदुपादानगोचरत्वात् कार्यत्वमपि यदि प्रागभावप्रतियो
गित्वं तदा ध्वंसे व्यभिचार इति तथापि क्षितिः सकर्तृका कार्यत्वा
त्सकर्तृकत्वं चादृष्टद्वारक कृतिमज्जन्यत्वं कार्यत्वं च प्रागभावा
वच्छिन्नसत्ताप्रतियोगित्वं न चांकुरादौ संदिग्धानैकान्तिकत्वं साध्या
भावनिश्चये हेतुसत्त्वसंदेहे संदिग्धानैकान्तिकत्वस्य दोषत्वा
त् अन्यथा सकलानुमानोच्छेदप्रसंगात् नच पक्षातिरिक्ते
दोषायमिति वाच्यं राजाज्ञापत्तेः नहि दोषस्यैवायं महिमा
यत्पक्षं नाक्रामति तस्मादंकुरस्फुरणदशायां निश्चितव्या
मिके हेतुना तत्र साध्यसिद्धेरप्रत्यूहत्वात् क्व संदिग्धानैका
न्तिकता तदस्फुरणदशायां तु सुतरामिति संक्षेपः एवं सूत्रा
र्थं व्याख्यायेश्वरप्रकरणसमाप्त्या काशप्रकरणमारिप्समान आ
ह निःक्रमणं प्रवेशनमित्याकाशस्य लिंगं इति शब्दः प्रका
रार्थे उत्क्षेपणादीन्यपि कर्माणि संगृह्णाति स्पर्शवद्द्रव्यसंचा
रे निष्क्रमणं प्रवेशनं च तत्कार्यं साकाशस्य लिंगमिति सांख्या
स्तदेतद्दूषयितुमाह तलिंगमद्रव्यत्वात्कर्मणः निःक्रमणप्र
वेशादिलक्षणं कर्म न तावत्समवायिकारणतया आकाशम
नुमापयति कर्मणामेकद्रव्यत्वादेकमात्रमूर्त्तसमवायि
कारणकत्वात् नहि कर्मणोपि व्यासज्यवृत्तीयुतकं न वा:

मूर्त्तत्वं नीति· ननु चासमवायिकारणतयैवाकाशमनुमाय
यिष्यति निष्क्रमणप्रवेशनादीत्यत आह कारणान्तरानुक्ल
प्तिवैधर्म्याच्च अनुक्लृप्तिर्लक्षणं अनुकल्प्यते ज्ञाप्यतेऽ
नेनेति व्युत्पत्त्या कारणांतरस्यासमवायिकारणस्य याऽनुक्लृप्ति
र्लक्षणं तद्वैधर्म्यादित्यर्थः द्रव्यं तावदसमवायिकारणं न
भवत्येव असमवायिकारणता हि कारणैकार्थप्रत्यासत्त्या
कार्यैकार्थप्रत्यासत्त्या च प्रथमा तंतुरूपाणां पटरूपं प्रति
द्रव्यं वासमवायिकारणतामर्हतीति संज्ञां लभते गुरुप्रतिपत्ति
कत्वात् द्वितीया च यथात्ममनःसंयोगस्य ज्ञानादिकं प्रति द्र
व्यं वासमवायिकारणता लघ्वीति संज्ञां लभते लघुप्रतिपत्ति
कत्वात् आकाशस्य तु निष्क्रमणप्रवेशनादौ कर्मणि न सम
वायिकारणता नाप्यसमवायिकारणता तथा च न कर्म आका
शसत्त्वे लिंगमिति ननु निमित्तकारणमस्तु कर्मण्याकाशं दृश्य
ते ह्याकाशे पक्षिकांडादीनां संचरणमत आह संयोगादभा
वः कर्मणः॥ मूर्त्तसंयोगेन कर्मकारणस्य वेगगुरुत्वादेः प्र
तिबंधात्कर्मणोऽभावो नु स्यात् हि न त्वाकाशाभावात् तस्य व्या
पकत्वात् तस्मादाकाशान्वयोऽन्यथासिद्ध एव नाकाशनि
मित्ततां साधयतीत्यर्थः एवं सांख्यमते दूषिते शब्दमाका
शलिंगमुपपादयिष्यन् परिशेषानुमानाय पीठमारचयन्ना
ह कारणगुणपूर्वकः कार्यगुणो दृष्टः॥ पृथिव्यादिलक्ष
णे कार्ये ये विशेषगुणा रूपादयस्ते कारणगुणपूर्वका दृष्टाः
शब्दोपि विशेषगुणः जातिमत्त्वे सति बाह्यैकेंद्रियमात्रग्रा

स्यत्त्वात् रूपादिवत् तथा च तादृशं कार्ये नोपलभ्यते यत्का
रणगुणपूर्वकः शब्दः स्यादित्यर्थः ननु वीणावेणुमृदंग
शंखपटहादौ कार्ये शब्द उपलभ्यते तथा च तत्कारणगुणपू
र्वकः स्यादत आह कार्यान्तराप्रादुर्भावाच्च शब्दः स्पर्शवता
मगुणः भवेदेवं यथा तन्तुकपालादिषु रूपरसाद्यनुभूयते
तत्सजातीयं च रूपरसाद्यंतरं पटघटादावुपलभ्यते तथा वी
णावेणुमृदंगाद्यवयवेषु शब्द उपलब्धस्तज्जातीयश्च वीणा
वेणुमृदंगाद्यवयविष्वुपलभ्येत न चैवं प्रसुप्तनिःशब्दैरेवा
वयवैरवयवारंभदर्शनात् नीरूपैस्तु तन्तुकपालादिभि
र्घटपटाद्यारंभस्यादर्शनात् किंच यदि स्पर्शवतां विशेष
गुणः स्यात्तदा तारतारतरमंदमंदतरादिभावेन वैचित्र्यं ना
नुभूयेत नत्वेकावयवव्याश्रिता रूपादयो वैचित्र्येणानुभू
यन्ते तस्मान्न स्पर्शवद्विशेषगुणः शब्दः न चात्मगुणो मनो
गुणो वा भविष्यतीत्यत आह परत्र समवायात्प्रत्यक्षत्वाच्च ना
त्ममनोगुणः शब्दो यद्यात्मगुणः स्यात्तदाहं सुखी यतेऽजा
नेऽगच्छामीत्यादिवदहं पूर्णोऽहं वाद्येऽहं शब्दवानित्यादि धीः स्या
त् न त्वेवमस्ति किंतु शंखः पूर्यते वीणा वाद्यत इति प्रतियन्ति
लौकिकाः किंच शब्दो नात्मगुणो बाह्येन्द्रियग्राह्यत्वात् रू
पादिवत् अपि च शब्दो यद्यात्मयोग्यविशेषगुणः स्यात्तदा ब
धिरेणाप्युपलभ्येत सुखादिवत् तस्मात्सूक्तं परत्र स
मवायादिति आत्मनोगुणत्वे हेतुमाह प्रत्यक्षत्वादिति ना
त्ममनसोर्गुणा इति कर्त्तव्ये समासे कर्त्तव्ये यदसमासकरणं

वै० सू० वृ०
२९
29

तेन तुल्यन्यायतया प्रत्यक्षत्वादित्यनेनैव हेतुना दिक्कालयोर
पि गुणत्वं शब्दस्य प्रतिषिद्धमिति सूचितं यदर्थमयं परिशेष
स्तदाह परिशेषाल्लिंगमाकाशस्य शब्द इति शेषः अत्रा
पि शब्दः क्वचिदाश्रितः गुणत्वाद्रूपादिवदिति सामान्यतो दृष्टा
दष्टद्रव्यातिरिक्तद्रव्यसिद्धिः गुणश्चायं बाह्यैकेन्द्रियग्रा
ह्यजातीयत्वात् रूपादिवत् अनित्यत्वे सति विभुसमवेत
ज्ञानादिवत् त्वात् अनित्यत्वं च साधयिष्यते परिशेषसिद्धस्य द्रव्याव
यवकल्पनायां प्रमाणाभावात् नित्यत्वं सर्वत्र शब्दोपल
ब्धेश्च विभुत्वं शब्दस्य लिंगस्य द्रव्यस्य द्रव्यत्वनित्यत्वे अतिदे
शेन साधयन्नाह द्रव्यत्वनित्यत्वे वायुना व्याख्याते अ
द्रव्यत्वात्परमाणुरूपस्य वायोर्यथा नित्यत्वं तथाकाशस्या
पि गुणवत्त्वाद्यथा वायोर्द्रव्यत्वं तथाकाशस्यापीत्यर्थः तत्किं
बहून्याकाशान्येकमेवेत्यत आह तत्त्वं भावेन व्याख्यात
मिति विपरिणामेनान्वयः भावः सत्ता सा यथैका तथा तथा
काशमप्येकमेवेत्यर्थः नन्वनुगतप्रत्ययमहिम्ना सत्ताया
एकत्वं सिद्धमाकाशे कथमेकत्वं तत् दृष्टान्तेन सेत्स्यतीत्यत आ
ह शब्दलिंगाविशेषाद्विशेषलिंगाभावाच्च तत्त्वमाकाश
स्य सिद्धमित्यर्थः वैभवे सति सर्वेषां शब्दानां तदेकाश्रयत
योपपत्तावाश्रयान्तरकल्पनायां कल्पनागौरवप्रसंगः अ
कल्पनीयं न्यदपि यदाकाशं लिंगं तत्रापि शब्द एव लिंगं तद्वाव सि
द्धं न च विशेषभेदसाधकं भेदसाधकं लिंगान्तरमस्ति
आत्मनां यद्यपि ज्ञानादिकमवसिद्धमेव लिंगं तथापि व्यव

स्यातोलिंगांतरात् आत्मनानात्वसिद्धिरिति वक्ष्यते नन्वाकाशस्यै
कत्वं तावदस्तु वैभवात् परममहत्त्वं परिमाणमस्तु शब्दासमवायि
कारणत्वात् संयोगविभागावपि स्यातां एकपृथक्त्वं कथमत्र
आह तदनुविधानादेकपृथक्त्वं चेति नियमेनैकपृथक्त्वमे
कमनुविधत्त इत्येकपृथक्त्वसिद्धिः इति द्वितीयाह्निकपरिसमा
प्तौ मानसप्रत्यक्षाविषयगुणवत् द्रव्यलक्षणमाह्निकार्थः ते
न पृथिव्यप्तेजोवाय्वाकाशानामसंगतईश्वरात्मनस्त्वलक्ष
णमस्मिन्नाह्निके तत्र चतुर्दशगुणवती पृथिवी तेन गुणारू
परसगंधस्पर्शसंख्यापरिमाणपृथक्त्वसंयोगविभागपरा
त्वापरत्वगुरुत्वद्रवत्वसंस्काराः एतावंत एव गंधमपास्य स्ने
हेन महापां एत एव गंधरसस्नेहगुरुत्वान्यपास्य तेजसः गंध
रसरूपस्पर्शगुरुत्वस्नेहद्रवत्वान्यपास्य वायोः शब्देन स
ह संख्यादिपंचगुणवत्त्वमाकाशस्य संख्यादिपंचकमात्रं दि
क्कालयोः परत्वापरत्वसंस्कारसहितं संख्यादिपंचकं
मनसः ज्ञानादिकं नवकं संख्यादिपंचकं च क्षेत्रज्ञानां सं
ख्यादिपंचकं ज्ञानेच्छाप्रयत्नाश्चेश्वरस्य इति श्रीशंकरे
रे वैशेषिकसूत्रोपस्कारे द्वितीयस्याध्यायस्याद्यमाह्निकं
इदानीं भूतानां लक्षणानि गंधादीनि परिचिक्षिपुर्गं
धादीनां स्वाभाविकत्वमौपाधिकत्वं च व्यवस्थापयन्नाह
पुष्पवस्त्रयोः सति सन्निकर्षे गुणांतराप्रादुर्भावो वस्त्रे गंधा
भावलिंगं रूपरसगंधस्पर्शा यत्र कारणगुणप्रक्रमेणो
त्पद्यंते तत्र स्वाभाविकाः संतो लक्षणतामुपयंति नान्य

विशेष

वै॰ सू॰ वृ॰

३०

30

थानहि समीरणे उपलभ्यमानं सौरभं शिलातले उपलभ्य
मानं शैत्यं जले उपलभ्यमानमौष्ण्यं वा लक्षणं भवति तदेत
दाह पुष्पवस्त्रयोरिति न हि कनककेतकीकुसुमसन्निकृष्ट
वाससि कनककेतकीसौरभमुपलभ्यमानं वाससः न हि
वाससः कारणगुणप्रक्रमेण तदुत्पन्नं किं कनककेतकी
सन्निधानादौपाधिकं न हि च वस्त्रे गंधाभावे केतकीगं
धभावो लिंगं किं लिंगमत उक्तं गुणांतराप्रादुर्भावश्चेति गु
णांतरात्कारणगुणादप्रादुर्भावोनुत्पत्तिः यदि हि वस्त्रेयो
गंध उपलभ्यते स तस्य स्वाभाविकः स्यात्तदा तदवयवेषु तं
तुषु केतकीसन्निकर्षात्पूर्वं तत्र वस्त्रे वा उपलभ्येत न चैव
मित्यर्थः तथा च विवादाध्यासितो गंधो न वस्त्रसमवेतः
तदवयवगुणाजन्यविशेषगुणत्वात् शीतोष्णस्पर्शा
दिवत् स्वाभाविकं गंधं पृथिव्या लक्षणमित्याह व्यवस्थि
तः पृथिव्यां गंधः पृथिव्यां व्यवस्थितोऽयोगान्ययोगव्यव
च्छेदाभ्यां परिच्छिन्नः समानासमानजातीयव्यावर्त्तकत
या गंधो लक्षणमित्यर्थः भवति हि पृथिवी गंधवत्येव
पृथिव्येव गंधवतीति तदेवं समानजातीयेभ्यो जलाद्य
भ्योऽसमानजातीयेभ्यो गुणादिपंचभ्यो व्यावर्त्तकः स्वा
भाविकः पृथिव्यां गंध इति व्यवस्थितं गंधस्य स्वाभाविक
त्वव्यवस्थापनप्रकारमुक्त्वातां तेजोलक्षणेऽप्यतिदिशन्ना
ह एतेनोष्णता व्याख्याता अवादिलक्षणे सैत्यादाम २
प्ययमतिदेशो द्रष्टव्यः तेजोलक्षणं परीक्षते तेजस उष्ण

ता स्वाभाविकमुष्णता तेजो लक्षणमित्यर्थः रूपमपि शुक्लं
भास्वरमुपलक्ष्यते अर्थालक्षणं परीक्ष्यते अप्सु शीतता
स्वाभाविकी शीतता अपां लक्षणमित्यर्थः तथा च शिलातल
लश्रीखंडादौ नातिव्याप्तिरिति भावः शीततायाः स्पर्शसाध्य
त्वुक्तलक्षणोत्ते स्नेहं सांसिद्धिक द्रवत्वं चोपलक्षयति ननूद्देश
लक्षणक्रमभंगः कुत इति चेत् न तेजः स्पर्शस्य पृथिवी जलस्प
र्शयोरभिभावकत्वसूचनाय तयोर्मध्ये तेजः परीक्षाया उक्तत्वात्
वायुलक्षणपरीक्षासूचनार्थं वाक्यमलं घनं तथा चायाकजानु
ष्णाशीतस्पर्शो वायोः स्वाभाविकः सल्लक्षणमित्यप्युनेयमि
ति तात्पर्यं तदेवंकारणगुणपूर्वकः स्पर्शवतां विशेषगु
णगंधादयः पृथिव्यादीनां लक्षणानीत्युक्तमिदानीं क्रम
प्राप्तं काललक्षणप्रकारणमारभमाण आह अपरस्मि
न्नपरं युगपच्चिरं क्षिप्रमिति काललिंगानि इति कारो काल
लिंगानीत्यर्थः अपरस्मिन्नपरमित्यनेन परस्मिन् परमित्य
पि द्रष्टव्यं तेनायमर्थः बहुतरतपनपरिस्पंदान्तरितजन्म
नि स्थविरे युवानमवधिं कृत्वा परत्वमुत्पद्यते तच्च परत्वस
मवायिकारणसापेक्षं न च रूपाद्यसमवायिकारणं व्यभि
चारात् त्रयाणां गंधादीनां वा घोपरत्वानुत्पादकत्वात् स्पर्श
स्याप्युष्णादिभेदेन भिन्नस्य प्रत्येकं व्यभिचारात् न चावच्छि
न्नं परिमाणं तथात्वस्य विजातीयानारंभकत्वात् तपनप
रिस्पंदानां च व्यधिकरणत्वात् तदवच्छिन्नद्रव्यसंयोग एवा
समवायिकारणं परिशिष्यते तच्च द्रव्यं पिंडमार्तण्डोभयसं

ज्ञानप्रकारपरः सन्नेक
मभिसंबध्यते तथा च
परमितिप्रत्ययो युगपदि
तिप्रत्ययश्चिरमितिप्रत्ययः
क्षिप्रमितिप्रत्ययः

वै॰ सू॰ वृ॰
३१
३१

युक्तं विभुत्वात् आकाशस्य तत्स्वाभाव्यकल्पने क्वचिदपि भे
र्यभिघातात् सर्वभेरीषु शब्दोत्पत्तिप्रसंगः तथा च काल
स्यैवमार्त्तण्डसंयुक्तस्य पिंडेन संयोगः परत्वासमवायिका
रणं काल एव मार्त्तण्डक्रियोपनायकः आत्मनश्च द्रव्या
न्तरधर्मेषु द्रव्यान्तरावच्छेदाय स्वप्रत्यासत्त्यतिरिक्तसन्निक
र्षापेक्षत्वात् अन्यथा वाराणसीस्थेन महारजनारुणि
म्ना पाटलिपुत्रेपि स्फटिकमणेरारुण्यप्रसंगात् कालस्य तु
तत्स्वभावतयैव कल्पनादयं न दोषः कालेनापि रागसंक्रा
मः कथन्नेति चेत् नियतक्रियोपनायकत्वेनैव तत्सिद्धेः
एवं स्थविरमवधिं कृत्वा यूनि अपरत्वोत्पत्तिरूहनीया युगप
दिति युगपज्जायन्ते युगपत्तिष्ठन्ति युगपत्कुर्वन्तीत्यादिप्रत्यया
नां चैकस्मिन्काले एकस्यार्थसंयोगस्यावच्छिन्ने काल इत्यर्थः
न चाप्राप्त एव सूर्य्यगत्यो विशेषणतामनुभवन्ति न च स्वरू
पप्रत्यासन्ना एव ताः तस्मादेतादृशविशिष्टप्रत्ययान्यथा
नुपपत्त्या विशेषणज्ञापकं यद्धर्मं स कालः ननु सिध्यतु का
लः स तु नित्यो द्रव्यं वेति न प्रमाणमत आह द्रव्यत्वनित्यत्वे
वायुना व्याख्याते यथा वायुपरमाणोर्गुणवत्त्वाद्द्रव्यात्वं च
द्रव्यद्रव्यत्वाच्च नित्यत्वं तथा कालस्यापीत्यर्थः तथापि सन्तु
बहवः कालाः इत्यत आह तत्त्वं भावेन व्याख्यातमिति वि
परिणतेनान्वयः चिरादिप्रत्ययानां काललिंगानां सर्वत्राvi
शेषादनेकत्वे प्यात्मनामिव विशेषलिंगाभावात् सत्तावदेक
त्वं कालस्येत्यर्थः नन्वेवं क्षणलवमुहूर्त्तयामदिवसाहोरात्र

पक्षमासद्वयेनसंवत्सरादिभेदेनभूयान् कालास्तकथमेक
इतिचेत् नभेदभानस्योपाधिनिबंधनत्वात्यथाएकएवस्फ
टिकमणिर्जवातापिंछाद्युपाध्युपरागेनभिन्नइवभासतेत
थेकएवकालःसूर्य्यस्पंदाद्यवच्छेदभेदेनतत्तत्कार्य्यावच्छेदभे पति
दभेदेनचभिन्नइवभासतइत्यभ्युपगमात् तथाचकालोपा
ध्यव्यापकःकालोपाधिःक्षणःसाधेयकादाचित्काभावप्रतियो
ग्यनाधारःकालःक्षणःप्रतिप्रतिक्षणंकस्यचिदुत्पत्तेःकस्य
चिद्विनाशादेतद्ध्वंसयंक्षणद्वयंक्षैचलवइत्याद्यागमप्र
सिद्धं ननुतथाप्रतीतानागतवर्त्तमानभेदेनकालत्रयमस्ति श्रूय
तेहित्रैकाल्यमुपावर्त्ततेत्रैकाल्यासिद्धेरितिस्यादीतिचेत् नवस्तु
तत्प्रागभावतत्प्रध्वंसावच्छेदेनत्रैकाल्यव्यवहारात् येनहिवस्तु
नायःकालोवच्छिद्यतेसतस्यवर्त्तमानः यत्प्रागभावेनयः का
लोवच्छिद्यतेसतस्यवर्त्तमानः यत्प्रागभावेनयःकालोवच्छिद्य
तेसतस्यभविष्यत्कालः यत्प्रध्वंसेनयःकालोवच्छिद्यतेस
तस्यातीतकालःतथाचावच्छेदकत्रित्वाधीनः कालत्रित्वव्यव
हारः इदानींसर्वोत्पत्तिमतांकालइत्साकारणमित्याह नि
त्येष्वभावादनित्येषुभावात् कारणेकालाख्येतिइतिशब्दो
हेतौइतिहेतोःकारणेसर्वोत्पत्तिमत्कारणेकालइत्साख्याहे
तुमाहनित्येष्वभावादनित्येष्वभावादितिनित्येष्वाकाशादिषुयु
गपज्जातश्चिरंजातःक्षिप्रंजातइदानींजातोदिनेजातोरात्रौ
जातइत्यादिप्रत्ययस्याभावात् अनित्येषुचघटपटादिषु
यौगपद्यादिप्रत्ययानांभावादन्वयव्यतिरेकाभ्यांकारणं।

वै० सू० वृ०
३२
32

कालइत्यर्थः नकेवलंयौगपद्यादिप्रत्ययबलात्कालस्यसर्वो
त्पत्तिमन्निमित्तकारणत्वमपितुपुष्पफलादीनामपिहैमंति
वासंतिकप्रत्ययेभ्यआदिसंज्ञाबलादेतदध्यवसेयं कालर्लिं
गप्रकरणंसमाप्येदानींदिग्लिंगप्रकरणमारभमाणआ
ह इतइदमितियतस्तद्दिश्यंलिंगं दिशइदंदिश्यं दिगनु
मापकंइतोऽयतरसंयुक्तसंयोगाश्रयादिदंबहुतरसंयुक्त
संयोगाश्रयादिधिकरणंपरमितश्चसंयुक्तसंयोगभूय
स्त्वाधिकरणादिदंसंयुक्तसंयोगाल्पीयस्त्वाधिकरणमपर
मितिनियतदिग्देशयोःसमानकालयोःपिंडयोर्मूर्तयोर्द्रव्याद्व
तिसादिगित्यर्थः नहितादृशंद्रव्यमंतरेणभूयसांसंयुक्तसंयो
गानामल्पीयसांवापिंडयोरुपनायकमन्यदस्तिनचतदुप
नयमंतरेणतत्रविशिष्टबुद्धिर्नचतामंतरेणापरत्वापरत्वयोरु
त्पत्तिर्नचतदुत्पत्तिंविनातद्विशिष्टप्रत्ययव्यवहारौनचका
लएवसंयोगोपनायकोऽस्तु किंद्रव्यांतरेणेतिवाच्यंकालस्यनि
यतक्रियोपनायकत्वेनैवसिद्धेः अनियतपरधर्मोपनर्यक
त्वकल्पनायांतुकाश्मीरकुंकुमपरागंकार्णाटकामिनी
कुचकलशंप्रत्यप्युपनयेत् आकाशात्मानावपितथापर
धर्मोपसंक्रामकत्वेसएवप्रसंगः दिशस्तुनियतपरधर्मोप
संक्रामकतयैवसिद्धेर्नोतिप्रसंगः एवंचक्रियोपनायका
त्कालात्संयोगोपनायिकादिक्पृथगेवकिंवास्मात्पूर्वमि
दमस्माद्दक्षिणमिदमस्मात्पश्चिममिदमस्मादुत्तरमिदम
स्माद्दक्षिणपूर्वमिदमस्मात्पश्चिममिदमस्मात्पश्चिमोत्तर

मिदमस्मादुत्तरपूर्वमिदमस्मादधस्तादिदमस्मादुपरिष्टादिद

मित्येते प्रत्यया दूरमिदमितीति नासंगृहीताः एतेषां प्रत्यया

नां निमित्तान्तरासंभवात् किं च नियतोपाध्युपनायकः का

लोऽनियतोपाध्युपनायिका दिक् भवति यदपेक्षया यो वर्त्तमा

नः स तदपेक्षया वर्त्तमान एव दिगुपाधौ तु नैव नियमः यं

प्रति या प्राची तं प्रत्येव कदाचित्तस्याः प्रतीचीत्वादेवमुदीच्या

दिष्वपि वाच्यं यदपेक्षया सूर्योदयाचलसन्निहिता या दिक्

सा तदपेक्षया प्राची यदपेक्षया च सूर्यास्ताचलसन्निहिता या

दिक् सा तदपेक्षया प्रतीची सन्निधानं तु सूर्यसंयुक्तसंयुक्तसं

योगाल्पीयस्त्वं तेचाल्पीयांसो भूयांसो वा सूर्यसंयोगा दिगुप

नेया एव प्राच्यभिमुखपुरुषवामप्रदेशावच्छिन्ना दिगुदीची

तादृशपुरुषदक्षिणभागावच्छिन्ना दिग्दक्षिणा वाम त्वदक्षि

णे द्वे तु शरीरावयववृत्तिजातिविशेषौ गुरुत्वासमवायिकार

णक क्रियाजन्यसंयोगाश्रयो दिगधः अदृष्टवदात्मसंयोग

जाग्निक्रियाजन्यसंयोगाश्रयो दिगूर्द्ध्वं एवं चेन्द्राग्नियमनि

र्ऋतवरुणवायुसोमेशाननागब्रह्माधिष्ठानोपलक्षितादश

दिश इति व्यपदेशान्तरं प्राच्यादिव्यपदेशात् दिशो द्रव्य

त्वनित्यत्वं च वायुपरमाणुवदित्याह द्रव्यत्वनित्यत्वे वा

युना व्याख्याते गुणवत्त्वद्रव्यत्वमनाश्रितत्वाच्च नित्यत्वमि

त्यर्थः एकत्वमतिदिशन्नाह तत्त्वं भावेन दिग्लिंगाविशे

षाद्विशेषलिंगाभावाच्च सत्तावदेकत्वं तदनुविधानादेक

पृथक्त्वं ननु यद्येकैव दिक् कथं तर्हि दश दिश इति प्रतीति

वै० सू० उ० व्यवहारएवेत्यतआह कार्य्यविशेषेणनानात्वंकार्य्यविशेषः

३३ कार्य्यभेदस्तेननानात्वोपचारइत्यर्थः तमेवकार्य्यभेदंदर्श

33 यन्नाह आदित्यसंयोगाद्भूतपूर्वाद्भविष्यतोभूताच्चप्राची

प्रागस्यांसविताऽञ्चतीतिप्राचीतथाचयस्यांदिशिमेरुप्रदक्षि

णाक्रमेणभ्रमतआदित्यस्यप्रथमसंयोगोभूतपूर्वोभविष्य

न्वाभवान्वासादिक्प्राचीअत्रपुरुषाभिसंधिभेदमाश्रित्य

कालत्रयोपवर्णनंभवतिहिकस्यचित्पूर्वेद्युः प्रातरस्यांदिश्या

दित्यसंयोगः प्रथमंवृत्तइतीयंप्राचीकस्यचिदपरेद्युरस्या

मादित्यसंयोगः प्रथमंभावीत्यभिसंधायप्राचीव्यवहारः क

स्यचिदिदानीमस्यामादित्यसंयोगोभवन्नस्तीत्यभिसंधाय

प्राचीव्यवहारः भूतादित्यादिकर्मोक्तप्रत्ययः तेनाभि

संधेवनियमाद्यदाप्यादित्यसंयोगोनास्तिरात्रौमध्याह्नादौ

वातदापिप्राचीव्यवहारानुगमः सिध्यतीतिभावः दिगंत

रव्यवहारेपीयमेवप्रकारमतिदिशन्नाह तथादक्षिणा

प्रतीच्युदीचीच तद्वदेवदक्षिणादिग्वर्तिनगादिनासहा

दित्यसंयोगाद्भूतपूर्वाद्भविष्यतोभूताद्वादक्षिणाव्यवहा

रः एवंप्रतीच्युदीच्योरपिव्यवहारऊन्नेयः वामत्वदक्षि

णत्वेनिरुक्तेएव दिगंतरालव्यवहारेपीममेवप्रकारमति

दिशन्नाह एतेनदिगंतरालानिव्याख्यातानि प्राचीदक्षि

णयोर्दिशोर्लक्षणसांकर्य्येदक्षिणपूर्वादिगितिव्यवहा

रः एवंदक्षिणपश्चिमा-पश्चिमोत्तराउत्तरपूर्वेत्यूह्यंरा

तेचादित्यसंयोगायेनविभुनाद्रव्येणोपनीयतेसादि।

गितिकणादरहस्येस्मुसादितंविस्तरतः चतुर्णांभूतानांरू।
पादीनिलक्षणानिकारणगुणपूर्वकतयानाविकान्यन्यथा
त्वौपाधिकानीतिव्यवस्थितंपूर्वमेवविशेषगुणाशून्यंविभु।
लिंगंचोक्तमिदानीमाकाशस्यलिंगंशब्दः परीक्षणीयः संति
चात्रतांत्रिकानांविप्रतिपत्तयः केचिछब्दंद्रव्यमाचक्षतेकेचि
द्गुणंगुणत्वेसत्यप्येकेनित्यमाहुरपरेचानित्यमन्येतुशब्देपि
स्फोटाख्यंशब्दांतरमाहुस्तदत्रपरीक्षामारभमाणाः परीक्षा
प्रथमांगंसंशयमेवतावल्लक्षणतः कारणतश्चव्यवस्थाप
यन्नाह १७ सामान्यप्रत्यक्षाद्विशेषाप्रत्यक्षाद्विशेषस्मृ
तेश्चसंशयः सामान्यप्रत्यक्षादितिसामान्यवतोधर्मिणः प्र
त्यक्षात्ग्रहणात् मतुब्लोपात् विशेषाप्रत्यक्षादितिविशे
षस्यपरस्परव्यावर्त्तकस्यधर्मस्यवक्रकोटरादेः शिरः पा।
ण्यादेश्चाप्रत्यक्षादग्रहणात् विशेषस्मृतेः विशेषस्यको
टिद्वयस्यस्थाणुत्वपुरुषत्वलक्षणस्मरणात् स्मरणमपि
ग्रहणपरं क्वचिदनुभूयमानधर्मयोरपिकोटित्वात् चकारा
द्दृष्टादेः संशयकारणस्यसंग्रहः असाधारणोधर्मोनध्य
वसायात्मकज्ञानजनकइतिनोक्तः यद्वा असाधारणस्या
पिव्यावृत्तिद्वाराकारणत्वंसपक्षविपक्षव्यावृत्तिश्चसाधारण
धर्मएवेतिनोक्तः विप्रतिपत्तिरपिविरुद्धप्रतिपत्तिद्वयजनकं
वाक्यद्वयंशब्दोनित्यइत्येकंशब्दोऽनित्यइत्यपरंतदुभयं
तदुभयजन्यंचज्ञानद्वयमयुगपद्भावित्वात् संभूयनसं
शायकमतस्तत्रशब्दत्वादिरसाधारणः सत्वप्रमेयत्वादि

वै० सू० वृ०

३४

35

साधारणोवाधर्मः संशयकइतिषष्ठ्यङ्गीकाः समानतंत्रे
गौतमीयेनध्यवसायज्ञानस्यानभ्युपगमादसाधारणोध
र्मः संशयकारणत्वेनोक्तोविप्रतिपत्तेश्चविरुद्धवाक्यद्वयस्या
न्वयव्यतिरेकशालितयासंशयकारणमुक्तंन्यायभाष्येचो
पलभ्यमानत्वंचसंशयकारणमुक्तंसदप्युपलभ्यतेऽसद
प्युपलभ्यमानमिदंसदसत्वेचयच्चानुपलभ्यमानत्वंसद
पिनोपलभ्यतेमूलककीलकाद्यसदपिनोपलभ्यतेगग
नारविंदादितथाचपंचविधःसंशयइतितदेतत्सामा
न्यमेवेतिसामान्यप्रत्यक्षत्वादिसनेनैवगतार्थेन्यायवार्त्ति
केपिचकारणभेदेनसंशयेत्रित्वमुक्तंतदपिनसंभवतिव्य
भिचारेणसमानधर्मादीनांत्रयाणांकारणत्वस्यैवासंभ
वात् नहितृणारणिमणिजन्यवह्नौवैजात्यवदत्रापिक
ल्पनीयंसंशयत्वावच्छिन्नकार्य्यप्रतिसमानधर्मत्वेनैव
कारणतायाःकल्पनात् यत्त्वप्रधानविधिकोटित्वप्रधा
ननिषेधकोटित्वादिवैजात्यमुक्तंतदननुगतत्वान्नावच्छेद
कंतथाचसंशयोनत्रिविधोनपंचविधः किंत्वेकविधए
वप्रकारांतरेणतुद्वैविध्यंसूत्रकृदेवस्पष्टयतिननुजिज्ञासो
जनकंज्ञानंसंशयइतिनलक्षणमनध्यवसायेपिगतत्वा
त् संस्कारजनकंज्ञानंसंशयइत्यप्यविकल्पकसाधार
णंविशिष्टज्ञानत्वेनसंशयस्यापिसंस्कारजनकत्वात्सं
शयत्वंचजातिरपिनलक्षणंधर्म्यंशेसंशयाभावेनतद
शेतज्जासंभावात्जातेश्चाव्याप्यवृत्तित्वानभ्युपगमा

दितिचेत् एकस्मिन्धर्मिणि विरोधिनानाप्रकारकं ज्ञानं संशय
इति तल्लक्षणात् द्विविधः संशयो बहिर्विषयकोऽन्तर्विषय
कश्च बहिर्विषयोऽपि दृश्यमानधर्मिकोऽदृश्यमानधर्मिकश्च
तत्र दृश्यमानधर्मिको यथोर्द्ध्वत्वविशिष्टस्य धर्मिणो दर्शना
दयं स्थाणुः पुरुषो वा अदृश्यमानधर्मिको यथारण्ये सीटा
द्यंतरिते गोगवयादिपिंडे विषाणमात्रदर्शनादयं गोर्गवयो
वेति वस्तुतस्तत्रापि विषाणधर्मिक एव संदेहो विषाणमिदं
गोसंबंधि गवयसंबंधि वेति विवक्षामात्रात्तु द्वैविध्याभिधानं
यत्सामान्यं संशयहेतुस्तद्द्वनेकदृष्टत्वं संशयकमेकत्रैव वा ध
र्मिणि दृष्टं संशयहेतुरित्यत्र प्रथमां विधामाह दृष्टं च दृष्टवत्
दृष्टमूर्द्ध्वत्वं संशयहेतुः दृष्टवदिति वतिप्रत्ययः तेन दृष्टाभ्यां।
स्थाणुपुरुषाभ्यां तुल्यं वर्त्तते पुरोवर्त्तिनि यदूर्द्ध्वत्वं तद्दृष्टं संशय
हेतुरित्यर्थः एकधर्मिविषयं यद्दृष्टं तमुदाहरति यथादृष्टम
यथादृष्टत्वाच्च संशयहेतुरिति शेषः चकारः पूर्वोक्तसमु
च्चयार्थः अयथादृष्टत्वाद्धेतोर्यथादृष्टमपि संशायकं यथा
चैत्रो यथादृष्टः केशवान् कालांतरेऽयथादृष्टः केशविना
कृतो दृष्टं इत्यर्थः क्रमेण तत्रैव चैत्रे वस्त्रावृतमस्तके दृष्टे स
ति भवति संशयश्चैत्रोऽयं सकेशो निष्केशो वेति अत्र हि चैत्रत्वं स
मानो धर्मः संशायकः स चैकत्रैव दृष्टद्वाऽभिन्न एव ध
र्मिणि दृष्टः संशयहेतुः उपलभ्यमानत्वं समानमेव धर्मं
संशयकारणमाह विद्याविद्यातश्च संशयः आंतरसं
शयो द्विविधः विद्याविद्याभ्यां भवति यथा मोहूर्त्तिकः सम्यगा

दिश्यतिचंद्रोपरागाद्यसम्यगपि तत्रस्वज्ञाने संशयोस्य जायते
सम्यगादिष्टमसम्यग्वेतियद्वाज्ञानं हि क्वचिद्विद्याभवति क्वचि
च्चाविद्याऽप्रमाभवति तथाचज्ञायमानत्वात्सदिदमसत्वेति
संशयो जायते पुनः संशयग्रहणमिहापि सामान्यप्रत्यक्षादेव
संशयो न तु निमित्तान्तरादिति सूचनार्थः तथाचसमानानेक
धर्मोपपत्तेरुपलब्ध्यव्यवस्थातश्चाविशेषापेक्षविमर्षः संशय
इतिगोतमीये लक्षणेउपलब्ध्यनुपलब्ध्यव्यवस्थाद्वयस्यप
थगेवसंशयकारणत्वं कैश्चिदुक्तं तन्निरस्तं एवंलक्षणतः
स्वरूपतश्चपरीक्षाप्रथमांगं संशयं व्युत्पाद्येदानीं परीक्षा
विषयं शब्दं धर्मिणं दर्शयन्नाह श्रोत्रग्रहणोयोऽर्थः स
शब्दः श्रोत्रं ग्रहणं ग्रहणकरणं यस्य स श्रोत्रग्रहणः
अर्थ इति धर्मीत्यर्थः तथाच शब्दवृत्ति धर्मेषु श्रोत्रग्राह्येषु
शब्दत्वनादत्वादिषु यावत्स्वत्वादिषु नातिव्याप्तिः अर्थपदेन
धर्मिपरेण जातिधर्मित्वमभिप्रेतमतः स्फोटनामाश
ब्दस्तद्यवेतः शब्दो नास्तीति सूचितं नन्वेकं पदमेकं वाक्य
मित्येकत्वप्रतीतिबलादवश्यं स्फोटोऽङ्गीकर्त्तव्यः नहिव
हुवर्णात्मके पदे बहुवर्णात्मके वाक्ये भवत्येकत्वप्रत्ययः
स्फोटइतिचार्थस्फुटीकरणाधीनासंज्ञा वर्णानां प्रत्येकं ता
वदर्थप्रत्ययाजनकत्वमेव मिलनं त्वेकवक्तृकाणामाशुतर
विनाशिनामसंभवीति स्फोटादेवार्थप्रत्ययः तज्ज्ञानमंतरे
णार्थस्फुटीभावाभावात् सच स्फोटो यद्यपि पदभावेन व्यव
स्थितेषु सर्वेष्वेव वर्णेषु तथापि चरमेवर्णे स्फुटीभवतिमेवं

संकेतवद्वर्णत्वं पदत्वं तथा च संकेतबलादेव पदादर्थप्रतीतौ किं
स्फोटेन वर्णानां बहूनामप्येकार्थप्रतिपादकत्वमेकं धर्ममभि
प्रेत्यैकं पदमिति भाक्तो व्यवहारः एवं वाक्येपि यदि वर्णातिरि
क्तः पदात्मकश्चित्स्वस्य क्षतो गृह्येत स्वीक्रियेतापि स्फोटः सो
यं स्फोटवादस्तुच्छत्वादुपेक्षितः सूत्रकृता तदेवं शब्दे धर्मि
ण्युपस्थिते गुणत्वे संदेहः तस्याकाशलिंगत्वमतो गुणत्वव्यव।
स्थापनाय त्रिकोटिकं संशयमुपपादयन्नाह ॥ २२ ॥ तुल्यजाती
येष्वर्थान्तरभूतेषु विशेषस्योभयथादृष्टत्वात् शब्दे संश
य इति शेषः शब्दे शब्दत्वं श्रोत्रग्राह्यत्वं चोपलभ्यते तच्च तु
ल्यजातीयेषु त्रयोविंशतो गुणेषु अर्थान्तरभूतेषु द्रव्येषु क
र्मसु च विशेषस्य व्यावृत्तेरुभयथोभयत्र दर्शनात् शब्दः किं गु
णो द्रव्यं कर्म वेति संशयं जनयति· सामान्यविशेषसमवा
यकोटिकत्वं तु सत्त्वकारणवत्त्वादिवैधर्म्यदर्शनान्नाभव
ति ननु चासाधारणधर्मस्यानध्यवसायजनकत्वात् ससंव्या
वृत्तिरस्य सजातीयासजातीयसाधारणीति व्यावृत्तेः साधा
रण एव धर्मः कथं संशयं जनयिष्यतीति चेत् ससंव्यावृत्ति
रस्य सजातीयासजातीयसाधारणीति व्यावृत्तेः साधारण
स्यैव धर्मस्य संशयजनकत्वेनोक्तत्वात् शब्दत्वप्रतियोगिकी
व्यावृत्तिः समानो धर्म उभयगतव्यावृत्तिप्रतियोगित्वं च
शब्दत्वमसाधारणो धर्मः तदुक्तं विशेषस्योभयथादर्श
नादिति अत्राहि विशेषस्य व्यावृत्तेरुभयत्र सजातीये विजा
तीये च दर्शनस्य संशयहेतुत्वेनोपादानात् स च समान

संशयजनकत्वं प्रतिपि
त्वं शब्दत्वं श्रोत्रग्राह्य
त्वं च

एवधर्मेइति तदेवंसंशयंदर्शयित्वाद्रव्यत्वकोटिमुदास्
याह एकद्रव्यत्वान्नद्रव्यं एकंद्रव्यंसमवायियस्यतदेक
द्रव्यंद्रव्यंचकिमप्येकत्रसमवायिकारणकंनभवतीतिद्र
व्यवैधर्म्यान्नायंशब्दोद्रव्यमित्यर्थः ननुकर्मैकद्रव्यमेवतथा
चशब्दःकर्मस्यादित्यतआह नापिकर्माचाक्षुषत्वात् प्र
त्यक्षस्यशब्दविषयकस्याचाक्षुषत्वाच्चक्षुर्भिन्नवहिरिंद्रि
यजन्यत्वादित्यर्थः तथाचशब्दत्वंनकर्मवृत्तिः चाक्षुषप्रत्य
क्षावृत्तिजातित्वात् रसत्वादिवदितिभावः ननुशब्दःकर्म
आशुतरविनाशित्वादुत्क्षेपणादिवदितिचेदत्राह गुणस्य
सतोऽपवर्गः कर्मभिःसाधर्म्यंअपवर्गआशुनाशः सचगु
णत्वेपिद्वित्वादिवदाशुभाविनाशकसन्निपाताधीनइतिक
र्मभिःसाधर्म्यमात्रमस्यनतुकर्मत्वमेवतदुक्तहेतोराशु
तरविनाशित्वस्यहिद्वित्वज्ञानसुखदुःखादिभिरनैकान्तिकत्व
मितिभावः ननुसिद्ध्यतुशब्दोगुणस्तथापिनाशिकारणलिं
गमाकाशंहितदानुमापयेद्यदितस्यकार्य्यःस्यात्किंतुनि
त्यएवायंकादाचित्कउपलंभस्तुव्यंजकाभावप्रयुक्तइत्या
शंक्याह नित्यवैधर्म्यात् नित्येनसहास्यशब्दस्यवैध
र्म्यमुपलभ्यतेयतश्चैत्रोऽमीसत्रावृत्तोपिचैत्रमैत्रादिवच
नेनानुमीयतेनचव्यंजकः भेरीपादिव्यंग्येनघटादिनाक्व
चिदनुमीयतेतस्माज्जन्यएवायंनव्यंग्यइतिभावः व्यंग्यत्वे
बाधकमुक्त्वासंप्रत्यनित्यत्वेहेतुमाह अनित्यश्चायंकारण
तः कारणतउत्पत्तेर्दृष्टत्वादितिशेषः उपलभ्यतेहिभेरी

नतोलिङ्गाभावात् पक्षिदि
उच्चारणात् प्राग्दृष्टशब्दः तत्रस्यात् नेदानीन्तोऽस्त्यलिङ्ग प्रमाणान्तरं स्यात्
नचाश्रवणादश्रोत्रीयांशब्दसत्त्वे प्रमाणम
नितस्मात् कार्य्यएवायंनव्यङ्ग्यइति शङ्का
नवीयोसावेत्याह

दण्डसंयोगादिभ्यः प्रादुर्भवन् शब्दस्तथाचोत्पत्तिमत्त्वादनि
त्योयमिति यद्वा कारणात् इति कारणवत्त्वहेतुमुपलक्षयति
ननु च कारणवत्त्वं शब्दस्य स्वरूपासिद्धमत आह नचासि
द्धं विकारात् शब्दस्य कारणवत्त्वमसिद्धमिति न वाच्यं तीव्रम
न्दादिभावेन विकारस्य दर्शनात् भेरीदंडाद्यभिघाततीव्रस्य तीव्रतयातीव्र
मंदतया मंदस्य शब्दस्योपलंभात् न त्वभिव्यंजकतीव्रमन्द
त्वाद्यधीनोभि- व्यंग्यतीव्रत्वादिः तथा च कारणतो विका
रादनुमीयते जन्योयं न त्वभिव्यंग्य इति ननु व्यंजकस्यैवा
यं महिमा यत्तीव्रमंदादिभावेनाभिव्यनक्ति भेरीदंडाद्यभिहतो वा
युरेव तीव्रो मंदश्च तथा प्रसयमाधत्त इत आह अभिव्यक्तेर्दो
षात् शब्दस्याभिव्यक्तौ समानदेशानां समानेन्द्रियग्राह्याणां प्र
तिनियतव्यंजकव्यंग्यत्वं दोषः स्यात् न च तादृशानां प्रतिनियतव्यं
जकव्यंग्यत्वं दृष्टं अन्नयदि तथा न स्वीक्रियेत न तर्हि ककाराभिव्यक्तौ
सर्ववर्णाभिव्यक्तिप्रसंगः ननु समानदेशानामपि सत्त्वनवत्व
ब्राह्मणत्वानां स्वरूपभेदसंस्थानयोनिर्व्यंग्यानां प्रतिनियतव्यं
जकव्यंग्यत्वं दृष्टमेवेति चेत् न तेषां समानदेशत्वाभावात्
न हि यावद्देशः सत्त्वस्य तावानेव नवत्वस्य ब्राह्मणत्वस्य वा इत्यत्र
नाभिव्यंग्यत आह संयोगाद्विभागाच्च शब्दाच्च शब्दनिष्प
त्तिः संयोगाद्भेरीदंडादिसंयोगात् विभागात् वंशपाट्यमा
ने तत्र संयोगस्तावन्नाद्यस्य शब्दस्य कारणं तदभावात् तस्मा
द्दूरशब्दस्य विभागो निमित्तकारणं दलाकाशविभागश्चास
मवायिकारणं यत्र च दूरे वीणादावुत्पन्नः शब्दस्तत्र संतानक्र

मेणोत्पद्यमानः शब्दः कर्णशष्कुल्यवच्छिन्नमाकाशदेशमा
सादयन्नाख्यतेतेनशब्दादपिशब्दनिष्पत्तिरिति अनित्यत्वे
हेत्वंतरंसमुच्चिनोति लिंगाच्चानित्यः शब्दः वर्णात्मकः श
ब्दोऽनित्यः जातिमत्वेसतिश्रोत्रग्राह्यत्वात् वीणादिध्वनिव
दित्यर्थः इदानीमनित्यत्वेसिद्धांतिनोक्तान्हेतून्दूषयितु
माह द्वयोस्तुप्रवृत्त्योरभावात् तुशब्दः पूर्वोक्तव्यवच्छेदकः
पूर्वपक्षाभिव्यक्त्यर्थः द्वयोराचार्यांतेवासिनोरध्याप
नेध्ययनेचप्रवृत्तिर्दृश्यतेतन्नस्यादभावादभावप्रसंगात् अ
ध्यापनंहिसंप्रदानंसंप्रदीयतेगुरुणाशिष्यायवेदःसयदि
शिष्येभवतितदातस्यसंसंप्रदानंसंभवतिनतुसंप्रदीयमा
नंगवादिदातृप्रतिगृहीत्रोरंतरालेउपलभ्यते नचवेदादिगु
रुशिष्ययोरंतरालउपलभ्यतइति नाध्यापनंसंप्रदानमि
तिचेत् अंतरालेपितत्रस्थपुरुषश्रोत्रेणतदुपलंभात् किं
चाभ्यासादपिशब्दस्यनित्यताय थायंचक्षत्वोरूपंपश्यती
तिस्थिरस्यरूपस्याभ्यासोदृष्टस्तथादशकृत्वोधीतोनुवाको
विंशतिकृत्वोधीतइत्यभ्यासः स्थैर्ये शब्दस्यप्रमाणंसि
द्धंचस्थैर्यंविनाशकानुपलब्धेस्तावत्कालीस्थिरंचेन्नकः प
श्चान्नाशयिष्यतीतिनित्यमेवपर्यवसन्नेतिभावः हेत्वंतरं
शब्दत्वेनित्यत्वआह प्रथमाशब्दात् त्रिः प्रथमामन्वा
हत्रिरुत्तमामितिप्रथमोत्तमयोः सामिधेन्योस्त्रिरुच्चार
णंस्थैर्यंविनाऽनुपपन्नमित्यर्थः शब्दनित्यत्वेहेत्वंतरमाह
संप्रतिपत्तिभावाच्च संप्रतिपत्तिः प्रत्यभिज्ञा तद्भावात्तद्धा

गादित्यर्थः प्रतिपत्तिशब्दादेव तद्विशेषस्य प्रत्यभिज्ञाया लाभात्
संपूर्वः प्रत्यभिज्ञायाः सत्यत्वमाह तथा चैवगाथा मैत्रेणोच्चारिता
तामेवायमुच्चरतीतमेव श्लोकं पुनः पुनः पठतीत्युक्ते मेववचनं पुनः
पुनरभिधत्ते यदेव वाक्यं पपाठि रुच्चत्वयोक्तं तदेवेदानीम
पि ब्रूषे स एवायं गकार इत्यादिप्रत्यभिज्ञावलात् स्थैर्यशब्दस्ये
ति सर्वाणि मान्हेतून्दूषयन्नाह संदिग्धाः सति बहुत्वे संदि
ग्धा अनैकांतिका इत्यर्थः तदुक्तं विरुद्धासिद्धसंदिग्धमलिं
गं काश्यपो ब्रवीदिति तथा च बहुत्वेनानात्वेप्यध्ययनमभ्यस
नं प्रत्यभिज्ञानं च दृष्टमित्यनैकांतिकत्वं हेतूनां तथा हि नृत्य
मधीते नृत्यमभ्यस्यति द्विर्नृत्यत यदेव नृत्यं परुदार्षीवैषमो
पि तदेव करोषि यदेव नृत्यमेकेन चारणेन कृतं तदेवायमपि
करोतीति नृत्ये दृष्टत्वात् तस्य च कर्मविशेषस्य त्वयापि स्थैर्यान
भ्युपगमात् ननु पंचाशद्वर्णा अष्टाक्षरेण मंत्र ह्रस्वरोमन्त्रोष्ठा
क्षरेणानुष्टुविद्यादिसंख्याकथवर्णानामनित्यत्वे उच्चारणभे
देनानंत्यसंभवादित्यत आह संख्याभावः सामान्यतः संख्या
याः पंचाशदादिसंख्याया भावः सद्भावः सामान्यतो गत्वकत्वा
दिजातित इत्यर्थः गकारादीनामानंत्येपि गत्वकत्वाद्य
वच्छिन्नानां पंचाशत्त्वं त्रित्वमष्टत्वं वा द्रव्यगुणादीनामांत
त्यिकभेदेनानंत्येपि नवत्वं चतुर्विंशतित्वादिवदिति भावः
ननु स एवायं गकार इति प्रत्यभिज्ञैव स्थैर्यसाधिका न चैषा
नीलो गकारो मंदो गकार इति प्रतीत्या विरुद्धं धर्मं गोचरं सा
बाध्यते नीलत्वादेस्तत्रोपाधिकत्वान्नचोपाधिभेदाद्व्यभि

वै॰ सू॰ वृ॰
३८
38

दोभाभूत्तवातपिंछादिसंयोगान्नीलपीतादिभावेनप्रथमा
नः स्फटिकमणिरपिनानारूपाणमणिदर्पणेषु दीर्घादि
दिभावेनभासमानंसुखमपिवानानानुकस्यायंतीव्रत्वा
दि धर्मोगकारादावौपाधिकइतिचेत् नवायुधर्मोनादध
र्मो ध्वनिधर्मोवाभविष्यति किं तत्रविशेषचिंतयात्वयापिता
रत्वादेः कत्वगत्वादिनापरापरभावानुपपत्तस्वाभाविकत्वा
सम्भवगमादितिचेत् मैवंउत्पन्नोगकारोनष्टोगकारः श्रु
तपूर्वोगकारोनास्तिनिवृत्तः कोलाहलइत्यादिविरोधिप्र
तीतेस्तस्यामपिचेदियंप्रत्यभिज्ञानानिवर्त्ततेतदास्याजातिवि
षयताकल्पनात् अन्यथाव्यक्तिस्थैर्य्यमालंबमानायाम
स्यांसत्यामुक्ताविरोधिप्रत्ययाएवनोत्पद्येरन् नचायंवायुध
र्मस्तद्धर्माणांश्रोत्राविषयत्वात् नापिनादधर्मः नादोयदि
वायुरेवतदादोषस्योक्तत्वात् अन्यस्यनिर्वक्तुमशक्यत्वाच्च
नापि ध्वनिधर्मःशंखादिध्वनावनुपलभ्यमानेपिगकारे मा
त्रत्वादिप्रतीतेः स्वाभाविकत्वेतु न जातिसांकर्य्यंगत्वादिव्याप
प्यतस्य नानात्वाभ्युपगमात् किंचशुकसारिकामनुष्यप्रभ
वेषुगकारादिषुस्फुटतरारूपभेदप्रथास्तिएवंस्त्रीपुंसप्रभ
वेषुस्त्रीपुंसभेदप्रभवेषुवयतः कांउपटाद्याद्वृता अपिशुका
दयोनुमीयंते औपाधिकंत्वस्यनानाभूयमानोपाधिनिवं
धनंकुंकुमारुण्णातरुणीतिवत् नाप्योपपत्तिकमौपाधि
त्वमुपपत्तेस्तादृशप्रमाणस्याभावादितिसंक्षेपः इतिश्री
करेद्वितीयोऽध्यायः ॥ तदेवंद्वितीयाध्याये।वहि

द्रव्यपरीक्षामुपपाद्योद्देशक्रमादिदानीमात्मपरीक्षायैपीठ
मारचयितुमाह प्रसिद्धा इंद्रियार्थाः इंद्रियाणामर्था गंध
रसरूपस्पर्शशब्दा वा स्वैकैकेंद्रियग्राह्यास्तत्र श्रोत्रग्रहणयो
ऽर्थः स शब्द इति शब्दप्रसिद्धेर्दर्शितायामर्थादेवं गंधादेस्पर्शप
र्यन्ते प्रसिद्धिर्दर्शितेत्यर्थः तथाहि घ्राणग्रहणयोग्योऽर्थः स
गंधः रसनग्रहणयोग्योऽर्थः स रसः चक्षुर्मात्रग्रहणयो
ऽर्थः तद्रूपं त्वगिंद्रियमात्रग्रहणयोग्योऽर्थः स स्पर्शः सर्वत्र चा
र्थशब्देन धर्मीमावभूत उच्यते तेन गंधत्वादौ गंधाद्यभा
वेन नातिव्याप्तिः तदेवं घ्राणग्रहणवृत्ति गुणत्वावांतरजाति
मत्त्वं गंधत्वमेवं रसादावपि वाच्यं तेन नातींद्रियगंधाद्यनुप
ग्रहः इंद्रियार्थप्रसिद्धेरात्मपरीक्षायामुपयोगमाह १
इंद्रियार्थप्रसिद्धिरिंद्रियार्थेभ्योऽर्थांतरस्य हेतुः हेतुर्लिं
गमर्थांतरस्यात्मनः इंद्रियार्थेभ्य इति इंद्रियेभ्योऽर्थेभ्यश्च
रूपादिभ्यस्तद्बुद्धिभ्यश्च यदर्थांतरमात्मा तस्य लिंगमित्यर्थः य
द्यपि ज्ञानमेव लिंगमिह विवक्षितं तथापींद्रियार्थप्रसिद्धेरू
पादिसाक्षात्कारस्य प्रसिद्धतरतया तादृप्येणैव लिंगत्वमुक्तं
तथाहि प्रसिद्धिः क्वचिदाश्रिता कार्यत्वात् घटवत् गुणत्वा
द्वा क्रियात्वाद्वा सा च प्रसिद्धिः करणजन्या क्रियात्वात् छिदि
क्रियावत् यच्च प्रसिद्धेः करणं तदिंद्रियं तच्च कर्तृप्रयोज्यं क
रणत्वात् वास्यादिवत् यथा च यत्कर्तृर्यं प्रसिद्धिराश्रितो यश्च
घ्राणादीनां करणानां प्रयोक्ता स आत्मा ननु शरीरमिंद्रि
याणि वा प्रसिद्धेराश्रयोस्तु प्रसिद्धिं प्रति तु तदुभया

वै॰सू॰वृ॰
३९
39

न्वयव्यतिरेकयोः स्फुटतरत्वात् किं तदन्याश्रयकल्पनाया
तथाहि चैतन्यं शरीरगुणाः तत्कार्य्यत्वात्तद्रूपादिवत् एवमिं
द्रियगुणत्वेपि वाच्यमित्याशंक्याह २ सोनपदेशः अ
पदेशोहेतुः तदाभासोनपदेशस्तथाचतत्कार्य्यत्वंप्रदी
पजन्यज्ञानादावनैकान्तिकत्वादनपदेश इत्यर्थः ननुतत्का
र्य्यत्वंचैतन्यत्वावच्छिन्नस्यैवकार्य्यत्वंविवक्षितंप्रदीपादीनां
चसमस्तमेवचैतन्यंनकार्य्यत्वंविवक्षितंप्रदीपादीनांचसम
स्तमेवचैतन्यंनकार्य्यमितिनव्यभिचार इत्याशंक्याह ३ का
रणाज्ञानात् शरीरकारणानांकरचरणादीनांतदवय
वानाम्वा अज्ञानात्ज्ञानशून्यत्वादित्यर्थः पृथिव्यादिवि
शेषगुणानांहि कारणगुणपूर्वकता दृष्टा तथाचशरीरका
रणेषुयदिज्ञानंस्यात्तदाशरीरेपिसंभाव्येत नचैवंचन्वस्तु
शरीरकारणेष्वपिचैतन्यमितिचेन्न ऐकमत्याभावप्रसंगा
त् नहिबहूनांचेतनानामैकमत्यंदृष्टं करावच्छेदेनानुभूत
स्यकरच्छेदेऽस्मरणप्रसंगात् यतोनान्यदृष्टंस्मरत्यन्य इति
किंचशरीरनाशे तत्कृतहिंसादिफलानुपभोगप्रसंगात्
नहिचैत्रेणकृतस्यपापस्यफलंमैत्रोभुंक्ते ततश्चकृतहानि
रकृताभ्यागमश्चस्यात् ननुशरीरकारणेषुसूक्ष्ममात्रया
ज्ञानमस्तिशरीरेतुस्फुटमतोनाकारणगुणपूर्वकतान
वैकमत्यानुपपत्तिरित्याशंक्याह ४ कार्य्येषुज्ञानात्
यदिहिशरीरमूलकारणेषुपरमाणुषुचैतन्यंस्यात्तदातदा
रब्धेषुकार्य्येषुघटादिष्वपिस्यात् किंचपार्थिवविशेषगुणा

नांसर्वे यार्थिवदृत्तितया व्याप्तेः कार्य्यत्वयि घटादिषु चैतन्यं स्या
न्न च तत्र चैतन्यमुपलभ्यत इत्यर्थः ननु घटादावपि चैतन्यं
सूक्ष्ममात्रया स्त्येवेत्याशंक्याह ५ अज्ञानाच्च सर्वैः प्रमा
णैरज्ञानात्कुंभादौ न चैतन्यमित्यर्थः सर्वप्रमाणागोचरस्या
प्यभ्युपगमे शशविषाणादेरप्यभ्युपगमप्रसंगः नहि घटादौ
चैतन्यं केनापि प्रमाणेन ज्ञायत इति ननु श्रोत्रादिभिः कर
णैरधिष्ठातानुमीयत इत्युक्तं तदयुक्तं नहि श्रोत्रादिभिरात्म
नस्तादात्म्यं तदुत्पत्तिर्वा न च ताभ्यामंतरेणाविनाभावसिद्धिर्न
चाविनाभावमंतरेणानुमितिरित्यत आह ६ अन्यदेव हे
तुरित्यनपदेशः हेतुः साध्यादन्य एव भवति न तु साध्यात्मा
साध्याविशेषप्रसंगात् तस्मात्तादात्म्यघटितो हेतुरहेतुरनपदे
श इत्यर्थः ननु श्रोत्रादिभिरिंद्रियैरात्मनो यथा न तादात्म्यं
तथा तदुत्पत्तिरपि नास्ति नहि वह्नेर्धूम इव वा मनः श्रोत्रादि
करणमुत्पद्यत इत्यत आह ७ अर्थांतरं ह्यर्थांतरस्यान
पदेशः हि यतः कार्य्यं धूमादि यथा वा सभादेवार्थांतरं त
था कारणाद्वह्नेरप्यर्थांतरमेव तथा चार्थांतरत्वाविशेषात्
धूमो वा सभं न गमयति वह्निमेव गमयती त्यत्र स्वभावविशेष
एव नियामकः स च स्वभावो यदि कार्य्याद् अन्यस्यापि भवति
तदा सोप्यपदेशो भवत्येव तथा च कार्यमविवक्षितस्वभाव
भेदमनपदेशः तथा च तादात्म्यतदुत्पत्ती एव वा विनाभा
वस्तयोरेवाविनाभावपर्य्यवसानं यास्मा नो पायो वात
दुभयमात्रग्रहाधीनग्रहो वेति खशिष्यव्यामोहनाय

रिभाषामात्रमितिभावः संप्रत्यविनाभावस्य तदुभयव्यभिचा
रमेवस्फुटयितुमाह ८ संयोगिसमवाय्येकार्थसमवायि
विरोधिच शरीरंत्वग्वत् शरीरत्वादित्ययंहेतुः संयोगी।
वृद्धिक्षयवद्भ्रमसहजावरणंहिवगित्युच्यतेतच्चनशरीरस्य
कार्य्यंकारणंवाकिंतुसहोत्पत्तिकमात्रंनियतंसंयोगव
त् एवंसमवायियथाकाशंपरिमाणवत् द्रव्यत्वात् घ
टादिवदिति अत्रपरिमाणंसाध्यंद्रव्यत्वेनाकाशसमवायिना
धर्मेणसाध्यतेयद्वापरिमाणतारतम्यंक्वचिद्विश्रान्तमित्य
नेनाणुत्वंपरिमाणविशेषः सिद्धस्तेनतदाश्रयः परमा
णुरनुमीयतेशब्दादिनाद्वाकाशस्यज्ञानादिनात्वात्मानु
मानंकार्य्ययोवकारणानुमानमितिनोदाहृतं एका
र्थसमवायिनंसूत्रकृदुदाहरति ९ कार्य्यंकार्य्यान्त
रस्य कार्य्यरूपंकार्य्यान्तरस्यस्पर्शस्यलिंगं उत्पलस्य
क्षणंचैतत् अकार्य्यमप्याकाशैकत्वमाकाशैकपृथक्त्वस्य।
लिंगंएपरममहत्त्वे विरोधिलिंगमुदाहरति १० वि
रोध्यभूतंभूतस्य अभूतंवर्षंभूतस्यवाय्वभ्रसंयोगस्यलि
गंएवंस्फोटादेर्विरोधीमंत्रपाठः तथाचाभूतमनुत्पन्नं
स्फोटादिभूतस्यमंत्रपाठस्यलिंगं विरोधिलिंगस्योदा
हरणान्तरमाह ११ भूतमभूतस्य भूतंस्फोटादिक
मभूतस्यमंत्रपाठस्यलिंगमेवंभूतोवाय्वभ्रसंयोगोऽभू
तस्यवर्षस्यलिंगंएवंभूतोदाहोऽभूतस्यमन्यादिसमव
धानस्यलिंगमेवमन्यदप्यूह्यं लिंगान्तरमुदाहरति १२

भूतोभूतस्य विद्यमानेनैवविरोधिनाविद्यमानस्यैवविरो
धिनः क्वचिदनुमानंयथाविस्फूर्य्यमानमहिंदृष्ट्वाझाटेन्त
रितस्यनकुलस्यअत्रहिविस्फूर्ज्जन्नहिर्भूतोविद्यमानो
झाटांतरितोनकुलोपिविद्यमानएवेतिभवतिभूतोभूतस्य
लिंगमित्यर्थः वर्षवाय्वभ्रसंयोगयोस्तुनैकस्मिन्कालेविद्य
मानतानवास्फोटमंत्रपाठ्योरिति इदानींपरिगणनस्य
प्रयोजनमाह १२ प्रसिद्धिपूर्वकत्वादपदेशस्य प्रसिद्धिः स्म
र्य्यमाणाव्याप्तिः अपदेशोहेतुवचनंतेनस्मर्य्यमाणव्याप्तिवि
शिष्टोहेतुर्हेत्ववयवेनवाउपनयवेयवेनवोच्यतइतिभवति।
प्रसिद्धिपूर्वकोऽपदेशइतितथाचश्रोत्रादिनाकरणेनाधि
ष्ठातुंज्ञानादिनाचगुणेनतदाश्रयस्यात्मनोयदनुमानमुक्तं
तत्रसर्वत्रव्याप्तिरस्तियथातुशरीरकार्य्यत्वेनहेतुनाज्ञानस्यय
च्छरीरगुणत्वंसाधितंतत्रनव्याप्तिरितिभावः ननुकेयंव्या
प्तिः नतावदव्यभिचरितसंबंधः अव्यभिचारस्यसाध्यासंता
नधिकर भावसामानाधिकरण्यत्वस्यकेवलान्वयिन्यप्रसिद्धेः साध्याना
ए धिकरणाधिकरणत्वानधिकरणत्वस्यापिकेवलान्वयिन्य
संभवात् धूमादेरपियत्किंचित्साध्यानधिकरणाधिक
रणत्वात् नाप्यविनाभावः सहिसाध्यंविनाऽभावोतान्वै
तोः अविनर्साध्यान्वयेसतिभावोवाधूमस्यापिक्वचित्तासभा
भावेऽभावात् रासभसत्त्वेसत्त्वाच्चनियतोव्यतिरेकोनियत
श्चान्वयोविवक्षितइतिचेत् ननियमस्यैवनिरूप्यमाणत्वात्
नापिकात्स्न्येनसंबंधः सहियदिकृत्स्नसाध्यसाधनसंबंधः

वै० सू० वृ०
५१
५१

सर्विमव्याप्ते धूमादावपिनास्ति अथकृत्स्नस्यसाधनस्य
साध्यसंवंधः सोप्येकस्यसाध्यस्यकृत्स्नसाधनसंवंधाभा
वादनुपपन्नः अथकृत्स्नस्यसाध्यस्यकृत्स्नेनसाधनेनसं
वंधः एतदप्ययुक्तं नहिकृत्स्नेनसाधनेनक्वचिदपिकृत्स्न
स्यसाध्यस्यसंवंधः संभवतिप्रसक्तमेवसाध्यसाधनयोः
संवंधात् विषमव्याप्तेर्वाव्याप्तेः नापिस्वाभाविकः संवंधः
स्वेन वभावो वा स्वभावोहिस्वस्यभावोवातत्रतज्जन्यत्वंचेन्नहितार्थः तदास
मवायलक्षणायांव्याप्तावव्याप्तेः तदाश्रितत्वंचेन्नहितार्थे
स्नदापिसमवायिव्याप्तिः नहिसमवायः क्वचिदाश्रितः सं
योगस्यापिहेतुधर्मधूमत्वाद्यनाश्रितत्वात् हेतुधर्मोज
न्यत्वाच्चनाप्यनौपाधिकः संवंधः उपाधेरेवदुर्वचत्वात्
स्ववचत्वेपिदुर्ग्रहत्वात् स्वग्रहत्वेप्यन्योन्याश्रयत्वात्साध्य
व्यापकत्वेसतिसाधनाव्यापकत्वादेर्व्याप्तिग्रहाधीनग्र
हत्वात् नापिसंवंधमात्रं व्याप्तिः व्यभिचारिसंवंधस्यापि
देशविशेषकालविशेषगर्भतयाव्याप्तिरूपत्वेपितज्ज्ञा
नस्यानुमितावतंत्रत्वात् अनुमितिकारणीभूतज्ञानविष
यव्याप्तेरेवनिरूपयितुमुचितत्वात् नापिसाधनवन्निष्ठा
त्यंताभावाप्रतियोगिसाध्यसामानाधिकरण्यं व्याप्तिः
वह्नेरपिधूमवन्निष्ठात्यंताभावप्रतियोगित्वात् नहिधूम
वतिमहानसेपर्वतीयवह्नेर्नात्यंताभावः इदंसंयोगिद्रव्य
त्वादित्यादौसंयोगात्यंताभावस्यसाधनसमानाधिकरण
त्वादव्यापकताप्रसंगात् प्रतियोगिविरुद्धस्वसमानाधि

साध्यसामानाधिकरण्यं व्याप्तिः

करण्यं व्याप्तिः संयोगासंतताभावस्यप्रतियोगिविरुद्धत्वाभावा
दितिचेत् नसंयोगासंतताभावस्यापिप्रतियोगिविरुद्धत्वात् अ
न्यथावच्छेदभेदकल्पनावैयर्थ्यात् नहिकृतकत्वानित्यद्व
योर्वृत्त्यर्थमवच्छेदभेदः कल्प्यतेनापिसाध्यवैयधिकरण्या
नधिकरणत्वं केवलान्वयिनिसाध्यवैयधिकरण्याप्रसि
द्धेः साध्याधिकरणवृत्तित्वं हि तन्नापियत्संबंधितावच्छेद

नधिकरण

करूपवत्त्वं यस्यतस्यसाव्याप्तिः वह्नित्वस्यापिधूमसंबंध
संबंधितावच्छेदकत्वात् अधिकदेशावृत्तित्वात् न्नतथेतिचेत्
व्यापकतावच्छेदकस्याधिकदेशवृत्तेरपेक्षणमितिचेत् त
र्हियद्व्याप्यतावच्छेदकंतदेवसंबंधितावच्छेदकत्वेनाभिम
तमित्यभिमतंतथाचात्माश्रयः एवंचसामानाधिकरण्या
वच्छेदकरूपवत्त्वंयस्यतस्यसाव्याप्तिरित्यप्युक्तदोषाक्रांत
मितिचेत् अत्रोच्यते अनौपाधिकः संबंधोव्याप्तिः अनौ
पाधिकत्वंतुयावत्स्वव्यभिचारिव्यभिचारिसाध्यसामाधिक
रण्यंयावत्स्वसमानाधिकरणात्यसंतताभावप्रतियोगिकासं
ताभावसमानाधिकरणसाध्यसामानाधिकरण्यं वा याव
त्साधनाव्यापकाव्याप्यसाध्यसामानाधिकरण्यमितिनि
ष्कृष्टार्थः यावत्साध्यव्यापकव्यापकत्वं वा बहुव्रीहीना
दुर्ग्रहमिदमितिचेत् अतएवतत्र भूयोदर्शनापेक्षातर्का
पेक्षाचयद्वासाधनसमानाधिकरणासंतताभावाप्रतियोगि
साध्यसामानाधिकरण्यं व्याप्तिः असंतताभावश्च वह्निवा
दिसामान्यावच्छिन्नप्रतियोगिताविवक्षितः तेन महान

रसामान्याभावे
धूमत्वस्यापिगगनत
त्वावच्छेदेन तथा
धूमवतितत्राधिक
देशावृत्तित्वात् अत
एवतत्कारणमधि
शेषणमिति

सीयधूमेपर्वतीयवह्न्यत्यंताभावसामानाधिकरण्येपि
नदोषः धूमवतिवह्निर्नास्तीतिप्रतीतेरनुदयात् द्रव्यत्वंतु
संयोगित्वात्यंताभावासमानाधिकरणमेवनहि भवति द्रव्यं
संयोगीतिप्रतीतिः संयोगानांप्रत्येकमव्याप्यवृत्तित्वेपिसं।
योगित्वसामान्यस्याव्याप्यवृत्तित्वात् तस्यैवचव्यापकत्वात्
ननुनोपाधिकत्वमुपाधिविरहउपाधिरेवदुष्परिकलनी
यइतिचेन्न साध्यव्यापकत्वेसतिसाधनाव्यापकस्योपा
धित्वात् तदुक्तं साधनेसोपाधिः साध्येनिरुपाधिरूपा
दिरितिननुसाध्याव्यापकोपाध्यव्यापकमेतत् यथावायुः
प्रत्यक्षः प्रत्यक्षस्पर्शाश्रयत्वादित्यत्रोद्भूतरूपवत्त्वंसश्या
मोमित्रातनयत्वादित्यत्र शाकपाकजत्वंनतूद्भूतरूपव
त्त्वंप्रत्यक्षत्वव्यापकं आत्मनिगुणकर्मादौचप्रत्यक्षेतद
भावात् नापिशाकपाकजत्वंश्यामत्वव्यापकं काककोकि
लजलदजलदजंबूफलादौश्यामेतदभावादितिचेन्नप
र्य्यवसितसाध्यव्यापकत्वेसतिसाधनाव्यापकत्वस्यतया
विवक्षितत्वात्पर्य्यवसितंचसाध्यंयद्धर्मावच्छेदेनोपाधेर्व्या
पकत्वमभ्युपेतंतदवच्छिन्नंप्रकृतेवह्नित्वावच्छेदेनप्रत्यक्ष
स्योद्भूतरूपवत्त्वंव्यापकमन्वयव्यतिरेकाभ्यांगृहीतमैत्रीतनयक
नकश्यामत्वावच्छिन्नसाध्यंप्रतिचकस्वश्रूमादौशाकपाकज
त्वस्यव्यापकत्वावधारणादेवमन्यत्राप्यूह्यं ननुनायमुपा
धिपरवाच्यः यद्धर्मोन्यत्रभासतेसउपाधिर्यथास्फटिकादौज
वाकुसुमादिर्विषमव्याप्तोपाधौचव्याप्यत्वान्तद्धर्मस्यसाध्यनाभिम

तेऽनवभासनादिति चेत् सर्वसम्बन्धाग्रहवादेन्धनप्रभववह्निमत्वा
दौ सुखाउपाधिपदप्रयोगोन्यत्रतुगौणः गुणश्चव्यभिचारोन्नाय
कत्वंयद्यपिव्यापकव्यभिचारित्वस्यव्यभिचारित्वनियमात्सव
तिवसाध्यव्यापकस्योपाधेर्व्यभिचारिसाधनमतः साध्यव्य
भिचारीतियद्यापकाव्याप्यंयत्तदव्याप्यमितिव्याप्यत्वासिद्धुपा
यकत्वमर्थापक्षादुपाधेः साध्यव्यापकस्याभावात् साध्याभाव
साधनात् तदुक्तं वाध्यत्वासाध्यनियमच्युतोपिकथकैरुपाधि
रुद्भाव्यः पर्यवसितेनियममयन् दूषकतावीजमाभाव्यादिति
उन्नीयतेचायंवाधव्यभिचारानुकूलतर्काभावप्रतिकूलतर्कैः
यत्सापव्यभिचारित्वेनसाधनस्यसाध्यव्यभिचारित्वंसउपाधि
रितितत्रतृतीयानकरणेनहेतौत्वप्रकारेनलक्षणेनचयद्य
भिचारित्वेनज्ञानेनसाधनस्य ध्यभिचारित्वंज्ञायतइतिपूर
णीयंअज्ञायमानोपाध्यापनात् स्फुटव्यभिचारस्थलोपा
ध्यापनात् योग्यतागर्भतानुदुर्निरूपाव्यभिचारोन्नायकत्व
मव्यवस्थायोपाध्युद्भावनाशक्यत्वात्वपक्षेतरत्वंतूपाधिलक्ष
णाक्रान्तमपिस्वव्याघातकत्वान्नोपाधिः यथावक्ष्येसंदिग्धानै
कान्तिकत्वंयदिहितत्रनसंदेहस्तदानपक्षतायदिपक्षतात।
दासंदेहस्यावश्यकतयासंदिग्धानैकान्तिकत्वध्रौव्यात् अ
वशिष्टमप्यखेनेष्टव्यं इदानींवृत्तानांवर्तिष्यमाणानांचहे
तूनांहेत्वाभासाद्विवेकायहेत्वाभासप्रकरणमारभमाणआ
ह १४ अप्रसिद्धोऽनपदेशोऽसन् संदिग्धश्चानपदेशः
अप्रसिद्धइति अव्याप्तोऽगृहीतव्याप्तिकश्चविपरीतव्या

तत्रापि पक्षेऽव्यापकत्वं वा

न्तिकश्च विरुद्धः एतेन व्याप्यत्वासिद्धविरुद्धयोः संग्रहः अस
न्नितिपक्षेऽसन्नपक्षधर्म इत्यर्थः सच क्वचित्स्वरूपविरहा
त् क्वचित्संदेहस्साध्यपक्षयोरभावात् सिद्धसाधनेसंदि
ग्ध इति पक्षे साध्यसदसत्त्वकोटिकसंशयजनकः सच संश
यजनकः सच संशयसमानधर्मदर्शनात् क्वचिदसाधा
रणधर्मदर्शनात् क्वचित्पक्ष एव हेतोः साध्यतदभावसा
हचर्यभ्रमदर्शनात् आद्यः साधारणानैकांति कैतिको द्वि
तीयस्त्वसाधारणानैकांतिकस्तृतीयोनुपसंहारी तत्र व्या
प्यत्वासिद्धविरुद्धस्वरूपासिद्धानामुदाहरणमाह १५
यस्माद्विषाणी तस्मादश्वः यत्र वा सभपिंडं पक्षीकृत्य सा
यमसावश्वः विषाणित्वात् यस्तु नाश्वो नासौ विषाणी य
थाशशश्रृगालनरवानरादिरिति व्यतिरेकसहचारमा
त्रदर्शनाद्धि तद्व्यामोहः अयुक्ते तत्र व्याप्यत्वासिद्धिस्वरू
पासिद्धिविरुद्धानामुदाहरणमिदं अनैकांतिकमुदाहर
ति १७ यस्माद्विषाणी तस्माद्गौरिति चानैकांतिकस्योदा
हरणं यत्र महिषं पक्षयित्वाऽयं गौर्विषाणित्वादिति साध
यति तत्र साधारणानैकांतिकता यदा त्वाकाशनित्यं शब्दाश्रय
त्वादिति साधयति तदास्यासाधारणानैकांतिकता सर्वं शब्दोऽ
नित्यः शब्दत्वादित्याद्यप्यग्रस्थमाणदशायामसाधारणा
नैकांतिकमेव यदा तु विपक्षबाधकतर्कावतारात् पक्ष एव
साध्यसिद्धेस्तदा सपक्षवृत्तिताज्ञानदशायां सद्धेतुरेव पक्ष।
स्यापि सपक्षत्वात् तत्र व्याप्यपक्षधर्मतयाऽप्रमितोऽसि।

आश्रयासिद्ध

द्धः सचत्रिविधः व्याप्यत्वासिद्धः आश्रयासिद्धश्चतत्राग्रही
तव्याप्तिकोव्याप्यत्वासिद्धः सत्याएवव्याप्तेर्ग्रहीतु[illegible]रभावा
च्चोभयथापि तेनानुकूलतर्काभावाद्योऽसिद्धभेदाः सचायं
ऽसमर्थविशेषणासमर्थविशेष्यासमर्थोभयसंदिग्धासमर्थवि
शेषणसंदिग्धासमर्थविशेष्यसंदिग्धासमर्थोभयभेदभ्रयंचे
नसहस्रधाभिद्यतेसर्वत्रचात्रसिद्धिविरहएवोद्भाव्यः अत्रेदं
नत्वंहेतुत्वावत्केवलान्वय्यन्वयव्यतिरेकिकेवलव्यतिरेकिभेदा
त्त्रिविधः तत्रसर्वधर्मिगतो धर्मः केवलान्वयीयथाप्रमेयत्वा
भिधेयत्वविशेष्यत्व— विशेषणत्वनित्यद्रव्यात्यन्ताभावाश्रयता
शनाश्यगुणादिध्वंसात्यन्ताभावादयः नत्वस्तितादृशंकिंचि
द्यत्रैतेधर्मानविद्यन्ते तथाचसर्वगतत्वमत्यन्ताभावाप्रतियोगि
त्वंवाकेवलान्वयित्वंएतेषांचस्वात्मवृत्तित्वेपिनदोषः तदुक्तंप्र
माणंशरणंद्वैतीन~~भि~~भिन्नाभिन्नतेयतइतिकेवलान्वयि
साध्यकश्चहेतुः केवलान्वयीअस्यचपक्षसत्त्वाबाधितत्वास
त्प्रतिपक्षितत्वानिचत्वारिरूपाणिगमकत्वौपयिकानि तदन्यत
तरूपहीनः सहेत्वाभासः एवंचगमकतौपयिकान्यतररूप
शून्यत्वंहेत्वाभासत्वं तेनान्यतररूपशून्यत्वनिश्चयवत्संदेहो
प्यनुमितिप्रतिबंधकः वादिहेतोरसाधकतासाधकश्चनचके
वलान्वयिकेवलव्यतिरेकिणोर्हेत्वोरन्यतररूपशून्यतयाहे
त्वाभासत्वापत्तिः केवलान्वयिनिविपक्षासत्त्वस्यकेवलव्य
तिरेकिणिसपक्षसत्त्वस्यगमकत्वौपयिकत्वाभावात् एवं
चाश्रयासिद्धस्वरूपासिद्धभागासिद्धानांपक्षसत्त्वरूपवि

वै०सू०वृ०
५४
५५

रहादाभासत्वंव्याप्यत्वासिद्धविरुद्धसाधारणानैकांतिकानांवि
पक्षासत्त्वरूपवैकल्यात् असाधारणानैकांतिकानुपसंहा
रिणोः सपक्षसत्त्ववैकल्यात् वाधितसत्प्रतिपक्षितयोर
वाधितत्वासत्प्रतिपक्षत्वविरहात् एवंसोपाधिकाप्रयोज
कयोरपिविपक्षासत्त्वनिश्चयाभावादगमकत्वं अनुकूलत
र्काभावप्रतिकूलतर्कयोरपिविपक्षासत्त्वनिश्चयविरहात्
एवंसाध्यविकलसाधनविकलोभयविकलदृष्टांताभासा
नांयदिहेत्वाभासविषयादोषत्वंतदासत्त्वानिश्चयात्परिप
दिवसात्तंव्येयदृष्टांताभासतयातथापिद्वारंहेतोः सप
क्षसत्त्वानिश्चयएवं आनुपदर्शितान्वयानुपदर्शितव्यति
रेकास्तत्वन्यूनाधाधिकालनिग्रहस्थानयर्यवसन्नाएवआ
त्माश्रयान्योन्याश्रयचक्रकानवस्थास्तुव्याप्तिनिश्चयंविघ
टयंतः सपक्षसत्त्वविपक्षासत्त्वान्यतररूपविकलाएवहेत्वा
भासामासादयंतितत्रपक्षेसाध्यसदसत्त्वकोटिकसंशयफ
लकोहेत्वाभासः सव्यभिचारः पक्षेसाध्याभावनिश्चयफ
लकोहेत्वाभासोविरुद्धः व्याप्तिपक्षधर्मताप्रमितिविरहोऽ
सिद्धः वाधसत्प्रतिपक्षौतुकाश्यपीयेमतेनस्वतंत्रौतत्रवा
धः आश्रयासिद्धावनैकांतिकेवापर्य्यवस्यतितदुक्तंवाधा
यास्तुपक्षधर्मोहेतुरनैकांतिकोवेतिसत्प्रतिपक्षोऽन्यतर
त्रव्याप्त्यादिसंशयमापादयन्ननैकांतिकादावेवपर्य्यवस्य
तिवृत्तिकारस्तु अप्रसिद्धोऽनपदेशोऽसन्संदिग्धश्चान
पदेशइतिसूत्रस्यचकारस्यवाधसत्प्रतिपक्षसमुच्चयार्थे

तामाह हेत्वेन सव्यभिचारविरुद्धप्रकरणसमसाध्यसमातीतका
लाः पंच हेत्वाभासा इति गौतमीयमेव मतमनुधावति परंतु विरु
द्धासिद्धसंदिग्धमलिंगं काश्यपो ब्रवीत्याद्यभिधानात् सूत्रका
र स्वरसो हेत्वाभासानां त्रित्वे च कारस्तूक्तसमुच्चयार्थ इति तत्त्वं ग्रं
थगौरवात् प्रपंचो न कृतो मयूखे विस्तरेणान्वेष्टव्यः इदानीं
हेत्वाभासविवेचनस्य फलमाह आत्मेंद्रियार्थसन्निकर्षाद्यन्नि
ष्पद्यते तदन्यत् आत्मेंद्रियार्थसन्निकर्षात्तावज्ज्ञानमुत्पद्य
ते तच्चात्मनि लिंगमसिद्धविरुद्धानैकांतिकेभ्योऽन्यदनाभासमि
त्यर्थः तथाहि ज्ञानमात्मन्युभयथा लिंगं ज्ञानं क्वचिदाश्रितं का
र्य्यत्वाद्रूपादिवदिति वा प्रत्यभिज्ञारूपतया वा योहमद्राक्षं सोहं
स्पृशामीति तत्र ज्ञानगतं कार्य्यत्वं नासिद्धं यन्निष्पद्यत इत्यभि
धानात् न विरुद्धं सामान्यतो दृष्टेऽविरोधाभावात् न चानै
कांतिकं तत एव तथा च त्वगतकार्य्यत्वगुणत्वद्वारा सामान्यतो
दृष्टेन ज्ञानमेवात्मनि लिंगं प्रत्यभिज्ञानं तु भिन्नकर्तृकेभ्यो व्या
वर्त्तमानमेककर्तृकतायां पर्य्यवस्यतेन च बुद्धिश्चैतन्येऽपि कार्य्य
कारणभावनिबंधनमेव प्रतिसंधानं शिष्यगुरुबुद्ध्योरपि प्रति
संधानप्रसंगात् उपादानोपादेयभावस्तत्र नास्ति स च प्रतिसं
धानप्रयोजक इति चेत् उपादानत्वस्य द्रव्यधर्मतया बुद्धाव
संभवात् संभवे वा बुद्धीनां क्षणिकतया पूर्वानुभूतप्रतिसंधा
नानुपपत्तेः नहि पूर्वबुद्ध्या उत्तरास्वबुद्धिषु कश्चित्संस्का
र आधीयते स्थिरस्य तस्य तयानभ्युपगमात् क्षणिकबु
द्धिधारारूपस्य च कालांतरस्मृतौ प्रतिसंधाने वाऽसाम

र्य्यात् आलयविज्ञानसंतानः प्रवृत्तिर्विज्ञानसंतानादन्य एवस
न्नोचप्रतिसंधानाचेतिचेत् सयदिस्थिरः तदासिद्धंसमीहितंक्ष
णिकबुद्धिधारारूपश्चेत्तदापूर्वदोषानतिवृत्तिः नहिक्षणापि
स्थिरः कश्चित्संस्कारः किंचप्रवृत्तिविज्ञानातिरिक्तेतत्र प्र
माणाभावः अहमितिबुद्धिधारैव प्रमाणमितिचेत्तन्नव
तुतत्रयदिप्रवृत्तिविज्ञानान्यालयविज्ञानमेवचेदुपादत्ते
तदाप्रवृत्तिविज्ञानानामुपादानताविरहेनिमि।त्तताविन
स्यादुपादानताव्याप्यत्वान्निमित्ततायाः मास्तुनिमित्ततापी
तिचेत् तर्हिसत्त्वमपिगतं अर्थक्रियाकारित्वस्यसत्त्वलक्ष
णत्वात् प्रवृत्तिसंतानालयविज्ञानमेवचेदुपादत्तेः तदा
प्रवृत्तिसंतानाभ्यांसम्भूयसंतानद्वयमुपादीयतइतिचेत्
तर्हिकिमपराद्धमवयविसंयोगादिभिः व्यासज्यवृत्तिता।
यास्त्वयाप्यभ्युपगमात् तस्माज्ज्ञानेनाश्रयतयानुमितमा
त्मानंप्रतिसंधानंस्थिरत्वेनसाधयतीतिनकिंचिदनुपप
न्नं यद्यानिसाबुद्धिर्न्नात्मानंकारणत्वेनगमयितुमर्ह
तीतिसांख्यमतनिरासायसूत्रमिदमुपतिष्ठते आत्मेंद्रि
यार्थसन्निकर्षाद्युन्निष्पद्यते तदन्यत् बुद्धितत्त्वंयत्त्वया
यनेतज्ज्ञानमेवबुद्धिरुपलब्धिर्ज्ञानमितिपर्य्यायाभिधा
नं तच्चात्मादिसन्निकर्षादुत्पन्नमस्यदेवत्वदभ्युपगता
न्तः करणादिस्वर्थः तथाचभवतितदात्मनोलिंगमिति
भावः स्वात्मन्यनुमानमभिधायेदानीं परानुमानमाह
प्रवृत्तिनिवृत्तीचप्रत्यगात्मनिदृष्टेपरत्रलिंगं प्रसगा

मनीतिस्वात्मनीत्यर्थः इच्छाद्वेषजनिते प्रवृत्तिनिवृत्ती प्रयत्न
विशेषौ ताभ्यां च हिताहितप्राप्तिपरिहारफलिके शरीरकर्म
णी चेष्टालक्षणे जन्येते तथा च परशरीरे चेष्टां दृष्ट्वा इयं चेष्टा
प्रयत्नजन्या चेष्टात्वात् मदीयचेष्टावत् स च प्रयत्न आत्मजन्य
आत्मनिष्ठो वा प्रयत्नत्वात् मदीयप्रयत्नवदिति परात्मानुमानं
इति श्रीशंकरे वैशेषिकसूत्रोपस्कारे तृतीयोध्यायस्याद्यमा
ह्निकं हेतुहेत्वाभासविवेक आह्निकार्थः इदानीमात्मप
रीक्षाशेषं वर्तयिष्यन्नुद्देशक्रमलंघनेन मनः परीक्षामवता
रयन्नाह १ आत्मेंद्रियार्थसन्निकर्षे ज्ञानस्य भावोऽभाव गतिर्मात्मनो
श्च मनसो लिंगं मनोलिंगं वक्ष्यतीति यद्यपि मनो ज्ञानकर्मणा चे
नकरणत्वेन करणत्वेन मूर्तत्वेन च परीक्षितं भवति तदायत्ते
रितमनन्तरं यान्तरादभिमतविषयग्राहिणींद्रियसंबध्यते स आ
त्मेति सिद्धं भवतीत्येतदर्थं क्रमलंघनं आत्मेंद्रियार्थसन्निक
र्षे सत्यपि यस्मिन्निंद्रियसन्निकृष्टे ज्ञानस्य भाव उत्पादोऽस
न्निकृष्टे ज्ञानस्याभावोनुत्पादस्तन्मनइत्यर्थः ननु मनोवैभ
वे पिकरणधर्मत्वादेव ज्ञानायौगपद्यमुपपद्यते किं च मनो
विभुविशेषगुणाशून्यद्रव्यत्वात् कालवत् ज्ञानासमवा
यिकारणसंयोगाधारत्वादात्मवत् स्पर्शासंताभावत्वा को
शवदित्यादि वैभवसाधकं प्रमाणमिति चेन्न मैवं यदि मनो
विभुः स्यात्तदा सर्वेंद्रियसन्निकृष्टात्तत्सर्वेंद्रियकमेकमेव
ज्ञानं स्यात् कार्य्याविरोधान्नैवमिति चेन्न हि सामग्री विरो
धाविरोधमाकलयति येन चाक्षुषत्ववासनत्वादिविरोधा

पविभ्येतच्चित्ररूपवच्चित्राकारमेव ग्रास्यात् भवत्येवदीर्घशष्कु
लीभक्षणस्थलइतिचेत् नचतत्रापिव्यासंगदर्शनात् तर्हिरू
परसगंधस्पर्शान् युगपत्प्रत्येमीतिकथमनुव्यवसायइ
तिचेन्नशीघ्रसंचारिमनोजनितेषुपंचसुसूक्ष्मसुउपनीतेषुज्ञाने
षुयौगपद्याभिमानात् व्यासंगोपिकरणधर्माधीनइतिचे
त् नउक्तोत्तरत्वात् बुभुत्साधीनोव्यासंगइतिचेन्नसर्व
बुभुत्सायांसर्वविषयकसर्वोदयप्रसंगात् बुभुत्सायाअथ
भिमतार्थग्राहींद्रियमनःसंबंधमात्रफलकत्वात् तस्माज्ज्ञा
नयौगपद्यासिध्यद्यनुमनसस्तोधर्मिग्राहकमानबाधि
तावैभवहेतवः किंचमनोवैभवेयादेमेसुखंशिरसिवेदनेति
प्रादेशिकत्वंसुखादीनांनस्यात् विभुकार्याणामसमवायि
कारणावच्छिन्नदेशेउत्पादनियमात् तत्रापिसुखादी
नामणुदेशोत्पत्तिरितिचेत् नअसमवायिकारणंविभुका
र्यस्वदेशेजनयत्येवेतिनियमात् तथाचनिमित्तचंदनाद्य
वच्छेदादधिकदेशेपिजननाविरोधात् ममापिनिमित्तस
मवधानानुरोधइतिचेन्नउक्तनियमभंगप्रसंगात् किंचा
त्मनाविभुनोमनसःसंयोगोपिकथंस्यात् अजोसाविति
चेन्नविभागस्याप्यजत्वप्रसंगात् अवच्छेदभेदेनोभावप्य
विरुद्धावितिचेत् नसंयोगविभागयोरवच्छेदभेदस्यस्वका
रणाधीनत्वात् अजयोस्तुतदभावादितिदिक् ननुसुखा
द्युपलब्धिःकरणसाध्याक्रियात्वात् रूपोपलब्धिवदित्या
द्यनुमानात् युगपज्ज्ञानानुत्पत्त्यावाप्यमनःसिद्धं तत्करण

नयातथाचतस्यद्रव्यत्वंनित्यत्वंचकुतइत्यतआह २ तस्यद्र
व्यत्वनित्यत्वेवायुनाव्याख्याते यथावायविद्रव्यानुमितोवा
युपरमाणुर्गुणवत्त्वात् क्रियावत्त्वाच्चनित्यंद्रव्यंतथायुग
पज्ज्ञानानुत्पत्त्यानुमितंमनोगुणवत्त्वाद्द्रव्यंनहितस्येंद्रियसं
योगमंतरेणज्ञानोत्पादकत्वंयेनगुणवत्त्वंनस्यात् किंचम
नोसुखादिसाक्षात्कारइंद्रियकरणकःसाक्षात्कारत्वात्रूपा
दिसाक्षात्कारवदितींद्रियत्वेनमनःसिद्धंइंद्रियत्वंचज्ञानका
रणमनःसंयोगाश्रयत्वमित्यपत्त्ससिद्धमेवमनसोद्रव्यत्वंनि
त्यत्वंचानाश्रितत्वात्तस्यावयवकस्यनार्थप्रमाणाभावादना
श्रितत्वमिति ततकिंप्रतिशरीरमेकमनेकंवेतिसंदेहेनिर्ण
यकमाह ३ प्रयत्नायोगपद्याच्चैकं मनःप्रतिशरीरमि
तिशेषः यद्येकैकस्मिन्नपिशरीरेबहूनिमनांसिस्युस्तदाज्ञा
नप्रयत्नानांयौगपद्यंस्यात्यत्तानर्तकीकरचरणांगुली
षुयुगपत्कर्मदर्शनाद्युगपदेववहवःप्रयत्नाउत्पद्यंतइति
मतंतदयुक्तंमनसःशीघ्रसंचारादेवतदुपपत्तेः अविनस्य
द्रवस्ययोग्यानविशेषगुणानांयौगपद्यानभ्युपगमात्ए
तेनैकस्मिन्नपिशरीरेपंचमनांसितेषांद्वित्रिचतुःपंचानां
तत्तदिंद्रियसंयोगेद्वेत्रीणिचत्वारिपंचवाज्ञानानियुपज्जायं
तइतिमतंनिरस्तंकल्पनागौरवप्रसंगात्यौगपद्याभिमानंतु
समर्थितएवरसनेंद्रियावच्छेदेनत्वगिंद्रियसंबंधेनसति
कोगुडइतिज्ञानद्वययौगपद्यापत्तिरपिकरणधर्मत्वादेव
नास्तिद्वित्रिछिन्नगोधाभुजगादावप्यवयवद्वयेकर्मस्वा।

उज्ज्ञानायौगपद्या

द्राद्यभिघाताद्वा मनस एवाशुसंचरो ह्यातदानीमेवादृष्टेन
यं शुमनोंतरोपग्रहाद्वा यत्तु मनोवयव्येव जलौकावत्तत्सं
कोचविकाशाभ्यां ज्ञानयौगपद्यायौगपद्ये इति तत्तदवयव
कल्पनागौरवप्रतिहतमिति दिक् ॥ इदानीं क्रमलब्धप्रयो
जनमादर्शयन्नेवात्मपरीक्षाशेषं वर्त्तयिष्यन्नाह ॥ प्राणा
पाननिमेषोन्मेषजीवनमनोगतीन्द्रियांतरविकाराः सु
खदुःखेच्छाद्वेषप्रयत्नाश्चात्मनो लिंगानि ॥ प्रसिद्धिर्ज्ञान
मेव केवलमात्मनो लिंगमिति न मंतव्यं प्राणादयोपि सं
त्यात्मनो लिंगानि तथाहि शरीरांतश्चारिणि समीरणे प्रा
णापानलक्षणे ऊर्द्धाधोगती उत्क्षेपणावक्षेपणे मुसला
दाविव प्रयत्नं विनानुपपद्यमाने यस्य प्रयत्नाद्भवतः स
नूनमात्मा न हि तिर्य्यग्गमनस्वभावस्य वायोरेवं स्वभाव
विपर्य्ययो विना प्रयत्नात् न च विरुद्धदिक्क्रिययोर्वाय्वोः
सलिलयोरिवोर्द्धगतिः स्यादिति वाच्यमेवं सत्यूर्द्धगमन
मेव स्यान्नत्वधोगमनं कुक्कारादौ वा तिर्य्यग्गमनं तथा चास्ति
कश्चिद्यः प्रयत्नेन वायुमूर्द्धमधो वा प्रेरयति सुषुप्तिदशा
यां कथं प्राणापानयोरूर्द्धाधोगती इति चेत् न तदानींयो
न्यप्रयत्नाभावेपि प्रयत्नांतरस्य सद्भावात् स एव जीवन
योनिः प्रयत्न इत्युच्यते एवं निमेषोन्मेषावपि शरीरस्या
धिष्ठातारमनुमापयतः ॥ तथा हि निमेषस्तावदक्षिपक्ष्म
णोः संयोगजनकं कर्म उन्मेषस्तयोरेव विभागजनकं
कर्म एते च कर्मणी नोदनाभिघातादृष्टकार्यांतरसंभवे

मनिरंतरमुपलभ्यमाने प्रयत्नं विनानो सद्येते यथादारुपुत्र
कनर्त्तनं कस्यचित्प्रयत्नात्तथाक्षियस्य नर्त्तन।मपि तेनानुप्र
यत्नवाननुमीयते एवं जीवनमप्यात्मलिंगं तथापि जीवनपदे
लक्षणया जीवनकार्य्ये वृद्धिक्षतभग्नसंरोहणादि लक्षय लघीयो
ति तथा च यथा गृहपतिर्भग्नस्य गृहस्य निर्माणं स्वीयो वा
गृहं वर्द्धयति तथा देहाधिष्ठाता गृहस्थानीयस्य देहस्याहा
रादिना वृद्धिमुपचयं करोति क्षतं च भेषजादिना प्ररोहय
ति भग्नं च करणादि संरोहयति तथा च गृहपतिरिव देहा
स्याधिष्ठिता सिध्यतीति एवं मनोगतिरप्यात्मलिंगं तथा
हि मनस्तावन्मूर्त्तमणु चेति पूर्वप्रकरणे साधितं तस्य चाभि
मतविषयग्राहिणींद्रिये निवेशनमिच्छाप्रणिधानाधीनं त
था च यस्येच्छाप्रणिधानेन मनः प्रेर्यते स स्वात्मेत्यनुमीय
ते यथा गृहकोणावस्थितो दारकः कंदुकं लाक्षागुटकं वा गृ
हाभ्यंतर एव तस्ततः प्रेरयति ननु दारुपुत्रनर्त्तयिता गृहयति
द्दारको वा न शरीरादन्यो यो दृष्टांतः स्यात् किंच शरीरमेव चै
तन्याश्रयः अहंकारास्पदत्वात् भवति हि गौरोहं स्थूलोह
मित्याद्यहंकारसामानाधिकरण्येन प्रत्ययः यत्तुबाल्येनु
भूतं यौवने वार्द्धके वा स्मरति तत्र चैत्रवच्छरीरभेदेपि स्मरण
न स्यान्नान्यदृष्टं स्मरत्यन्य इति तत्र चैत्रमैत्रयोर्भिन्नसंतान
त्वेन प्रतिसंधानं मास्तु बाल्यकौमारभेदेपि संतानैकत्वात्
कार्य्यकारणभावेन प्रतिसंधानमुपपद्यत इति तत्र ब्रूमः
पित्रानुभूतस्य पुत्रेणापि स्मरणप्रसंगः तत्र शरीरभेदेग्रहो

वाधकइतिचेत्‌ इहैवबालशरीरदृष्टेनैवस्वशरीरस्यग्रहा
त्प्रतिसंधानानुपपत्तेः अनुपलब्धिरपित्वकस्यबालस्यश
रीरभेदाग्रहस्यापिसत्वात्‌ ममशरीरमितिममकारसामा
नाधिकरण्येनाहंकारस्याभानात्‌ ममात्मेत्यत्रापितथेति
चेत्‌ नतत्रममकारस्यौपचारिकत्वात्‌ राहोःशिरइतिवद
भेपिषष्ठ्युपपत्तेः हिंसादिफलंचकर्त्तरि नस्यात्‌ शरीरस्या
न्यान्यत्वात्‌ पातकमितोभूतचेतनिकस्यकृतहानम
कृताभ्यागमश्चदोषइतिदिक्‌ इंद्रियांतरविकारात्‌ ख
ल्वपिदृश्यतेहिनागरंगस्यचिरविल्वस्यवारूपविशेषस
हचरितंरसविशेषमनुभूयपुनस्ताहृशंफलमुपलभमान
स्यरसगर्द्धिप्रवर्त्तितोदंतोदकसंप्लवः सचनाम्लरसानुमि
तिमंतरेणानुमितिनव्याप्तिस्मृतिमंतरेणसाचनसंस्कारं
विनासचनव्याप्त्यनुभवमंतरेणसचनभूयोदर्शनमंत
रेणेतीयंज्ञानपरंपरानैकंकर्त्तारमंतरेणकार्य्यकारण
भूतासंभवतीतितयाचगौतमीयंसूत्रंइंद्रियांतरविका
रादिति सुखादयश्चज्ञानवदेवात्मलिंगानि द्रष्टव्याः तथा
हिसुखादिकंक्वचिदाश्रितंद्रव्याश्रितंवाकार्य्यवस्तुत्वात्‌
गुणत्वाद्वारूपादि तीतरवाधसहकृतंसामान्यतोदृष्ट
मेवाष्टद्रव्यानतिरिक्तद्रव्याश्रितत्वंविषयीकरोतिनहि
पृथिव्यादृष्टकानाश्रिताइच्छाद्रव्याश्रितेतिप्रतिज्ञाऽष्ट
द्रव्यातिरिक्तद्रव्याश्रितत्वंप्रकारमनादायपर्य्यवस्यति
यत्रतुप्रथमंनवाधावतारस्तत्राष्टद्रव्यातिरिक्तंद्रव्याश्रितं

त्वंव्यतिरेकिसाध्यमितिविभागः व्यापकतावच्छेदकप्र
कारिकैवानुमितिरिति तु तुच्छं येन विना प्रतीतिर्न्नपर्य्यवस्य
तितस्यैवतत्रप्रकारत्वात् अन्यथाद्यगुणकंकार्य्यमाश्रि
तंसत् क्वचिदाश्रितमवयवित्वादित्यादावकार्य्याश्रितत्वप्रका
रिकानुमितिर्न्नस्यात् ननुसिद्धान्तास्थिरत्वसतुनित्यत्व
तिकुतःकुतश्चद्रव्यमित्यतआह तथ्यद्रव्यत्वनित्यत्वेवा
युनाख्याते यथावायुपरमाणोरवयवकल्पनायां
नप्रमाणमतोनित्यत्वंतथात्मनोपियथागुणवत्त्वाद्वायुप
रमाणुर्द्रव्यंतथात्मापीत्यर्थः पूर्वपक्षमाह यत्तद्दत्तइति
सन्निकर्षेप्रत्यक्षाभावाद्दृष्टंलिंगन्नविद्यते सन्निकर्षे
सत्यपियत्तद्दत्तइतिचेत् प्रत्यक्षन्नास्तितदादृष्टंप्रत्यक्षतोगृ
हीतव्याप्तिकंलिंगन्नास्तियथावह्निनाप्रत्यक्षेणसहचरि
तोगृहीतोधूमोवह्नौदृष्टंलिंगंतथात्मसाधकंलिंगंदृष्टन्ना
स्तीत्यर्थः ननुप्रत्यक्षदृष्टव्याप्तिकस्यदृष्टलिंगस्याभावे
पिसामान्यतोदृष्टमेवलिंगंभविष्यतिनहिततोनानुमितिरि
त्याशंक्यपुनः पूर्वपक्षमाह सामान्यतोदृष्टाच्चाविशेषः
सामान्यतोदृष्टमपिलिंगंभवति नतुततआत्मत्वेनष्टद्र
व्यातिरिक्तद्रव्यत्वेनवात्मसिद्धिःकिंतुतेनेच्छादीनांक्व
चिदाश्रितत्वस्यैवमात्रासिद्धत्वञ्चनात्ममननौपयिकमित्यर्थः
तदेतदाहाविशेषइति तत्किंयोपह तपाम्यासआत्मा
इत्याद्यागमोनर्थकएवेत्याशंक्यसएवाह तस्मादागमि
कः आगममात्रसिद्धएवात्मानत्वनुमेयः दृष्टसामान्य

तोदृष्टयोर्लिंगयोरभावात् तस्मात्सम्यगुपनिषदांश्रवणात्तत्सा
क्षात्कार उत्पद्यतेनतुमननप्रण्याडिकया तथाचमननप्रयो
जनकमिदंतंत्रमतंत्रंदृष्टंहिभ्रूतदशकनदीसंतरणादावुप
देशमात्रादेवसाक्षात् कोविज्ञानं तदेवंत्रिभिः सूत्रैः पू
र्वपक्षेसिद्धांतवाद्याह अहमितिशब्दस्यव्यतिरेकान्ना
गमिकं नागममात्रंप्रमाणमात्मनिकिंत्वहमितिपदमा
त्मपदंवात्माभिधेयंपदत्वात् घटादिपदवदित्यनुमानाद
प्यात्मसिद्धेः ननुपृथिव्याद्येवतदभिधेयंस्यादित्यतआहव्य
तिरेकादितिपृथिव्यादितोऽहमितिपदस्यव्यतिरेकाद्व्या
वृत्तेरित्यर्थः नहिभवत्यहंपृथिवीअहमापोहंतेजोहंवायुरह
माकाशमहंकालोहंदिगहंमनइतिव्यपदेशः प्रत्ययोवाश
रीरेभवतीतिचेत् नपरशरशरीरेपितत्प्रसंगात् सशरी
रेभवतीतिचेत् नस्वस्यात्मभिन्नस्यानिरुक्तेः ममशरीरमि
तिवैयधिकरण्येनप्रत्ययाच्चनन्विदमपिसामान्यतोदृष्ट
मेवतच्चविशेषापर्य्यवसन्नमितित्भूषितमेवेति नअहंपदे
अहंत्वमात्मत्वमेवप्रकारस्तयाचपक्षधर्मताबलादेवाहंत्व
स्यप्रवृत्तिनिमित्तत्वंपर्य्यवसन्नंतच्चानन्यसाधारणमेवेति
विशेषसिद्धेः एवंसामान्यतोदृष्टादपिवाधसहकृताद्वि
शेषसिद्धिः यच्चोक्तंश्रवणादेवसाक्षात्कारः किमनेनेतित
दयुक्तंनहिमननमंतरेणसंशयकस्याश्रद्धामलक्षालनंनच
तदंतरेणतत्रनिदिध्यासनाधिकारोनच निदिध्यासनमंत
रेणासतीसनमिथ्याज्ञानोन्मूलनक्षमोदिङ्मोहादौदृष्टमिति
त्वसाक्षात्कारः श्रवणादेवहिकामातुरस्यकस्मात्कामिनीसाक्षात्कारः नहिश्रावणिकमानुमानिकंवा ज्ञानंमिथ्याज्ञानोन्मूलनं

भाव: ननु तथापि परोक्षे आत्मनि कथं संकेतग्रह इति चेत् क
एवमाह नात्मा प्रत्यक्ष इति किंतु मनसा संयोगप्रत्यक्षत्वात्मग्र
हात् कथमन्यथाहं सुखी जानामीच्छामि यतो दुःखीत्यादिप्र
त्ययः नह्ययं मवस्तुकः संदिग्धवस्तुको वा नीलादिप्रत्यय
वदस्यापि निश्चितवस्तुकत्वात् न च लैंगिकः लिंगज्ञानमंतरे
णापि जायमानत्वात् नापि शाब्दस्तदनुसंधानाननुविधाना
त् प्रत्यक्षाभासोयमिति चेत् तर्हि क्वचिदनाभासविषयोपि नह्य
प्रमितमारोप्यत इत्यावेदयिष्यते एवं चेत् किमनुमानेनेति
पूर्वपक्षवाद्याह यदि दृष्टमनुक्षमहं देवदत्तोहं यज्ञदत्त इ
ति इति। दृष्टो ज्ञानप्रकारमाह दृष्टमिति भावे क्तप्रत्ययांतं अ
नुक्षमित्यध्यक्षं तेनायमर्थः अयं देवदत्तोयं यज्ञदत्त इति प्रका
रकं दृष्टदर्शनमध्यक्षमेवास्ति यदि तदा किमनुमानप्रयासेन
हि करिणि दृष्टे स्वीकारेण तमनुमिनुते बुधे नुमातारः अत्र सि
द्धांत्याह दृष्ट आत्मनि लिंगे एक एव दृढत्वात् प्रत्यक्षवत् प्रत्ययः
दृष्टे प्रत्यक्षेण गृहीत आत्मनि लिंगे संभूतसामग्रीके सत्येक
एवैकवैषयिक एव प्रत्ययः प्रत्यय इति निरस्तसमस्तविभ्रमा
शंकित्वमाह क तएवमित्यत आह दृढत्वात् प्रमाणांतरोपप्लवेना
न्यथाभावशंकानिवर्तकत्वात् अत्र दृष्टांतमाह प्र
त्यक्षवदिति यथा दूरान्नोपप्रत्यक्षे सत्यपि संवादार्थमालोक
लिंगे नापि तदनुमानं तदुक्तं प्रत्यक्षपरिकलितमप्यर्थम
नुमानेन बुभुत्सन्ते तर्करसिका इति इदमत्राकूतं यद्यात्मा क
दाचित्प्रत्यक्षो चेत्तसि भासत एव तथाप्यहं गौरोहं कृश इत्या

दिविरोधिप्रत्ययांतरतिरस्कृतो न तथास्येमासादयति विद्युत
संपात संजात ज्ञानवत् तत्र लिंगे मान्यथासिद्धे नै ज्ञानांतर
मुत्पद्यमानं पूर्वज्ञानविषयमेव स्थिरीकरोति किं च श्रोतव्यो
मंतव्य इत्यादि विधिबोधितस्य मननस्येष्टसाधनतावग
तावनुमित्यावश्यमात्मन्यनुमानप्रवृत्तिः तद्व्यतिरेके नि
दिध्यासनासंभवे साक्षात्काराभावेऽपवर्गादिति भावः दे
वदत्तोऽहं यज्ञदत्त इति प्रतीतिभ्रमाभिधाभिधानं प्रत्यात्म
वेदनीयत्वं सूचयितुं ननु यदि यज्ञदत्तोऽहमित्याकारः प्रत्य
य आत्मनि तदा यज्ञदत्तो गच्छतीति गमनसामानाधिकर
ण्याभानमनुपपन्नमत आह देवदत्तो गच्छति यज्ञदत्तो
गच्छतीत्युपचाराच्छरीरे प्रत्ययः अस्ति हि अहं गौरोऽहं स्थू
ल इति प्रत्ययोऽस्ति च मम शरीरमिति भेदप्रत्ययस्तत्र देवद
त्तो गच्छतीति गति सामानाधिकरण्यानुभवो व्यवहार
श्च भौक्तः ममेति प्रत्ययस्य यथार्थत्वात् यद्यपि देवदत्त
त्वं शरीरवृत्तिर्जातिस्तेन देवदत्तो गच्छतीति मुख्य एव प्रयो
गो यथार्थ एव च प्रत्ययस्तथापि देवदत्तपदैस्तदवच्छिन्न आ
त्मनि प्रयुक्तं चेत्तदौपचारिको बोद्धव्यः अत्र शंकते सं
दिग्धस्तूपचारः तु शब्दः पूर्वपक्षद्योतकः आत्मश
रीरयोस्तावदयमहमिति प्रत्ययः प्रयोगश्च दृश्यते न तत्र क
मुख्यः क औपचारिक इति संदेहः १४ अहमिति
प्रत्ययात्मनि भावात् परत्राभावादर्थांतरप्रत्यक्षः अर्थां
तरमात्मस्वरूपं प्रत्यक्षं यस्य प्रत्ययस्य सप्रत्ययोऽर्थांतरप्रत्यक्षः

अयमर्थः अहमितिप्रत्ययस्य प्रत्यगात्मनिस्वात्मनिभावात्
परत्रपरात्मन्यभावादर्थांतरेस्वात्मन्येवमुख्यः कल्पयितुमुचि
तः यदितु शरीरेमुख्यः स्यात्तदावहिरिंद्रियजः स्यात् नहि श
रीरंमानसप्रत्यक्षंमानसश्चायमहमितिप्रत्ययः वहिरिंद्रिय
व्यापारमंतरेणापिजायमानत्वात् तस्मान्मानसएवंमनसश्च
वहिरस्वातंत्र्येणशरीरादावप्रवृत्तेरिभावः किंचयदिशरीरे
स्यात् परशरीरे स्यात् आत्मनियदिस्यात्तदापिपरात्मनिस्या
दितिचेत् नपरात्मनः परस्यातींद्रियत्वात् तद्विशेषगुणाना
मयोग्यत्वात् योग्यविशेषगुणोपग्रहेणतस्यायोग्यत्वात् न
केवलमात्मनः दृष्टं शीलंकिंतुद्रव्यमात्रस्यद्रव्यंहियोग्यविशे
षगुणोपग्रहेणैवप्रत्यक्षंभवति आकाशमपितर्हि शब्दोप
ग्रहेणप्रत्यक्षंस्यादितिचेत् स्यादेवयदि श्रोत्रंद्रव्यग्राहकं भ
वेदाकाशंवारूपवत्स्यात् आत्मनोपिनिरूपत्वं तुल्यमितिचे
त् वहिर्द्रव्यमात्रएवप्रत्यक्षतांप्रतिरूपवत्त्वस्यतंत्रत्वात् प्र
सगिस्यंशब्दोन्यव्यावृत्त्यमाह पुनः शंकते देवदत्तोग
च्छतीत्युपचारादभिमानाच्छरीरप्रत्यक्षोहंकारः अहंकारो
हमितिप्रत्ययः सचशरीरप्रत्यक्षः शरीरंप्रत्यक्षंविषयोयत्रस
शरीरप्रत्यक्षः देवदत्तोगच्छतीत्युपचारात्तावत्प्रयोगप्रत्ययो
वान्वयासमाहितः सचोपचारआभिमानिकः यतोहंगौरोहं
कृशः सोभागिनोहंपुनरुक्तजन्मप्रादयः प्रत्ययाप्रयोगाश्चो
पचारेणासमर्थयितुमशक्याइत्यर्थः सिद्धांतमाह संदिग्ध
स्तूपचारः तुशब्दोयंसिद्धांतमभिव्यनक्ति उपचारोयमाभि

मनसि उपचारोयमाभिमानिकः किंतु शरीरएवायमहंप्र
त्ययइतियदुक्तं तत्रापिसंदेहएवेत्यर्थः तथाचप्रत्ययस्यो
भयत्रापिकूटसाक्षित्वेन विशेषावधारणाययतितव्यं तत्र
यत्नेक्रियमाणेमिलीताक्षस्याप्यहमिति प्रत्ययदर्शनाच्छरी
रभिन्नेबहिरिंद्रियागोचरे वस्तुनिसमंतव्यः शरीरेभवन्
परशरीरेपिस्यात् चक्षुर्नैरपेक्ष्येण चस्यात् अहंकृशः
स्थूलोवासुखीति कथंसामानाधिकरण्यमितिचेत् न सुखा
द्यवच्छेदकत्वेनापि तत्र शरीरभानसंभवात् सिंहनादवदि
दंगहनमितिवत् अहंत्वमात्रं शरीरे समारोप्यते मनसोप
स्थितं त्वगिंद्रियोपनीतमौष्ण्यमुष्णं जलमुष्णं शरीरमित्या
दिवत् सिद्धांतमुपबृंहयन्नाह ननु शरीरविशेषाद्य
ज्ञदत्तविष्णुमित्रयोर्ज्ञानं विषयः ज्ञानमिति योग्यंसुखदुः
खादिकमात्मगुणमुपलक्षयति यथायज्ञदत्तविष्णुमि
त्रयोः शरीरं परस्परभिन्नं तथा ज्ञानसुखादिकमपिभिन्नमे
वतथायि यज्ञदत्तस्येदं शरीरं तथायज्ञदत्तस्य ज्ञानेसुखादौवा
त्यन्नेअहंसुखीजानेयतेइच्छामीति ज्ञानादिकं विषयोभवति
योग्यशरीरविषयकत्वेन तदीयरूपादिवत्तदीयज्ञानादी
नामपिप्रत्यक्षत्वसंभवात् नचसंभवति तस्मात् ज्ञानसुखा
दीनां शरीरादन्यएवाश्रयोवक्तव्यइतिभावः शरीरविशे
षात् शरीरस्यभेदादित्यर्थः तथाचशरीरभेदं प्राप्यज्ञानं
नतुविषयइतिल्यब्लोपेपंचमी नन्वात्मानप्रत्यक्षः नीरू
पद्रव्यत्वान्निरवयवद्रव्यत्वादाकाशवत्तथाचाहंकृशोगौ

रइतिबुद्धेः शरीरमेवविषयोवाच्यः क्वचिदहंसुखीत्यादि
धीरपियद्यप्यस्तितथाप्याश्रयमंतरेणाभासमानां सुखादी
नांशरीरेसमारोपइत्येवकल्पयितुमुचितंयथोल्लंसुरभि
जलमित्याश्रयमंतरेणाप्रतीयमानयोर्वौल्यसौरभयोर्जले
समारोपः नन्वेतदनुरोधेनजलमिप्रत्ययस्यापिप्रसिद्धजल
मंतरेणात्मविषयत्वंतथाहमित्यप्यहंत्वंशरीरएववास्तवं
सुखादिकंतुकदाचित्तत्रारोप्यतेतेनात्मनिप्रत्यक्षाकारंज्ञा
नंनास्त्येवसुखाद्याधारत्वेनयत्कल्पनीयंतदागमसिद्धं
भवतुनतत्रापिग्रहइत्यतआह ८ अहमितिमुख्ययोग्या
भ्यांशब्दवद्व्यतिरेकाद्व्यभिचाराद्विशेषसिद्धेर्नागमिकः अ
यमर्थः अहंसुख्यहंदुःखीतिप्रत्ययोनागमिकोनाशब्दोना
पिलैंगिकः शब्दलिंगयोरनुसंधानमंतरेणापिजायमान
त्वात् प्रत्यक्षत्वेचनिरूपत्वेनिरवयवत्वेचयद्बाधकत्वमु
क्तंतन्नहिरूपवत्त्वानेकद्रव्यवत्त्वयोः प्रयोजकत्वात् मानस
प्रत्यक्षतावत्तदंतरेणापिनत्वनुस्यादेवंयद्यात्मनिप्रमाणंस्या
त्तदेवतुनास्तीत्यतआहशब्दवद्व्यतिरेकाद्व्यभिचाराद्विशे
षसिद्धेरितियथानित्यादिषुद्रव्येषुशब्दस्यव्यतिरेकोऽ
व्यभिचारीनियतस्तेनतदाश्रयस्याष्टद्रव्यातिरिक्तस्याकाश
रूपस्यविशेषस्यसिद्धिरेवमिच्छायाःपृथिव्यादिषुव्यतिरेक
स्याव्यभिचारात्तदाश्रयेणाष्टद्रव्यातिरिक्तेनभवितव्यं
एतावता तत
नानुभावनताप्यानुमानिकआत्मानतुप्रत्यक्षइत्यतआह
अहमितिमुख्ययोग्याभ्यामिति अहमितीतिकारणेनज्ञा
ग्या

वै०सू०टी० नाकारमाह ते नाहमिति ज्ञानं शब्दलिंगानुसंधानमंतरेण
५२
52
निमीलिताक्षस्यापदुत्पद्यते तन्मुख्ये नाहं ब्रवता योग्येन प्र
माणासिद्धे नोपपादनीयं न तु शरीरादिना तत्र व्यायाव्यति
रेकाव्यभिचारात मुख्ययोग्याभ्यामित्यनंतरमुपपादनीय
मिति पूरणीयं आत्मनि प्रमाणानि बहूनि ग्रंथगौरवभिया
सक्तानि मयूखे व्याख्यानि आत्मपरीक्षाप्रकरणं समाप्ये
दानीमात्मनानात्वप्रकरणमारभते तत्र पूर्वपक्षसूत्रं
सुखदुःखज्ञाननिष्पत्त्यविशेषादैकात्म्यं एक एवात्मा चैत्र
मैत्रादिदेहभेदेपि कुतः सुखदुःखज्ञानानां निष्पत्तेरुत्पत्ते
रविशेषात सर्वशरीराविच्छेदेन सुखदुःखज्ञानानामुत्पत्तिरे
विशिष्टैवयतः यद्यात्मभेदसाधकं लिंगांतरं भवेत्तदा सि
ध्येदात्मभेदः न च तदस्ति यथा तत्तत्प्रदेशावच्छेदेन शब्दनि
ष्पत्तावपि शब्दलिंगाविशेषादेक एवाकाशः यौगपद्यादिप्र
त्ययलिंगाविशेषादेक एव कालः पूर्वापरादिप्रत्ययलिंगा
विशेषादेकैकैव दिक् सिद्धांतमाह व्यवस्थातो नाना
नानाआत्मानः कुतः व्यवस्थात व्यवस्था प्रतिनियमः य
था कश्चिदाढ्यः कश्चिद्रंकः कश्चित्सुखी कश्चिद्दुःखी कश्चि
दुच्चाभिजनः कश्चिन्नीचाभिजनः कश्चिद्विद्वान् कश्चि
ज्ज्ञात्मइतीयं व्यवस्थात्मभेदमंतरेणानुपपद्यमाना साध
यत्यात्मनां भेदं न चैत्मभेदे न वात्यकौमारवार्द्धकभेदे न
वा एकस्यात्मनो यथा व्यवस्था तथा चैत्रमैत्रादिदेहभे
देपि स्यादिति वाच्यं कालभेदे न विरुद्धधर्माध्यासमैभवात

प्रमाणांतरमाह शास्त्रसामर्थ्याच्च शास्त्रं श्रुतिः तया

प्यात्मनोभेदप्रतिपादनात् श्रूयते हि द्वे ब्रह्मणी वेदितव्ये

इत्यादि तथा द्वा सुपर्णा सयुजा सखाया समानं वृक्षं परि

षस्वजाते इत्यादि च इति श्रीशंकरेकाणादसूत्रसंस्का

रे तृतीयोध्यायः समाप्तः ३ पृथिव्यादीनां नवाना

मुद्देशं लक्षणं परीक्षां निर्वर्त्य प्रकृतेर्म्मूलकारणतां साख्या

भिमतां निराचिकीर्षुः परमाणूनां मूलकारणत्वं पृथिव्या

द्यंतर्भावं च सिसाधयिषुर्नित्यत्वसामान्यलक्षणं तावदाह

सदकारणवन्नित्यं न कारणवदित्यकारणवत् परसंस्का

रात् तदेवं घटादीनां व्यवच्छेदः तथापि प्रागभावेति व्याप्तिरि

त्यत आह सदिति सत्तायोगीत्यर्थः समवायविशेषपदार्थ

योः सत्तैकार्थसमवाय एव सत्तायोगः सामान्यांतरस्य च स

त्तायाश्च सत्स्वप्रविषयत्वेव सत्तायोगः स च प्रत्ययो वस्तुस्व

रूपमात्रनिबंधन इत्यन्यदेतत् न चान्यत्रापि तथैवास्तु किंस

त्ये तिवाच्यं अनुगतमतेस्तत्सिद्धेरुक्तत्वात् नित्यसामान्या

मभिधायेदानीं परमाणुमधिकृत्याह तस्य कार्यं लिंगं

तस्य परमाणोः कार्यं घटादि लिंगं तथा च गोतमीयं सूत्रं व्य

क्ताद्व्यक्तस्य निष्पत्तेः प्रत्यक्षप्रामाण्यात् अवयवावयविप्रसं

गस्तावदनुभूयते स यदि निरवधिः स्यान्मेरुसर्षपयोः परि

माणभेदो न स्यात् अनंतावयवारब्धत्वाविशेषात् न च परि

माणप्रचयविशेषाधीनो विशेषः स्यादिति वाच्यं संख्या

विशेषाभावात्तयोरप्यनुपपत्तेः प्रलयावधिः स्यादिति वे

वै० सू० वृ०
५३
53

नु अंत्यस्य कस्यचिन्निरवयवत्वे प्रलयस्यैवानुपपत्तेः अव
यवविभागविनाशयोरेव द्रव्यनाशकत्वात् विभागश्चना
वधिः तस्यैकाश्रयत्वानुपपत्तेः तस्मान्निरवयवं द्रव्यमवधिः
सएव परमाणुः नच त्रसरेणुरेवावधिः तस्य चाक्षुषद्रव्य
त्वेन महत्वादनेकद्रव्यत्वाच्च महत्वस्य चाक्षुषप्रत्यक्षे कार
णत्वमनेकद्रव्यवत्त्वमाहात्म्ये च अन्यथा महत्त्वमेव न स्यात् क
स्य कारणत्वं भवेत् नच त्रसरेण्ववयवा एव परमाणवः म
हदारंभकत्वेन तेन तेषामपि सावयवत्वानुमानात् तंतुवत्
कपालवच्च तस्माद्यत्कार्य्यं द्रव्यं तत्सावयवं यच्च सावयवं तत्का
र्य्यं द्रव्यं तथाच यतोवयवात् कार्य्यत्वं निवर्त्तते तत्र सावय
वत्वमपीति निरवयवो परमाणुसिद्धिः तदुक्तं प्रशस्तदेवाचा
र्य्यैः साच द्विविधा नित्या चानित्या चेति इदानीं परमाणो
रूपादिसिद्धये प्रमाह कारणभावात्कार्य्यभावः रूपा
दीनां कारणे सद्भावात् कार्य्ये सद्भावः कारणगुणपूर्वका
हि कार्य्ये गुणा भवंति घटपटादौ तथा दर्शनादित्यर्थः इ
दानीं सर्वानित्यतावादिनिराकरणायाह अनित्य इ
ति विशेषतः प्रतिषेधभावः विशेषत इति षष्ठ्यंतात्तसि
: तथाच विशेषस्य प्रतिषेधस्तदास्याद्यद्यनित्य इति प्रत्य
यः शब्दप्रयोगश्च न स्यात् नञ उत्तरपदार्थनिषेधार्थत्वा
त् तत्कथं नित्याभावे अनित्य इति स्यात् भवति च ततो नित्यम
स्तीति सिद्धं यद्वा अनित्य इति न नित्यः परमाणुरित्यनेन
प्रकारेण नित्यस्य त्वया प्रतिषेधः कर्त्तव्यः अनेनैव प्रका

रेण प्रतिषेधो न सिध्यति सिद्धासिद्धिप्रतिहतत्वात् सूत्रं चैवं यो
जनीयं अकारः स्वतंत्र एव प्रतिषेधवचनोऽभावो ना: प्रतिषे
धवचनादूति तया चानित्य इति नञनित्य इत्यर्थः प्रतिषेधभावः
प्रतिषेधस्वरूपं तेन न नित्य इति विशेषस्य नित्यस्य प्रतिषेधस्व
रूपं तच्च न संभवतीति शेषः ननु परमाणुर्न नित्यः मूर्तत्वा
त् घटवत् एवं रूपवत्त्वरसवत्त्वादयः प्रत्येकं हेतव उन्नेयाः
एवं षट्केन युगपद्योगात् परमाणोः षडंशता तथा च सावय
वत्वात् अव्याप्यवृत्तिसंयोगाश्रयत्वात् किंच परमाणोर्मध्ये
यद्याकाशमस्ति तदा सच्छिद्रत्वेनैव सावयवत्वं अथ नास्ति तदा
काशस्यासर्वगतत्वप्रसंगः किंच छायावत्त्वादावृत्तिमत्त्वात् अ
पि च यत्सत् तत् क्षणिकमित्यादिक्षणिकत्वसाधकानुमानाद
पि परमाणोरनित्यता तथा वै तावती चेदनुमितिप्रसंगः परात् तदाक्ष
यमुच्यते परमाणुर्नित्य इत्यत आह ५ अविद्या परमा
णोरनित्यत्वविषया सर्वाप्यनुमितिरविद्या भ्रमरूपा आभा
सप्रभवत्वात् आपाततो धर्मिग्राहकमानबाधः सर्वत्र विपक्ष
बाधकप्रमाणशून्यत्वाद्व्याप्यत्वासिद्धिः क्वचित्स्वरूपासिद्धि
५४वे रित्यादिसमानतंत्रेऽन्वेष्टव्यं ननु यदि परमाणुरस्ति कथमिं
द्रियेण न गृह्यते रूपवत्त्वस्पर्शवत्त्वादयश्चेंद्रियकत्वप्रयो
जकास्त्वयैवोपपादिता इत्यत आह महत्यनेकद्रव्यव
त्त्वाद्रूपाच्चोपलब्धिः महति महत्त्ववति द्रव्ये महच्छब्दात् प
रिमाणवाचकाद्गुणवचनान्मतुपो लोपात् अनेकद्रव्यत्वा
दिति अनेकं द्रव्यमाश्रयो यस्य तदनेकद्रव्यं तद्यस्यास्ति

तदनेकद्रव्यवत् तस्मादनेकद्रव्यवत्त्वात् एवं सति वायुरपि
प्रसक्तः स्यात् तदुक्तं रूपाच्चेति उद्भूतादनभिभूतादिति वस्य
तेउपलब्धिरिति वहिरिंद्रियेणेति शेषः तथा च परमाणोर्म
हत्त्वाभावादनुपलब्धिरित्युक्तं भवति अनेकद्रव्यवत्त्वं वा
श्रिता नेकद्रव्याश्रितत्वं तत् अवयवबहुत्वाधीनमहत्त्वाश्रयत्वं वा
न च महत्त्वे नैवानेकद्रव्यवत्त्वामन्यथासिद्धमिति वाच्यं वैप
रीत्यस्यापि संभवात् जन्येन जनकस्यान्यथासिद्धिर्न तु ज
नकेन जन्यस्येति चेत् न जन्यजनकयोर्युगपदन्वयव्य
तिरेकग्रहे अन्यथासिद्ध्यभावात् अन्यथा श्यामयादिना दंडा
दीनामन्यथासिद्धिप्रसंगात् महत्त्वोत्कर्षात् प्रसक्तोत्का
र्षो दूरादाविति चेन्न अनेकद्रव्यत्वोत्कर्षस्यापि तत्र सं
भवाद्धि निगमनाविरहात् किंच मर्कटकीटसूत्रजाले मह
त्त्वचतुष्टयादिमति दूरादप्रसक्षे मर्कटमात्रप्रसक्षताऽ
नेकद्रव्यवत्त्वोत्कर्षाधीने एवं महत्त्वोत्कर्षस्य जाले वर्तमान
त्वात् एवं सत्समंततु घटितपटादौ दूरस्थे महत्त्वोत्कर्षेपि स्व
स्यपरिमाणमुद्गरादिप्रसक्षे दृष्टव्यं ननु एवमपि मध्यंदि
नोल्काप्रकाशस्य चाक्षुषस्य चरमेर्वायोर्वा स्पर्शसमवायेन
रूपसमवायिनो महतश्चोपलंभः स्यादत आह सत्यपि
द्रव्यत्वे महत्त्वे रूपसंस्काराभावाद्वायोरनुपलब्धिः रूपसंस्का
र पदे न रूपसमवायो रूपोद्भवो रूपानभिभवश्च विवक्षि
तः तेन यद्यपि वायो य एव स्पर्शे समवायः स एव रूपसम
वायस्तथापि रूपनिरूपितो नास्ति तत्र रूपासंगाभावस

त्वात् चाक्षुषे चरमे रूपसंस्कार उद्भवरूपो नास्ति मध्यंदिनो
ल्काप्रकाशे च रूपसंस्कारे रूपानभिभवो नास्तीति न तेषां प्र
त्यक्षता एवं ग्रीष्मोष्मभर्जनकपालकनकादिषु रूपसंस्का
राभाव उन्नेयः वृत्तिकृतस्तु रूपं च रूपसंस्कारश्चेत्येकरू
पपदलोपः तेन रूपाभावाद्वाय्वोरनुपलब्धिः रूपसंस्कारा
भावाच्चक्षुरादीनामनुपलब्धिरित्याहुः एवं परमाणुनिस
नाप्रकरणानंतरं परमाणुलिंगतयोपयोद्भूतसंगसावहिर्द्र
व्यप्रत्यक्षताप्रकरणं वर्तयिष्यन्नाह अनेकद्रव्यसम हमाप्योपौद्घातेन गुण प्रत्यक्षताप्रकरणं
वायाद्रूपविशेषाच्च रूपोपलब्धिः रूपगतो विशेषो रूपवि
शेषः तच्चोद्भूतत्वमनभिभूतत्वं रूपत्वं च तस्माद्रूपस्योपल
ब्धिः नन्वेवं परमाणोर्द्व्यणुकस्य च रूपं स्यादेतस्यत उक्तं अ
नेकद्रव्यसमवायादिति अनेकपदं भूयस्त्वपरं तेनानेकानि
भूयांसि द्रव्याणाश्रयतया यस्य तदनेकद्रव्यं त्र्यसरेण्वप्रभृ
ति तत्समवायात् घटादयोप्यवयवद्वयारब्धाः परंपरयाऽ
नेकद्रव्याश्रया एव रसस्पर्शो रूपत्वविरहाच्चाक्षुषत्वा
भावः चाक्षुषे तेजसि चोद्भूतत्वविरहात् उद्भवश्च रूपादिवि
शेषगुणगतो जातिविशेष एव रूपत्वादिव्याप्यः नन्वेवं शुक्ल
त्वसुरभित्वकटुत्वादिभिरपि परापरभावानुपपत्तिरेव तत्तद्व्या
प्यतन्नानात्वकल्पने तु कल्पनागौरवमुद्भवपदस्य नानार्थत्वं च
ति चेन्न वाह्यैकैकेन्द्रियग्राह्ययोग्यगुणत्वस्यैवोपाधे रू
द्भवत्वात् तदुपाधिविरहस्यैवानुद्भवात् अनुद्भवाभाव ए
वोद्भव इति केचित् तच्चिंत्यं अनुद्भवस्याप्येवं व्यवस्थापयितु

मशक्यत्वात् अतीन्द्रियविशेषगुणत्वमनुद्भवत्वमितिचेत् ए
वंतर्ह्यैंद्रियकविशेषगुणत्वस्यैवोद्भवत्वापत्तेः ऐंद्रियकत्वा
वच्छेदकं किमितिचेत् तुल्यं विशेषगुणेष्वेकैवोद्भवत्वंजातिः
गुणगतजातौपरापरभावानुपपत्तिर्न्नदोषायेत्यपिवदं
ति स्पर्शातिरिक्तानांरूपसामानाधिकरण्यमेववहिरिं
द्रियग्राह्यताप्रयोजकत्वमितिरूपग्रसत्त्वसामग्रीमभिधा
यतामन्यत्रातिदिशन्नाह तेनरसगंधस्पर्शेषु ज्ञानंव्या
ख्यातं तेनेतिरूपग्रसक्षज्ञानेसैसर्थः यथारूपविशेषा
द्रूपत्वानभिभूतत्वोद्भूतत्वाद्रूपोपलब्धिस्तथारसविशेषाद्रस
त्वोद्भूतत्वाद्रूपोपलब्धिस्तथारसविशेषाद्रसत्वोद्भूतत्वान।
भिभूतत्वलक्षण्याद्रसोपलब्धिरेवमितरत्रापियोज्यं अने
कद्रव्यसमवायश्चातिदेश्यः घ्राणरसनत्वगिंद्रियाणाम
नुद्भवाद्गंधरसस्पर्शानामग्रहणंपाषाणादावनुद्भवाद्गंध
रसयोः तद्वसनितयोरुपलंभात्तयोःपाषाणादावुपलंभ
एवनतुस्पष्टइत्येकेविशेषक्तावयवाप्पत्ते रूपानुद्भवानुद्भवा
त्तदग्रहणमेवंरसस्यापि उष्णेजलेतेजोरूपस्यानुद्भवात्स्प
र्शस्यचाभिभवात् विततकर्पूरचंपकादौरूपरसस्पर्शाना
मनुद्भवादनुपलंभः कनकादौरूपमुद्भूतमेवशुक्लत्वभा
स्वरत्वेपरमभिभूतेरूपमप्यभिभूतमित्येके कनकग्रहणंतु
रूपांतरसाहचर्य्यात् अभिभवश्चवलवत् सजातीयग्र
हणकृतमग्रहणंनतुवलवत्सजातीयसंबंधमात्रंव
लवत्सजातीयसंबंधस्याप्यग्रहणनिरूप्यतयाऽग्रहण

सैवोपजीव्यत्वात् नचाग्रहणप्रयोजकत्वेनबलवत्त्वसजातीयए
वोपजीव्यः अग्रहणस्यग्रहणप्रागभावस्यासंसर्गाभावस्यवातद
प्रयोज्यत्वात् ग्रहणध्वंसस्यचतत्राभावात् नवापितर्हिब
लवत् सजातीयग्रहणमित्यनुपपन्नमेवेतिचेत् अस्त्वेन
।थापिसजातीयस्यबलवत्त्वेदुर्बलत्वेवातादृशसंबंधसंबंध
ग्रहण ग्रहणएवप्रयोजकेइतिसएवाभिभवपदार्थः ननुगुरुत्वम
प्यनेकद्रव्यसमवेतंरूपमहत्त्वसमानाधिकरणंचेतिकथन्न
प्रत्यक्षमतआह तस्याभावादव्यभिचारः तस्यरूपत्वादेः
सामान्यस्योद्भवस्यगुरुत्वेऽभावान्नगुरुत्वंप्रत्यक्षंननुमाभूत्तत्र
रूपत्वादिकंतथापितत्सत्त्वंस्यादतआहअव्यभिचारइति
एकैकेंद्रियग्राह्यत्वंप्रतिरूपत्वादीनांपंचानांजातीनामव्य
भिचारोनियमएवयत्रैवरूपत्वादिपंचकेन्यतमत्तत्रैवबाह्यैके
केंद्रियग्राह्यत्वंतद्व्यतिरेकादित्यर्थः सूत्रेगुरुत्वाधिकार
स्यास्फुटत्वात् प्रशस्तदेवैवंनीद्रियेषुमध्येपरिगणितमपि
वद्धभाचार्यैःस्पर्शनमुक्तंगुरुत्वं एवमेकैकेंद्रियग्राह्यान
भिधायद्वींद्रियग्राह्यानाह संख्याःपरिमाणानिपृथक्त्वं
संयोगविभागौपरत्वापरत्वेकर्मचरूपिद्रव्यसमवायात्प्र चाक्षुषाणि
त्यक्षाणि एतेषांचाक्षुषत्वेस्पार्शनत्वेवापरस्परानपेक्षत्व
स्यचयासमासः यद्यपिमहत्त्वापेक्षास्तितथापिनपरिमा।
णत्वेनचकारः ~~स्नेहद्रवत्वेन~~ चकारःस्नेहद्रवत्ववेगानामुप
संग्रहार्थःचाक्षुषाणीतिस्पर्शनत्वमप्युपलक्षयतियद्वा
चकारएवचाक्षुषाणिचेत्यत्रापियोज्यः संख्याइतिव

हुवचनमेकत्वादिकाः सर्वा एव संख्याः संगृह्णाति एकत्वं सामा
न्यमेव न तु गुण इति चेन्न तद्धि द्रव्यमात्रवृत्ति न द्रव्येण स
हान्यूनानतिरिक्तवृत्तित्वं अथ गुणकर्मणोरपि वर्त्तते न तदा सत्त
या सहान्यूनानतिरिक्तवृत्तित्वं कथं तर्हि गुणादावप्येकत्व
प्रत्यय इति चेत् आरोपितेनैकत्वेन एकार्थसमवायप्रत्या
सत्त्या सम्यगेवैकत्वप्रत्ययो वा न देतदेकत्वं नित्यद्रव्येषु नि
त्यमनित्येषु च कारणैकत्वासमवायिकारणकं द्वित्वादिकं त्वा
पेक्षाबुद्धिजन्यं अपेक्षाबुद्धिश्चानेकत्वसमूहालंबनरूपा
सजातीययोर्विजातीययोर्वा द्रव्ययोश्चक्षुषा सन्निकर्षे एता
न्येव कर्मपर्यंतान्यभिप्रेत्याह अरूपिष्वचाक्षुषाणि रू
परहितेषु द्रव्येषु वर्त्तमानानि कर्मान्तानि संख्यादीन्यचाक्षु
षाणि अस्पर्शनानीत्यपि द्रष्टव्यं अप्रत्यक्षाणीति नोक्तं तया
सत्तैकत्वमपि प्रत्यक्षं न स्यात् रूपादीनामेकैकेंद्रिय
ग्राह्यत्वं संख्यादीनां द्वीन्द्रियग्राह्यत्वं सुखादीनां तथा च गुणत्व
सत्त्वयोः सामान्ययोः सर्वेंद्रियग्राह्यत्वमायातमित्याह ए
तेन गुणत्वे भावे च सार्वेंद्रियं ज्ञानं व्याख्यातं व्यक्तिग्रहणयो
ग्यतैव जातिग्रहणयोग्यता व्यक्तयश्च यथायथं यदि सर्वै
रिंद्रियैर्गृह्यंते तदा जात्योरपि गुणत्वसत्त्वयोः सर्वेंद्रियग्राह्य
त्वं पर्यवसन्नमित्यर्थः ४२ इति शांकरे ॥ स्पर्शवद्द्रव्य
परीक्षार्थं चतुर्थाध्याये मूलकारणपरमाण्वोः सर्वेंद्रियग्रा प
रमाणुपरीक्षानंतरं कार्यद्वारा स्पर्शवंत्येव द्रव्याणि परीक्षि
तुमाह ततः पुनः पृथिव्यादिकार्यद्रव्यं त्रिविधं शरीरेंद्रि

य विषयसंज्ञकं   तत्र शरीरत्वं प्रयत्नवदात्मसंयोगासमवायिका
रणवत्क्रियावदन्त्यावयवित्वमुपाधिभेदो न तु शरीरत्वं जातिः
पृथिवीत्वादिना परापरभावानुपपत्तेः इन्द्रियत्वं च स्मृत्यजनक
ज्ञानकारणमनःसंयोगाश्रयत्वं शब्देतरोद्भूतविशेषगुणाना
श्रयत्वे सति ज्ञानकारणमनःसंयोगाश्रयत्वं वा नक्तंचरनयन
रश्मिस्तु तेजोन्तरमेव चक्षुष्ट्वं तु शब्देतरोद्भूतगुणानाश्रय
त्वे सतीति देयं न त्विन्द्रियत्वं जातिः पृथिवीत्वादिना परापरभा
वानुपपत्तेः विषयत्वं च यद्यपि प्रतीयमानतया भोगसाधनत्वं
तच्च लौकिकसाक्षात्कारविषयत्वमेव द्रव्यगुणकर्मसामान्या
भावसाधारणं तथापि सूत्रानुरोधात् लौकिकसाक्षात्कारवि
षयद्रव्यत्वं द्रष्टव्यं पृथिव्यादिकार्य्यद्रव्यं त्रिविधमिति हि सू
त्रं तथा च विषयत्वमपि न जातिः इदानीं शरीरस्य त्रैभौतिकत्व
चातुर्भौतिकत्वप्रवादं निराकर्तुमाह   प्रत्यक्षाप्रत्यक्षाणां सं
योगस्याप्रत्यक्षत्वात् पंचात्मकं न विद्यते   गंधक्लेदपाकव्यूहा
वकाशदानेभ्यः पांचभौतिकं यदि शरीरं भवेदप्रत्यक्षं भवेत्
यथा प्रत्यक्षाप्रत्यक्षाणां वायुवनस्पतीनां संयोगोऽप्रत्यक्षस्तथा
शरीरमप्यप्रत्यक्षं स्यादिति दृष्टान्तद्वारकं सूत्रं पंचात्मकं न विद्य
त इति शरीरमिति शेषः क्लेदपाकाद्युपष्टंभकजलानलग
ता एव चातुर्भौतिकोप्येवं न त्वस्तु त्रैभौतिकं त्रयाणां भूतानां प्र
त्यक्षत्वादिति चेत्   न विजातीयारंभस्य प्रतिषेधात् एकस्य
गुणस्यावयविनि गुणानारंभकत्वात् तद्यदि पृथिवीजलाभ्या
मारंभः स्यात्तदा तन्नीरत्वमगंधमरसं च स्यात् एवं पृथिव्यन

लाभ्यामगंधमरूपमरसंचस्यात् पृथिव्यनिलाभ्यामगंधमरसं
मरूपमस्पर्शंचस्यादित्यासूह्यं एतदेवाह गुणांतराप्रादु
र्भावाच्चनत्र्यात्मकं पृथिव्यप्तेजसां प्रत्यक्षाणामेवारब्धं श
रीरं प्रत्यक्षं स्यादप्रियदितत्रगुणांतरंकारणगुणपूर्वकं प्रा
दुर्भवेत् नचैतदस्तिएकस्यगंधादेरनारंभकत्वस्योक्तत्वात्त
थाचनत्र्यात्मकमपिशरीरंनरूपवद्भूतत्रयारब्धमपीत्यर्थः
कथंतर्हिंकस्मिन्नेवशरीरेपाकादीनामुपलंभइत्यतआह
अणुसंयोगस्त्वप्रतिषिद्धंमिथः पंचानांपरस्परमुपष्टंभकता
यासंयोगोननिषिध्यते किंतुविजातीययोर्वतयोरसमवायिका
रणंद्रव्यंप्रतिसंयोगोनेष्यतेतथाचतुदुपष्टंभापाकादीनांश
रीरेभवत्युपलंभइति तर्हिकिंप्रकृतीदंमानुषंशरीरमि
त्यत्रगौतमीयंसूत्रमुपतिष्ठते पार्थिवंतद्विशेषगुणोपल
ब्धेः पृथिवीविशेषगुणोगंधोमानुषशरीरेआनाशमनपायी
दृश्यतेपाकादयस्तुशुष्कशरीरेनोपलभ्यंतइतितेषामौपा
धिकत्वंगंधस्यस्वाभाविकत्वमितिपार्थिवत्वव्यवस्थिते पा
र्थिवंशरीरंविभजते तत्रशरीरंद्विविधंयोनिजमयोनिजं
च तत्रपार्थिवाप्यादिशरीरेषुमध्येपार्थिवंशरीरंद्विविधं
केतेद्वेविधे इत्यतआहयोनिजमयोनिजंचेति आप्यतैज
सवायवीयशरीराणांवरुणादित्यवायुलोकेषुप्रसिद्धानाम
योनिजत्वमेव अयोनिजत्वंशुक्रशोणितसन्निपातानपेक्षत्वं
अयोनिजंचदेवानामृषीणांचश्रूयतेहिब्रह्मणोमानसाम
नुदेयइतिकारणमंतरेणकथंकार्यमितिचेत् योनेः शरी

रत्वावच्छेदेनाकारणत्वात् उष्मजकृमिमशकादिशरीरे व्यभि
चारात् संस्थानविशेषवत्त्वस्य चासिद्धेः देवर्षिशरीरापेक्षया
मशकादिशरीराणामन्यादृशत्वात् योनिजमपि द्विविधं जरायुज
मंडजं च तत्र जरायुजं मानुषपशुमृगाणां गर्भाशयस्य जरायु
त्वात् पक्षिसरीसृपाणामंडजं यवितः सर्पणशीलत्वात् सर्प
कीटमत्स्यादयोपि सरीसृपा एव यद्यपि वृक्षादयोपि शरीरभे
दा एव भोगाधिष्ठानत्वात् न खलु भोगाधिष्ठानत्वमंतरेण जी
वनमरणस्वप्नजागरणभेषजप्रयोगबीजसजातीयानुबंधा
नुकूलोपगमप्रतिकूलापगमादयः संभवंति वृद्धिक्षतभग्न
संरोहणे च भोगोपपादके स्फुटे एव आगमोप्यस्ति नर्मदानीरसं
भूताः शरलार्जुनपादपाः नर्मदातोयसंस्पर्शात्ते यांति परमां ग
तिमित्यादि श्मशाने जायते वृक्षः कंकगृध्रोपसेवित इत्यादिश्च
तथापि चेष्टावत्त्वमिंद्रियवत्त्वं च नोद्भिदां स्फुटतरमतो न शरीर
व्यवहारः अयोनिजशरीरोत्पत्तिकारणमाह अनियतदिग्दे
शपूर्वकत्वात् अनियतदिग्देशाः परमाणवो धर्मविशेषज
नितकर्मोत्पत्तिपूर्वकत्वादयोनिजशरीराणां ननु परमाणूनां
कर्म विना कथं द्व्यासमवायिकारणं संयोगमंतरेण द्व्योस
त्तिरत आह धर्मविशेषाच्च अदृष्टवदात्मसंयोगादेव संयो
गे परमाणूनां कर्म तेन च कर्मणारभ्य परमाणवो द्व्यणुका
दिप्रक्रमेणायोनिजं देवर्षीणां शरीरमारभंत इत्यर्थः उपल
क्षणं चैतत् अधर्मविशेषाच्च क्षुद्रजंतूनामूष्मजानां मशका
दीनां यातनामयानि शरीराण्युत्पद्यंते इत्यपि द्रष्टव्यं देवर्षी

णामयोनिजे शरीरे प्रमाणांतरमाह समाख्याभावाच्च समा
ख्याऽन्वर्था संज्ञा श्रुतिस्मृतीतिहासपुराणेषु प्रसिद्धा तथाहि
दुर्वासः प्रभृतयो मानसाः अहंकारेभ्यः समभवदंगिरा इत्या
दिका तयापि ज्ञायते संत्ययोनिजानि शरीराणि देवर्षीणामिति
प्रमाणांतरमाह संज्ञाया आदित्वात् स्वर्गादौ या ब्रह्मादि
संज्ञा आदिभूता प्राथमिकी तया पि ज्ञायते अस्त्ययोनिजं शा
रीरमिति न हि तदा ब्रह्मणो मातापितरौ स्तो याभ्यां ब्रह्मादिसं
ज्ञाकृता स्यादिभावः उपसंहरति संत्ययोनिजाः शरीरवि
शेषा इति शेषः उपसंहृतेपि दार्ढ्यार्थं प्रमाणांतरमाह
वेदलिंगाच्च वेदो मंत्रः स च लिंग्यते ज्ञाप्यतेऽनेनेति वेदलिंगं
ब्राह्मणं तेनाप्ययोनिजं शरीरं प्रतिपद्यत इत्यर्थः तथाहि
ब्राह्मणं प्रजापतिः प्रजा अनेका असृजत स तपोऽतप्यत
प्रजाः सृजेयमिति स मुखतो ब्राह्मणमसृजत बाहुभ्यां रा
जन्यमूरुभ्यां वैश्यं पद्भ्यां शूद्रमिति वेदोपि ब्राह्मणोऽस्य मुख
मासीद्बाहू राजन्यः कृतः ऊरू तदस्य यद्वैश्यः पद्भ्यां शूद्रो
ऽजायत इत्यादि तदेवं योनिजमयोनिजं च पार्थिवं शरीरमु
क्तं आप्यं तैजसं वायवीयं चायोनिजमेव शुक्रशोणितयो
र्नियमेन पार्थिवत्वात् पार्थिवेन च याथसीया नारंभात् इं
द्रियं तु पार्थिवं घ्राणं सर्वप्राणभृतां घ्राणं जलाद्यनभि
भूतैः पार्थिवभागैरारब्धं घ्राणं घ्राणं पार्थिवं रसाद्यव्यंजक
त्वे सति गंधव्यंजकत्वात् मृगमदगंधाभिव्यंजककुंकुमो
त्कारवत् एवं रसनमाप्यं रूपाद्यव्यंजकत्वे सति रसस्यैव व्यं

जकत्वात् सक्तुरसाभिव्यंजकमस्तिलवत् एवं चक्षुस्तैजसं रसा
द्यव्यंजकत्वे सति रूपस्यैव व्यंजकत्वादालोकवत् त्वगिंद्रियंवा
यवीयं गंधाद्यव्यंजकत्वे सति स्पर्शस्यैव व्यंजकत्वादंगसंगि
सलिलसैत्या— भिव्यंजकव्यजनवातवत् विषयस्तु पार्थि
वो मृत्पाषाणस्थावरलक्षणः तत्र भूप्रदेशाः प्राकारेष्टकाद
यो मृद्विकारः ग्रविमणिहीरकगैरिकादयः पाषाणाः स्था
वरास्तृणौषधिवृक्षगुल्मलतावतानवनस्पतयः आप्यास्तु
विषयाः सरित्समुद्रहिमकरकादयः तैजसस्तु विषयो भौमदि
व्योदर्याकरजभेदाच्चतुर्विधः भौमं काष्ठेंधनप्रभवं दिव्यमबिं
धनं विद्युदादि उदर्य्यमन्नादिरसार्जनक्षमं जाठरमाकरजं च
हिरण्यादि वायवीयस्तु विषय उपलभ्यमानस्पर्शाश्रयो वा
युः वायोश्चतुर्थं कार्य्यं प्राणाख्यं शरीरे रसमलधातूनां
प्रेरणादिहेतुरेकः सन् क्रियाभेदादपानादिसंज्ञां लभतइ
ति इति श्रीशंकरे कणादसूत्रसंस्कारे चतुर्थोध्यायः समाप्तः
५ कर्मपरीक्षा पंचमाध्यायार्थः प्रयत्ननिष्पाद्यकर्मपरीक्षा
प्रथमाह्निकार्थः तत्राप्युत्क्षेपणप्रकरणं प्रयत्नसिद्धोत्क्षे
पणप्रकरणं पुण्यहेतुकर्मप्रकरणं पुण्यपापोदासीनकर्म
प्रकरणं च चेष्टाविशेषमधिकृत्याह आत्मसंयोगप्रयत्नाभ्यां ह
स्ते कर्म संयोगश्च प्रयत्नश्च संयोगप्रयत्नौ आत्मनः संयोग
प्रयत्नौ ताभ्यां हस्ते समवायिकारणे कर्म तस्य च कर्मणः प्रय
त्नवदात्मसंयोगोऽसमवायिकारणं प्रयत्नश्च निमित्तकार
णं इयमेव चेष्टाप्रयत्नवदात्मसंयोगासमवायिकारणक

क्रियायाश्चेष्टात्वात् स्वासमवेतस्वातिरिक्तस्पर्शवदन्यप्रयत्न
जन्यक्रियायावा हस्तोत्क्षेपणमुक्त्वा तदधीनं मुसलोत्क्षे
पणमाह १ तथाहस्तसंयोगाच्च मुसले कर्म च कारेणगुरु
त्वं निमित्तकारणांतरं समुच्चिनोति तथेति तादृशमुत्क्षेपण
रूपमेवेत्यर्थः यद्वा तथा हस्तसंयोगादुत्क्षेपणवद्धस्तसंयो
गादित्यर्थः अत्र च प्रयत्नवदात्मसंयुक्तेन हस्तेन मुसलसंयो
गोऽसमवायिकारणं मुसलं समवायिकारणं प्रयत्न गुरुत्वे नि
मित्तकारणे उदूखलाभिहतस्य मुसलस्याकस्मादुत्पतनं ज्ञा
पतेतत्र कारणमाह २ अभिघातजे मुसलादौ कर्मणि व्य
तिरेकादकारणं हस्तसंयोगः अत्र यद्यपि मुसलेनोत्पतता
हस्तसंयोगोऽप्यस्ति तथापि संयोगोऽन्यथासिद्धः किंतूदूखला
भिघात एवासमवायिकारणं कुत एवमित्यत आह व्यतिरेका
दिति प्रयत्नस्य व्यभिचारादित्यर्थः यदि तदा प्रयत्नस्यामुसल
स्येवाकस्मिकमुत्पतनं न भवेत् विधारकेण प्रयत्नेन मुसल
स्य धारणमेव भवेत् चेष्टाधीनं मुसलस्य पुनरुत्पतनं वा भ
वेदिति भावः मुसलेन सहोत्पततो हस्तस्य कर्मणि कारण
विशेषमभिधातुं प्रयत्नवदात्मसंयोगस्यासमवायिकारण
त्वं निराकर्तुमाह ३ तथात्मसंयोगो हस्तकर्मणि मुसलेन
सहोत्पततो हस्तस्य कर्मणि आत्मसंयोगः प्रयत्नवदात्म
संयोगस्तथा अकारणमित्यर्थः अकारणमिति पूर्वसूत्र
स्थं तथेत्यतिदिश्यते कुतस्तर्हि हस्ते तदोत्पतनमत आह
अभिघातान्मुसलसंयोगाद्धस्ते कर्म यथा मुसले उत्पत

त्रिमुसलमुखस्थं लोहमुत्पततीति तथा हस्तोपि तदोत्पततीति तत्राभि
घातशब्देनाभिघातजनितः संस्कार उच्यते उपचारात् उत्पत
तो मुसलस्य यदुत्तारणकर्मणाऽभिघातसहकृतेन स्वाश्रये मु
सले संस्कारो जनितस्तत्कृतं संस्कारमपेक्ष्य हस्तमुसलसंयोगा
दसमवायिकारणाद्धस्तेप्युत्पतनं ननु तदुत्पतनं प्रयत्नवदा
त्मसंयोगासमवायिकारणं अवशो हि हस्तो मुसलेन सहोत्प
ततीति भावः ननु शरीरे शरीरावयवे वा यत्कर्म सोपि घटे तत्र
प्रयत्नवदात्मसंयोगः कारणं प्रकृते कथं न तथेत्यत आह
आत्मकर्म हस्तसंयोगाच्च आत्मशब्दः शरीरावयवपर उप
चारात् अन्यथानुपपत्तिरेवोपचारबीजं तथा चात्मनः श
रीरावयवस्यापि हस्तस्य यत्कर्म तद्धस्तमुसलसंयोगात् चका
राद्वेगसमुच्चयः हस्तकर्मणि हस्तसंयोगस्तावदसमवा
यिकारणं तत्र व्यभिचारो नास्ति स च क्वचित्प्रयत्नवदात्महस्तसंयो
गः क्वचिद्वेगवन्मुसलादिहस्तसंयोगो यथा वातूलस्य शरीरावय
वकर्मेति भावः प्रयत्नानधीनकर्मप्रकरणमारभते संयो
गाभावे गुरुत्वात् पतनं संयोगपदेन प्रतिबंधकमात्रमुपल
क्षयति तेन प्रतिबंधकाभावे गुरुत्वादसमवायिकारणात् पत
नमधः संयोगफलिका क्रिया जायते तत्र गुरुत्ववति फलादौ
प्रतिबंधकः संयोगः विहंगमादौ तु विधारकः प्रयत्नः पत
नप्रतिबंधकः कांडादौ क्षिप्ते संस्कार एव पतनप्रतिबंधकः ए
तेषामभावे गुरुत्वाधीनं पतनमित्यर्थः अभिध्यानादिना
विषादेरंतरीक्षस्यापतनेऽदृष्टवदात्मसंयोगो मंत्रादिरेव वा

वै० सू० वृ०
दृ०
60

प्रतिबंधकस्तेषामपि संयोगपदेन संग्रहः ननु गुरुत्वाद्यदिय
तनं तदा लोष्टादेः क्षिप्तस्य क्वचिदूर्द्ध्वं क्वचिच्च तिर्य्यग्गमनं कथंभ
वेदित्यत आह नोदनविशेषाभावान्नोर्द्ध्वं न तिर्य्यग्गमनं गुरु
त्ववतोपि लोष्टकांडादेर्यदूर्द्ध्वं तिर्य्यक्चगमनं तन्नोदनविशेषा
त्तीव्रतरान्नोदनात् तथा च फलपक्षिवाणादेः संयोगप्रयत्न
संस्काराभावे यत्पतनं तत्र नोदनविशेषो नास्ति तेन तिर्य्यङ् नो
र्द्ध्वं गमनमिति भावः ननु नोदनविशेष एव कुत उत्पद्यते तत्रा
ह प्रयत्नविशेषान्नोदनविशेषः नोदनविशेषादुदसन
विशेषः तिर्य्यगूर्द्ध्वं दूरमासन्नं वा क्षिपामीतीच्छाकारणकः
प्रयत्नविशेषस्तज्जनितो नोदनविशेषो गुरुत्ववतो द्रव्यस्य
लोष्टादेरूर्द्ध्वं तिर्य्यक् च गमनमुपपद्यते उदसनं दूरेण
क्षेपणं उदूखलाभिघातान्मुसलेन सह हस्तस्य तु कर्मोत्प
न्नं तत्तु नाप्रयत्नपूर्वकं भवति नापि पुण्यपापहेतुरतस्त
त्तुल्यतां कस्य क्रीडाकरचरणादि चालनं यत्तत्राभिदिशति
हस्तकर्मोदारक कर्मव्याख्यातं बालकस्य यद्यपि करचरणा
दिचालनं प्रयत्नपूर्वकमेव तथापि हिताहितप्राप्तिपरीहार
फलकं न भवति न वा पुण्यपापहेतुरित्यतिदेशार्थः इदा
नीं प्रयत्नपूर्वकेपि कर्मणि यत्र पुण्यपापहेतुत्वं तत्र दारक
कर्मतुल्यतामतिदिशन्नाह तथा दग्धस्य विस्फोटने आ
ततायिना केनाप्यागारे दाह्यमानेन तत्र दग्धस्य पुरुषस्य विस्फो
टे वह्निकृतेजाते सति तस्यातताथिनो वधानुकूलेन प्रयत्नेन
हस्तादौ यत्कर्म जनितं तन्न पुण्यहेतुर्भवाति पापहेतुः यथा

हुः नाततायिवधे दोषो हंतुर्भवति कश्चन प्रकाशं वा मन्युस्तन्म
न्युमृच्छति अग्निदो गरदश्चैव शस्त्रपाणिर्धनापहः क्षेत्र
दारापहारी षडेते आततायिनः इदानीं यत्नं विना यानि
कर्माणि तान्याह यत्नाभावे प्रसुप्तस्य चलनं प्रसुप्तस्येति चैत
न्याभावदशामुपलक्षयति तेन मूर्छितस्य जीवितोऽपि चेतन्येऽपि
वायुकृतं चलनं द्रष्टव्यमत्र शरीरकर्माणि व्याख्याय त
दितराण्याह तृणे कर्म वायुसंयोगात् तृणपदेन वृक्ष
गुल्मलतावरीनादिकं सर्वमुपलक्षयति अदृष्टाधीनं क
र्मपरिगणयन्नाह मणिगमनं सूच्यभिसर्पणमित्यदृष्टकार
णकं मणिपदेन कांस्यादिकमुपलक्षयति तेनाभिमंत्रितं म
णिकांस्यादिः तस्कराभिमुखं यद्गच्छति तत्र गमने मन्यादिसमवा
यिकारणं अदृष्टवत्तस्करात्ममणिसंयोगोऽसमवायिकारणं त
स्करस्यापायं निमित्तकारणं सूच्यभिसर्पणमिति सूचीपदेन लोह
मात्रं तृणं चोपलक्षयति तथा चायस्कांताभिमुखं यत्सूच्यादेर्ग
मनं तृणकांताभिमुखं यत्तृणस्य गमनं तत्र सूच्यादिसमवायि
कारणं यस्याहितमहितं वा तेन तृणसूच्यादिगमनेन तददृष्ट
वदात्मसंयोगोऽसमवायिकारणं तददृष्टमेव निमित्तकारण
मेवमन्यादप्यूह्यं तद्यथा वह्नेरूर्ध्वज्वलनं वायोस्तिर्यक्गमंव
नं सर्गादौ परमाणुकर्मादि ननु शरविहंगमालातचक्रादीनामु
परसपर्य्येन्नमेकमेव कर्म नाना वेति संशये निर्णयहेतुमाह
इषावयुगपत्संयोगविशेषाः कर्मान्यत्वे हेतुः इषावितिवि
षयसप्तमी इदमत्राकूतं वेगेन गच्छतां शरीरादीनां कुड्यादि

वै० सू० वृ०
६१
61

संयोगानंतरंशरादौसत्येवगत्युपरमोदृश्यतेअत्राश्रयनाशस्ता
वन्नतन्नाशकः आश्रयस्याविद्यमानत्वात्विरोधिगुणांतरंच
नोपलभ्यतेतेनस्वजन्यःसंयोगएवकर्मनाशकइत्युन्नीयतेस
चसंयोगश्चतुर्थेक्षणेजातःपंचमेक्षणेकर्मनाशयतितथा
हिकर्मोत्पत्तिरथविभागोथपूर्वसंयोगनाशउत्तरसंयोगःक
र्मनाशस्तेनायुगपत्संयोगविशेषाःकर्मनानात्वज्ञापकाइत्य
र्थः संयोगविशेषाइतिसंयोगोविशेषः स्वजन्यत्वमेवअन्य
थासंयोगमात्रस्यकर्मनाशकत्वेक्वचिदपिनतिष्ठेत् नोदन
।निष्पाद्यकर्मप्रकरणानंतरंसंस्कारनिष्पाद्यकर्मप्रकरण
मारभते नोदनादाद्यमिषोःकर्मतत्कर्मकारिताच्चसंस्कारा
दुत्तरंतथोत्तरमुत्तरंच पुरुषप्रयत्नेनाकृष्यापतंजिकया
नुन्नस्येषोराद्यंकर्मजायतेतत्रनोदनंसमवायिकारणमिषुःस
मवायिकारणंप्रयत्नगुरुत्वेनिमित्तकारणेतेनचाद्येनकर्मणा
समानाधिकरणोवेगाख्यःसंस्कारोजन्यतेसचवेगेनगच्छ
तीतिप्रत्यक्षप्रसिद्धएवतेनसंस्कारेणतत्रैवकर्मजायतेतत्रा
समवायिकारणंसंस्कारःसमवायिकारणमिषुःनिमित्त
कारणंतुतीव्रोनोदनविशेषः एवंचयावदिषुपतनमनु
वर्तमानेनसंस्कारेणोत्तरोत्तरःकर्मसंतानोजायतेस्वजन्योत्त
रसंयोगेनकर्मणिनष्टेसंस्कारेणाकर्मांतरजननात् एकएव
संस्कारः कर्मसंतानजनकोनतुकर्मसंतानवत्संस्कारसंता
नोप्यभ्युपगंतुमुचितोगौरवादितिदर्शयितुमाहतथोत्तर
मुत्तरंचेतितत्कर्मकारिताच्चसंस्कारादित्येकवचनंन्यायनये

तुकर्मसंतानवत् संस्कारस्वीकारेगौरवंयत्तुयुगपत्सस्थितस्यशर
योरेकस्यतीव्रोवेगोपरस्यतुमंदस्तत्रनोदनतीव्रत्वमंदत्वेनिमित्तं
ननुसंस्कारएकएवचेत् कर्मसंतानजनकस्तदाकदाचिदपि
शरपातोनस्यात् कर्मजनकस्यसंस्कारस्यसत्वादित्यतआह
संस्काराभावेगुरुत्वात्पतनं गुरुत्वंतावत्पतनकारणमनुव
र्तमानमेवतत्वगुरुत्वंसंस्कारेणप्रतिरुद्धंपतनंनाजीजनदप्र
तिबंधकाभावेतदेवगुरुत्वंपतनंकरोतीत्यर्थः इतिश्रीशंकर
रेकाणादिसूत्रसंस्कारेपंचमस्यप्रथममाह्निकं नोदनादिनि
निष्पाद्यकर्मपरीक्षाप्रकरणंतत्राह नोदनादभिघातात्सं
युक्तसंयोगाच्चपृथिव्यांकर्म नोदनंसंयोगविशेषः येनसंयो
गेनजनितं कर्मसंयोगिनोःपरस्परंविभागहेतुर्नभवतियः
संयोगः शब्दनिमित्तकारणंनभवति वाशब्दनिमित्तकारणंभ
तियज्जनितंकर्मसंयोगिनोः परस्परं विभागहेतुश्चभवतिस
संयोगविशेषोभिघातः ताभ्यामपिप्रत्येकंकर्मजन्यतेपंका
ख्यायांपृथिव्यांचरणेननोनोदनात् चरणाभिघाताच्चकर्मजा
यतेतत्रपंकःसमवायिकारणंनोदनाभिघातोयथायथंसमवा
यिकारणंगुरुत्ववेगप्रयत्नायथासंभवन्निमित्तकारणंसंयुक्त
संयोगादितिनोदनादभिघाताद्वापंकेकर्मतत्संकस्यितेघटादा
वपितत्समकालमेवयत्कर्मसमकालमेवकर्मदर्शनात् न
नुभूकंपादौनोदनाभिघातावंतरेणजायमानेकिमसमवा
यिकारणमतआह तद्विशेषेणादृष्टकारितंतद्वितिपृथिवी
कर्मपराम्रुषतिपृथिव्यामेवकर्मयदिविशेषेणाम्स्येनभव

ति तदाऽदृष्टकारितं तेन भूकंपेन यस्य दुःखं सुखं वा भवति अ
दृष्टवदात्मसंयोगस्तत्र समवायिकारणं भूः समवायिकारण
मदृष्टं निमित्तकारणं यद्वा तदभिघातो यथाम्रशातिविशेषोऽव्य
तिरेकः तथा च नोदनाभिघातव्यतिरेकेण यत्पृथिव्याः कर्म
तददृष्टकारितमित्यर्थः इदानीं द्रवद्रव्यसमवायिकारण
ककर्मपरीक्षाप्रकरणं तत्राह अपां संयोगाभावे गुरुत्वात्प
तनं अपां पतनं वर्षणरूपं तद्गुरुत्वासमवायिकारणकं
तत्संयोगस्य मेघसंयोगस्याभावे सति भवति तेन संयोगाभा
वस्तन्निमित्तकारणमित्यर्थः तेषामेव वृष्टिबिंदूनामन्यो
न्यसंयोगजनकं कर्म कथमत आह द्रवत्वात्स्यंदनं क्षितौ पति
तानामपां बिंदूनां परस्परसंयोगेन महज्जलावयविस्रोतोरू
पं यत्प्रापतत्तस्य यत्स्यंदनं दूरसंसरणं तद्द्रवत्वादसमवायिका
रणादुत्पद्यते गुरुत्वान्निमित्तकारणादप्सु समवायिकारणेषु
ननु यदि भूमिष्ठानामपामूर्द्ध्वगमनं भवति तदा गुरुत्वात्
पतनं वर्षणं संभाव्यते तदेव तु कुतः इत्यत आह नाड्यो वायु
संयोगादारोहणं कार्यंतीति शेषः यदपामूर्द्ध्वमारोहणं ता
न्नाड्यः सूर्यरश्मयो वायुसंयोगात् कारयंति ग्रीष्मे वाय्व
भिहताः सूर्यरश्मय एव आरोहयंत्यप इत्यर्थः क्वचित्सा
ठो नाड्या वायुसंयोगादिति स च नाड्या नाडीसंबंधी यो वायु
संयोग इत्युपपादनीयः ननु सूर्यरश्मीनां कथमयं महि
मा यद्भूमिष्ठा अप ऊर्द्ध्वं नयंतीत्यत आह नोदनापीडना
त्संयुक्तसंयोगाच्च नोदनेन बलवद्वायुनोदनेनापीडना

दास्कन्दनात् वायुसंयुक्तारश्मयस्तत्संयुक्ता आप ऊर्द्धं धावंति
यथास्थालीस्था आपः क्वथ्यमाना वायुर्वैन्नवह्निरश्मय ऊ
र्द्धं नयन्ति चकार इवार्थस्तत्र चोद्यमानं स्थालीस्था एवायोद्रष्ट
व्याः ननु मूले सिक्तानामपां वृक्षाभ्यंतरेणोर्द्धं गमनमभितः
त्र नानोदनाभिघातौ न वा दिव्यरश्मयः प्रभवंति तत्कथंत
दित्यत आह वृक्षाभिसर्पणमित्यदृष्टकारितं अभितः स
र्पणमभिसर्पणं तदभिसर्पणं मूले निषक्तानामपां वृक्षेष्वदृ
ष्टकारितं यत्र कांडफलपुष्पादि वृद्धिकृतं सुखं दुःखं वा येषा
मात्मनां अदृष्टवत्तदात्मसंयोगादसमवायिकारणाद्दृष्टान्नि
मिनादप्सु समवायिकारणेषु तत्कर्म भवति येन कर्मणा अपां दू
र्द्धं गमनं वृक्षं वर्द्धयंतीत्यर्थः ननु यासां सांसिद्धिकद्रवत्वं लक्षणयुक्तं
तासां शानामेवापामूर्द्धं मधस्तिर्यक् च गमनमुपपादितं हिमक
रकादीनां च सैसादप्सु भविवादसिद्धं तत्कथं तेषां संघातः का
ठिन्यं कथं च विलयनमित्यत आह अपां संघातो विलयनं च ते
जः संयोगात् दिव्येन प्रतिबंधात्तेजसो दाप्याः परमाणवो द्व्य
णुकमारभमाना द्व्यणुकेषु द्रवत्वं नारभंते ततो द्रवत्वशून्यैव
वयवैर्द्व्यणुकादिप्रक्रमेण द्रवत्वशून्याहिमकरकादय आर
भ्यंते तेन तेषां काठिन्यमुपलभ्यते नन्वेवं हिमकरकादीनामा
प्यत्वे किं प्रमाणमत उक्तं विलयनं च तेजः संयोगादिति तेजः
संयोगेन बलवता हिमकरकारंभकपरमाणूनां क्रियाक्रिया
तो विभागस्ततः आरंभकसंयोगनाशः पर्यवस्याहिमकरका
दिमहावयविनाशः ततो द्रवत्वप्रतिबंधकतेजः संयोगवि

योगमात्रएवपरमाणवोद्व्यणुकेषुद्रवत्वमारभंतेततोद्रवत्वव
तांहिमकरकादीनांविलयनंतत्रचबलवत्तेजोनुप्रवेशोनि
मित्तं ननुबलवद्दिव्यतेजोनुप्रवेशस्तत्रेसत्रकिंप्रमाण
मतआह तत्रावस्फूर्थ्यथुर्लिंगं तत्रहिव्यास्वप्सुदिव्यानां
तेजसामनुप्रवेशऽवस्फूर्थ्यथुर्लिंगंवज्रनिर्घोषएवलिंगमि
त्यर्थः आत्यंतिकविष्कल्पकाशस्तावत्प्रत्यक्षएवतदनुप
दंचस्फूर्थ्यथुःसोपिप्रत्यक्षएवतेनानुमीयतेयस्मान्मेघा
करकाःप्रादुर्भवंतितत्रादिव्यंतेजोविद्युद्रूपमनुप्रविष्टंतदु
र्यष्टंभेनकरकारंभिकानामपांद्रवत्वप्रतिबंधइतिअत्रैवप्र
माणांतरमाह वैदिकंच अपांमध्येतेजोनुप्रवेशआगम
सिद्धएवेत्यर्थः तथाहिआपस्ताअग्निंगर्भमादधीरन्याअ
ग्निंगर्भंदधिरेसुवर्णाइत्यादि ननुविस्फूर्थ्यथुः कथमुत्प
द्यतेसंयोगविभागौशब्दयोनीतौचनानुभूयतेइत्यतआ
ह अपांसंयोगाद्विभागाच्चस्तनयित्नोः विस्फूर्थ्यथुरिति
शेषः अस्मिस्तनयित्नौसंयोगविभागौनिमित्तकारणीभूय
स्तनयित्नोरेवाकाशेनसंयोगादसमवायिकारणाद्आकाशे
समवायिकारणेशब्दंगर्जितंजनयतः क्वचिच्चवायुवला
हकसंयोगविभागौनिमित्तकारणेवलाहकवियत्संयोगवि
भागावसमवायिकारणेकर्मकारणाधिकारेपिप्रासंगिक
मिदमुक्तंयद्वामेघाकाशसंयोगेविभागेवाशब्दासमवायि
कारणेअपामेवनोदनाभिघातजनितंकर्मेतिसूचितंकर्म
णांवाधिकारप्राप्तत्वात् पृथिवीकर्मणातेजःकर्मचव्या

कर्मवाप

ख्यातं भूकंपं प्रसदृष्टवदात्मसंयोगः कारणमुक्तं तदेवाक
स्मिकदिग्दाहहोल्कोत्पातेजस आकस्मिकत्वस्यादिक्षोभहेतो
श्च प्रभंजनस्य कर्म यत्संजायते तत्राप्यदृष्टवदात्मसंयो
गोऽसमवायिकारणं वायुतेजसी समवायिकारणमदृष्टं नि
मित्तकारणमित्यर्थः कर्मशब्दस्याद्यावृत्तिर्महोल्कादिक
र्मसूचनार्था अदृष्टवदात्मसंयोगासमवायिकारणकं
कर्मान्तरमाह अग्नेरूर्द्ध्वज्वलनं वायोस्तिर्यक्पवनम
णूनां मनसश्चाद्यं कर्मादृष्टकारितं आद्यमिति सर्गाद्यका
लीनमित्यर्थः तदानोदनाभिघातादीनामभावाददृष्टवदात्म
संयोग एव तदासमवायिकारणं आद्यमूर्द्ध्वज्वलनमाद्यं च तिर्य
क्पवनमितरेषां च ज्वलनपवनकर्मणां वेगासमवायिका
रणकत्वमेवमंतुमुचितं दृष्टे कारणे सत्यदृष्टं कल्पनानव
काशात् अनाद्यं मनः कर्माधिकृत्याह हस्तकर्मणा मन
सः कर्म व्याख्यातं मुसलोत्क्षेपणादौ यथा प्रयत्नव
दात्मसंयोगासमवायिकारणकं हस्तकर्म तथाभिमतवि
षयग्राहिणीन्द्रिये सन्निकर्षार्थं यन्मनसः कर्म तदपि प्रय
त्नवदात्मसंयोगासमवायिकारणकमेव यद्यपीन्द्रियं मनो न
साक्षात्प्रयत्नविषयस्तथापि मनोवहनाडीगोचरेण प्रयत्ने
न मनसि कर्मोत्पत्तिर्द्रष्टव्याः नाड्यास्त्वगिन्द्रियग्राह्यत्वम
ङ्गीकर्तव्यं अन्यथा प्राणवहनाडी-गोचरेण प्रयत्नेनाशि
तपीताद्यभ्यवहरणमपि न संभवेत् ३ ननु मनसि क
र्मोत्पद्यत इत्यत्रैव न प्रमाणमत आह आत्मेन्द्रियमनो

ऽर्थसन्निकर्षात्सुखदुःखे सुखदुःखे सुखदुःखेइत्युपल
क्षणं ज्ञानप्रयत्नाद्यपिद्रष्टव्यंमनसोवैभवंपूर्वमेवनिरा
कृतमणुत्वंचसाधितंयुगज्ज्ञानानुत्पत्तिश्चमनसोलिंगमि
त्युक्तंतेनतत्तदिंद्रियप्रदेशेनमनःसंयोगमंतरेणसुखदु
ःखेनस्यातामेवयदिमनसिकर्मनभवेत् नभवेद्यथापादेमेसु
खंशिरसिमेवेदनेत्याद्याकारोनुभवइत्यर्थः यद्यपिमनःस
न्निकर्षाधीनःसर्वोप्यात्मविशेषगुणास्तथापिसुखदुःखेती
व्रसंवेगितयास्फुटत्वादुक्ते नन्वेवंयदिचपलंमनस्तर्हि
चित्तनिरोधाभावाद्योगंविनानात्मसाक्षात्कारोनवात्
मंतरेणमोक्षइतिशास्त्रारंभवैफल्यमतआह तदनारंभ
आत्मस्थेमनसिशरीरस्यदुःखाभावःसंयोगः विषयेष्वलं
प्रत्ययवतउदासीनस्यबहिरिंद्रियेभ्योव्यावृत्तंमनोयदात्म
स्थमात्मन्यात्रनिष्ठंभवति तदातत्कर्मानुगुणप्रयत्नाभावा
त् कर्ममनसिनोत्पद्यतेस्थिरतरमनोभवतिसएवयोगश्चि
त्तनिरोधालक्षणत्वाद्योगस्यतदनारंभइतिमनसःकर्मोना
रंभइत्यर्थः यद्वातत्सदेनसुखदुःखेनवाभिधीयतेप्रक्रा
न्तत्वात् दुःखाभावइतिदुःखाभावसाधनत्वाद्योगएवदुः
खाभावः अन्नंवैप्राणइतिवत् यद्वादुःखस्याभावोयत्रे
तिबहुव्रीहिःशरीरस्येतिशरीरावच्छिन्नस्यात्मनःसंयोग
इतिप्रसिद्धिसिद्धतयातत्सदृंअयंसंयोगोय आत्मपदेना
त्रप्राणउच्यतेउपचारात्प्राणानुमेयत्वादात्मनः तथाच
प्राणावहनाड्यांकर्मणाप्राणकर्मोपजायतेयद्वाजीवन

योनिरत्नवदात्मप्राणसंयोगासमवायिकारणकं प्राणकर्मजी

वनयोनिश्चयत्नोतींद्रियः प्राणसंचारानुमेयः कथमन्य

थासुषुप्त्यवस्थायामपिश्वासप्रश्वासगतागतमिति भावः

ननु प्राणस्य मनसश्च कर्म यदिप्रयत्ननिमित्तकं तदा प्राणम

नसीयदामरणावस्थायामपसर्पतोदेहाद्बहिर्भवतो देहांतरो

त्पत्तौ तत्र पुनरुपसर्पतः प्रविशतस्तत्तैयप्रयत्नाभावात्तदुभयम

नुपपन्नं असितपीतभक्तपानीयादितस्यापिशरीरावयवोप

चयहेतुर्यहेतुर्यः संयोगस्तज्जनकंयत्कर्मयच्चगर्भवासदशायां

यौ संयोगविभागजनकं कर्मतेषां कथमुत्पत्तिरत आह अप

सर्पणमुपसर्पणमशितपीतसंयोगाः कार्य्यांतरसंयोगाश्चेत्य

दृष्टकारितानि अत्रनपुंसकमनपुंसकेनैकवच्चास्यान्यत

रस्यामिति नपुंसकनिर्द्देशः संयोगपदं च तत्कारणे कर्मणिला

क्षणिकं अपसर्पणं देहारंभककर्मक्षये देहाद्देवप्राणमनसो

रुत्क्रमणं उपसर्पणं च देहांतरोत्पत्तौ तत्र प्राणमनसोः प्रवेश

नं अशितपीतादिसंयोगहेतुश्च कर्म कार्य्यांतरं गर्भशरीरं त

त्संयोगहेतुश्च यत्कर्म तत्सर्वमदृष्टवदात्मसंयोगासमवायिका

रणकं इति कारेण धातुमलकर्मणाम अदृष्टवदात्मसंयोगा

समवायिकारणत्वं सूचयति ननुदेहांतरोत्पत्तेरावश्यकत्वं च

त्तदा कथं मोक्षइत्यत आह तदभावे संयोगाभावोऽप्रादुर्भा

वश्च मोक्षः इदमत्राकूतं योगबलेनात्मतत्त्वसाक्षात्कारे सति

तेन च सवासनमिथ्याज्ञाने ध्वस्ते तन्निबंधानां रागद्वेषमो

हानां दोषाणामपायात् प्रवृत्तेरपाये तन्निबंधनस्य जन्म

वै० सू० टी०
६५
65

नोऽपायेतन्निबंधनस्यजन्मनोऽपायेतन्निबंधनस्यदुःखस्या
पाय इति तावद्दुःखगतिः तत्र योगी योगजधर्मबलेन तत्तद्देश
कालतत्तद्बुभुक्षमतंगजभुजंगविहंगादिदेहोपभोग्यसुखदुःखा
धासाधारणकारणधर्माधर्मनिकुरम्बमालोच्य तत्तत्कायव्यूह
निर्वर्त्त्यभोगेन पूर्वोत्पन्नधर्माधर्मक्षये निवृत्तदोषस्य धर्मो
त्पत्त्यनुत्पत्तावपूर्वशरीरानुत्पत्तौ पूर्वशरीरेण सहात्मनो यः सं
योगाभावः स एव मोक्षः तदभाव इति अनागतशरीरानुत्पाद
संयोगाभाव इत्यर्थः नन्वियमवस्था प्रलयसाधारणी सतत आ
ह अप्रादुर्भाव इति यदनन्तरं शरीरादि पुनः प्रादुर्भावो न भव
तीत्यर्थः स मोक्ष इति तस्यामवस्थायां यो दुःखध्वंसः स
मोक्ष इत्यर्थः ननु तमसोपि द्रव्यस्य कर्म दृश्यते चलति छा
येति प्रत्ययात् तत्र न प्रयत्नो न वा नोदनाभिघातौ न वा गुरु
त्वद्रवत्वे न वा संस्कारस्तथा च निमित्तान्तरं वक्तव्यं तच्च नानुभूयमा
नमित्यत आह द्रव्यगुणकर्मनिष्पत्तिवैधर्म्यादभावस्तमः
एतेन नवैव द्रव्याणीत्यवधारणमप्युपपादितं द्रव्यनिष्पत्ति
स्तावत् स्पर्शवद्द्रव्याधीना न च तमसि स्पर्शोनुभूयते न चानु
द्भूत एव स्पर्शः रूपोद्भवे स्पर्शोद्भवस्यावश्यकत्वात् पृथिव्याम
यं नियमस्तमस्तु अस्पर्शं द्रव्यमिति चेत् न द्रव्यान्तरस्य नीलरू
पानधिकरणत्वात् नीलरूपस्य च गुरुत्वनान्तरीयकत्वात् र
सगंधनान्तरीयकत्वात् यथाकाशं शब्दमात्रविशेषगुणं तथा
तमोपि नीलरूपमात्रविशेषगुणं स्यादिति चेत् न चाक्षुष
त्वविरोधात् यदि हि नीलरूपवन्नीलं रूपमेव वा तमः स्या

द्रष्ट्वालोकोपग्रहमंतरेणचक्षुषानगृह्येत तर्हिगतिप्रतीतिः
किन्निबंधनेत्यतआह तेजसोद्रव्यांतरेणावरणाच्च गच्छता
द्रव्यांतरेणावृते तेजसि पूर्वदेशानुपलंभादग्रिमदेशेचोप
लंभात्तेजोऽभावस्य गच्छद्द्रव्यसाधर्म्याद्गतिभ्रमो नतुवास्त
वीतत्रगतिरित्यर्थः अन्वयव्यतिरेकाभ्यांतथाप्रतीतेः उ
द्भूतरूपयावत्तेजःसंसर्गाभावस्तमः एवंद्विसूत्रकंप्रासंगि
कंतमःप्रकरणंसमाप्यकर्मशून्यताप्रकरणमाह दिक्काला
वाकाशंचक्रियावद्वैधर्म्यान्निष्क्रियाणि चकारादात्मसंग्रहः
क्रियावतावैधर्म्यंदिगादिनाममूर्तत्वंमूर्त्तस्यतुविधानात्तत्क्रि
यायाः गुणकर्मणोर्निष्क्रियत्वमाह एतेनकर्माणिगुणाश्च
व्याख्याताः एतेनेतिक्रियावद्वैधर्म्येनेत्यर्थः क्रियावद्वै
धर्म्यममूर्त्तत्वंगुणकर्मणोरप्यस्तीतितेअपिनिष्क्रियत्वेव्याख्याते
इत्यर्थः ननुयदिगुणकर्मणीनिष्क्रियेतदाताभ्यांद्रव्यस्य
कथंसंवंधःसंयोगःसंवंधःसंभाव्येभौमस्यचकर्माधीनए
वेत्यतआह निष्क्रियाणांसमवायःकर्मभ्योनिषिद्धः निष्क्रि
याणांगुणकर्मणांसमवायएवसंवंधःसचकर्मभ्योनिषिद्धः
तस्यसंवंधस्योत्पत्तिरेवनास्तिदूरेतुकर्माधीनेत्यर्थः ननुय
द्यमूर्तत्वाद्गुणानांसमवायएवसंवंधःसचकर्मभ्योनिषि। कर्मस
मवायिकारणंनभवंतितदागुणेर्गुणाःकर्माणिचकथमुत्पा
द्यंतेनहिसमवायिकारणातिरिक्तेनापिरूपेणकारणता
संभवतीत्यतआह कारणंत्वसमवायिनोगुणाः गुणाअ
समवायिकारणंनतुसमवायिकारणमपियेनकर्माधाराः

स्युः सा चासमवायिकारणता क्वचित्कार्ये कार्यसमवायात् यथात्ममनःसंयोगस्यात्मविशेषगुणेषु संयोगविभागशब्दानां शब्दे क्वचित्कारणैकार्यसमवायात् यथा कपालादिरूपादीनां घटादिरूपादिषु नन्विह कर्मोत्पद्यत इदानीं कर्मोत्पद्यत इत्यादिप्रतीतिवलाद्दिक्कालादौ कर्मसमवायिकारण एव कथमन्यथा तत्र तयोर्वाधा तेत्याह गुणैर्दिग्व्याख्याता यथा गुरुत्वादयो गुणाः कर्मसमवायिकारणमसन्ते तत्वात् तथा दिगपि न कर्मसमवायिकारणमसत्त्वादेवेत्यर्थः आधारता तु समवायितां मन्तरेण्यापि कुण्डे वदराणि कुण्डे दधि वने सिंहनाद इत्यादिवदुपपद्यत इति भावः उक्तेनैवाभिप्रायेणाह २६ कारणेन कालः निष्क्रियत्वेन व्याख्यात इति परिणास्यान्वषंगः कारणेनेति भावप्रधानो निर्देशः तेन निमित्तकारणत्वेनाधारमात्रं कर्मणः कालो न तु समवायीत्यर्थः

इति श्रीशांकरे वैशेषिकसूत्रसंस्कारे पंचमोऽध्यायः ५

संसारमूलकारणयोर्धर्माधर्मयोः परीक्षा षष्ठाध्यायार्थः धर्माधर्मौ च स्वर्गकामो यजेत न कलं जम्भक्षयेदित्यादिविधिनिषेधवलकल्पनीयौ विधिनिषेधवाक्ययोः प्रामाण्ये सति स्यातां प्रामाण्यं च वक्तुर्यथार्थवाक्यार्थज्ञानलक्षणगुणपूर्वकत्वादुपपद्यते स्वतः प्रामाण्यस्य निषेधात् अतः प्रथमं वेदप्रामाण्यप्रयोजकगुणसाधनमुपक्रमते बुद्धिपूर्वा वाक्यकृतिर्वेदे वाक्यकृतिर्वाक्यरचना नासा बुद्धिपूर्वा वक्तृयथार्थवाक्यार्थज्ञानपूर्वा वाक्यरचना

वान्नदीतीरे पंच फलानि संतीत्यस्मदादिवाक्यरचनावत् वेद
इतिवाक्यसमुदायः इत्यर्थस्तत्र समुदायिनां वाक्यानां कृतिः प
क्षः नचास्मदादिबुद्धिपूर्वकत्वेनान्यथासिद्धिः स्वर्गकामो
यजेतेत्यादाविष्टसाधनतायाः कार्य्यतायावा अस्मदादिबुद्ध्य
गोचरत्वात् तेन स्वतंत्रपुरुषपूर्वकत्वं वेदे सिध्यति वेदत्वंच श
ब्दतदुपजीविप्रमाणातिरिक्तप्रमाणजन्यप्रमित्यविषयका
र्थत्वे सति शब्दजन्यवाक्यार्थज्ञानाजन्यप्रमाणशब्दत्वं प्रका
रांतरेण वेदवाक्यानां बुद्धिपूर्वकत्वमाह ब्राह्मणे संज्ञाकर्म
सिद्धिलिंगं ब्राह्मणमिह वेदभागस्तत्रयदुत्पादकस्य
बुद्धिमाक्षिपति यथा लोके लम्बकर्णदीर्घनासलंबग्रीवादि
नामकरणं प्रकारांतरमाह बुद्धिपूर्वो ददातिः स्वर्गका
मो गां दद्यादित्यादौ यद्दानप्रतिपादनं तद्दानेष्टसाधनत्वज्ञान
जन्यं ददातिरिति धातुनिर्देशो धात्वर्थदानमुपलक्षयति प्रमा
णांतरमाह तथा प्रतिग्रहः प्रतिग्रहप्रतिपादिका अपि
श्रुतयो बुद्धिपूर्विकाः प्रतिग्रहपदं स्वविषयां श्रुतिमुपल
क्षयति तेन भूम्यादिप्रतिग्रहपादिकाः श्रुतयः प्रतिग्रहस्य श्रे
यःसाधनतापराः कृष्णसारचर्मादिप्रतिग्रहप्रतिपादिकाः
श्रुतयः प्रतिग्रहीतुरनिष्टसाधनताबोधिकाः नचेष्टानि
ष्टसाधनते ऽर्वाचीनपुरुषबुद्धिगोचरौ भवितुमर्हतः इ
दानीं शास्त्रदेशितं फलमनुष्ठातरीति जैमिनीयं सूत्रं सं दू
न्नाह आत्मांतरगुणानेयोरकारणत्वात् एवंच प्रत्या
त्मनिष्ठाभ्यामेव धर्माधर्माभ्यां सुखदुःखेन व्यधिकर

त्संज्ञाकर्म नामकरणं त

नो मे त्मान्तर २ ... आत्मान्तरे
आत्मान्तर गुणानां यागादि जन्य पुण्यपापानाम्
यो न सुखदुःखादि ... कारणत्वात्

वै० सू० वृ०
६७
67

णाभ्यां अन्यथायेनयागहिंसादिकं नकृतं तस्यतत्फलंस्याद्ये
नतुकृतंतस्यतत्फलंनस्यादितिकृतहानिरकृताभ्यागमश्च
प्रसज्येत् ननुनायंनियमः पुत्रेष्टिपितृयज्ञादौव्यभिचारा
त् तथाहिपुत्रेणकृतस्य श्राद्धादेः पितरिफलश्रवणात् पि
त्राचकृतायाः पुत्रेष्टेः पुत्रेफलश्रवणात् नचस्वर्गभागि
पितृकत्वस्यतेजस्विपुत्रकस्य चफलस्यपुत्रपितृगामिता
यासामानाधिकरण्यमेवेतिवाच्यंश्रुतिविरोधात् पितृस्वा
देः पुत्रतेजस्वितादेरेवफलस्यश्रवणात् फलांतरस्यच
गौरवपराहतत्वात् अस्तुतर्हिपूर्वफलंकर्तरिस्वर्गस्तु
पितरीतिचेत् नव्यापारस्यफलसामानाधिकरण्यनिय
मात् अन्यथाश्राद्धानंतरंमुक्तेपितुः स्वर्गोनस्यादितिचे
त् नमुक्तेपितरिसांगादपिश्राद्धात्फलंनस्यादितितुल्यत्वा
त् मैवंशास्त्रदेशितंफलमनुष्ठातरीत्यस्योत्सर्गत्वात् क्व
चिद्बलवताबाधकेनापोद्यत्वात् प्रकृतेचपितृपुत्रगतफ
लश्रवणस्यैवबाधकत्वात् तथासत्यतिप्रसंगइतिचेन्नता
दृशश्रुतेरेवातिप्रसंगनिवारकत्वात् यत्तुमहादानादौस्व
र्गमात्रमेवफलंतच्चयदुद्देशेनक्रियतेतत्कृतमपिफलंजनय
तीतितत्तुच्छं तत्रोत्सर्गेबाधकाभावात् बाधकाभावसहित
स्योत्सर्गस्यनियमत्वात् राजादीनामुपवासाद्यनुष्ठानाना
पत्तेः परद्वारैवतत्तत्कर्मणांस्वगतफलमुद्दिश्यानुष्ठाप
नसंभवात् सम्यग्गृहस्थाश्रमपरिपालनस्यब्रह्मलो
कावाप्तिरूपैवफलेतियमएवश्रौतेस्विकफलाभिप्राये

णात्तस्वर्गाभिधानात् वृत्तिकारैः स्कन्दशास्त्रे देशितमित्यादि
नियम एव पित्रादीनां तु यत्फलं तत् श्राद्धादौ भोजितानां ब्रा
ह्मणानामाशीर्मन्त्रानुभावात् कृतार्थास्ते पितरो भूयासु
रिति पितृयज्ञे पुत्रेष्टौ तु संतुष्टानां द्विजानामाशीर्दानात् ते
जस्वी वर्चस्वी अन्नादस्ते पुत्रो भूयादित्यादेः जांगलिकमंत्रपा
ठादिवर्गेष्टस्य विषापहरणमित्याहुः अदुष्टानां यथाशा
स्त्रमनुवर्त्तमानानां भोजनात्तृप्तानामाशीर्दानात्तत्फलं न
तु दुष्टानां पात्रत्वेन निषिद्धानामपि कुंडगोलकप्रभृतीनामि
त्याह तद्दुष्टभोजनेन विद्यते तदित्याशीर्दानफलं परामृ
षति दुष्टा ब्राह्मणाः पात्रानधिकारिणो यत्र श्राद्धे भोज्यन्ते
तत्र पितरि तत्फलं न विद्यते न भवतीत्यर्थः श्राद्धफलमेव वा
न भवति पितरीत्यर्थः के ते दुष्टा इति दुष्टलक्षणमाह दु
ष्टं हिंसायां हिंसायामिति निषिद्धकर्ममात्रोपलक्षणं तेन नि
षिद्धे कर्मणि प्रवृत्तं पुरुषं दुष्टं विजानीयादित्यर्थः न केवलं
दुष्टब्राह्मणस्य श्राद्धे निमंत्रितस्य भोजनेन फलाभावः किंतु पा
पमपि भवतीत्याह तस्य समभिव्याहारतो दोषः तस्य नि
षिद्धे कर्मणि प्रवृत्तस्य ब्राह्मणस्य समभिव्याहारत एकपंक्तिभो
जनसहशयनसहाध्ययनादिलक्षणात् दोषः पापमित्यर्थः
ननु किमदुष्टसमभिव्याहारादपि दोष एव नेत्याह तददुष्टे
न विद्यते तस्यापमदुष्टे यथाशास्त्रं व्यवहरमाणे ब्राह्मणे
श्राद्धे भोजिते न विद्यते न भवतीत्यर्थः ननु सत्सामग्र्याप्रति
लंभे यत्र श्राद्धदानादौ प्रथमं दुष्टा एव निमंत्रिताः क्रमेण

तुसत्यात्रप्रतिलंभेकिंविधेयमित्याह पुनर्विशिष्टप्रवृत्तिः
श्राद्धेप्रतिग्रहेवाविशिष्टायथाशास्त्रमनुवर्त्तमानायदिल
भ्यंतेतदानिमंत्रितानपिनिंद्यान्परित्यज्यानिंद्यानेवभोज
येत् नतिमंत्रितान् प्रत्याचक्षीतेतितुसत्यात्रपरं निंद्या
स्तुनिमंत्रितान् द्रविणदानादिनासंतोषयेत् यत्रस्वापे
क्षयाविशिष्टानलभ्यंतेश्राद्धदानादौतत्राह समेहीनेवा
प्रवृत्तिः समेस्वसदृशेहीनेस्वापेक्षयागुणादिनान्यूनेअदुष्टे
पात्रेश्राद्धदानादौप्रवृत्तिस्तेषामेवोशीत्वेनात्तपितरिसुखमि
त्यर्थः निषिद्धानापरंत्यागोनत्वदुष्टानांसमहीनानामपीति
भावः श्राद्धेदानादौतुसंप्रदानसाद्गुण्येनधर्मोत्पत्तिमभि
धायतद्दशादपादानादपिधर्मोत्पत्तिमतिदिशति एतेन
हीनसमविशिष्टधार्मिकेभ्यः परस्वादानंव्याख्यातं यथो
त्तरं धर्मोत्कर्षः हीनादपिभूम्यादिप्रतिग्रहेसमादपिस्वापे
क्षयाविशिष्टधार्मिकेभ्यःपरस्वादानंव्याख्यातं यथोत्त
रं धर्मोत्कर्षःहीनादपिभूम्यादिप्रतिग्रहेसमादपिस्वापेक्ष
याविशिष्टादपिधार्मिकादपिधर्मइत्यर्थः परस्वादानंप
रस्मात्स्वस्यधनस्यादानंप्रतिग्रहः वृत्तिकारास्तु परस्वा
दानंचौर्यादिनापरस्वग्रहणंव्याख्यातंतथाचश्रुतिःशूद्रा
त्प्रथमतमेवैश्यात्द्वयमेक्षत्रियात्पंचदशेब्राह्मणात् प्राण
संशयेसुधापीडितमात्मानंकुटुम्बंवारक्षितुंसप्तदिना
न्याहारमप्राप्यशूद्रभक्ष्यायहारःकार्य्यः एवंदशदिना
न्याहारमप्राप्यवैश्यात् पंचदशदिनान्याहारमप्राप्य

क्षत्रिया प्राणसंशये ब्राह्मणात् भक्ष्यापहरणं न दोषायेत्या
हुः नकेवलं प्राणसंशये परस्वादानं न निषिद्धं किंतु तस्माद
शायामपहर्तुं येन प्रयच्छंति तेषां वधोपि कार्य्यो न तावता ध
र्महानिरधर्मप्रादुर्भावो वेत्याह ३ तथा विरुद्धानां त्यागः
तस्यां दशायां विरुद्धानां विपरीतमाचरतां त्यागो वधः कार्य्य
इत्यर्थः तदुक्तं कर्मणा येन केनापि मृदुना दारुणेन वा उद्ध
रेद्दीनमात्मानं समर्थो धर्ममाचरेदिति ननु चाविशेषेणैव
परस्य वधो नेत्याह हीने परे त्यागः यदि स्वस्माद्धीनः परो
भवति यो यहर्तुं न ददाति तस्य शूद्रादेस्त्यागो वध इत्यर्थः
सममधिकृत्याह समआत्मनस्त्यागः परत्यागो वा यदि
स्वसदृशो ब्राह्मण एव विरोधी भवति तदात्मन एवोपवासादि
नात्यागो वसादः कर्त्तव्यः यदि तु स्वस्य कुटुम्बस्य वा रक्षा प्रका
रेण दृश्यते विरोधी च समो भवति तदात्मन एवोपवासादिना
त्यागो वसादः कर्त्तव्यः यदि तु स्वस्य कुटुम्बस्य वा रक्षाप्रका
रेण दृश्यते विरोधी च समो भवति तदा तस्यैव त्यागो वध इत्यर्थः
ननु किं स्वापेक्षया विशिष्टो भवति विरोधी तस्यापि वध एव
कार्य्य नेत्याह विशिष्ट आत्मत्याग इति स्वापेक्षया विशिष्टे
वेदाध्ययनादिना उत्कृष्टे विरोधिन्यात्मन एव त्यागो विधे
यः प्राणसंशये सत्यप्यात्ममरणमेवाभिप्रेयान्न तु ब्राह्मणं
हन्यादित्यर्थः इति वाह्निक परिसमाप्तौ इति शांकरे दैवार
षिकसूत्रसंस्कारे षष्ठस्याध्यायस्याद्यमाह्निकं एवं पूर्वा
ह्निके वैदिकी प्रमा गुणजन्येति दुष्टत्वो गुणाभिधानं शा

स्त्रदेशितं फलमनुष्ठातरी विरेचनं निषिद्धाचरणेपि प्रसवाया
नुत्पत्तिः कस्यांचिद् शायामिसस्य विवेचनं च वृत्तम घुनायते
भ्युदयनिः श्रेयससिद्धिरितिद्वितीयं सूत्रं व्याचिख्यासुर्विशे
षतोधर्मो स्यतिपरीक्षायां वर्त्तिष्यमाणामाह दृष्टादृष्टप्र
योजनानां दृष्टभावे प्रयोजनमभ्युदयं दृष्टप्रयोजनानि कृ
षिवाणिज्यराजसेवादीन्यदृष्टप्रयोजनानियागदानब्रह्मचर्य्या
दीनिएतेषांकर्मणांमध्येयत्र दृष्टं प्रयोजनं नोपलभ्यतेतत्रा
दृष्टंप्रयोजनंकल्पनीयं तत्राभ्युदयायतत्त्वज्ञानायप्रदा
अभ्युदयायेतिचतुर्थीप्रथमार्थेतेनफलमभ्युदयइत्य
र्थः अदृष्टंफलमपूर्वमेवतद्यदियोगजंतदाभ्युदयआत्मसा
क्षात्कारोयदिचयागदानादिजंतदाभ्युदयः स्वर्गः तत्रापिय
पादौ च्चियचनीत्यादिक्रियासद्यः फलिकाव्यपत्तिकर्षनी।
त्यादिक्रियाचचिरभाविफलातथाच जातिंदद्यातिब्रह्मचर्य्यंचर
तीत्यादिक्रियाती वलस्य सः फलिकानभवतितादृशस्यफल
स्यानुपलब्धेः नचधार्मिकतयाज्ञानाल्लाभादिकमेवफलं
प्रच्छन्नंब्रह्मचर्य्यादिचरतोस्फलानुदेयात तस्माच्चिरभावि
स्वर्गादिकमेवफलंनचाशुतरविनाशिन्याः क्रियायानसा
क्षादिस्यांतरएलिकंक्रियाफलयोः समानाधिकरणम
पूर्वमेवपर्य्यवस्यति अदृष्टफलानिकर्माणिपरिसंचष्टे
१ अभिषेचनोपवासब्रह्मचर्य्यगुरुकुलवासवानप्र
स्थयज्ञदानप्रोक्षणादिङ्नक्षत्रकालनियमाश्चादृष्टाय
अदृष्टायेत्यदृष्टलक्षणायफलायादृष्टद्वारास्वर्गापवर्ग

मन्त्र

क्षणायफलायवाएतेनादृष्टफलश्रौतस्मार्त्तसकलकर्मो
पग्रहः तथाभिषेचनंगंगायांस्नानादित्यादिविधिविधेयं
उपवासएकादशीसुपर्वदेत्यादिविधिविधेयः ब्रह्मचर्य्यसमा
म्यतएवधर्मसाधनंगुरुकुलवासोब्रह्मचारिणांवेदाध्यय
नमहानाम्न्यादिव्रतार्थः वानप्रस्थंवयःपरिणामेवनंप्रतिप्र
स्थितानांयत्कर्मयज्ञोराजसूयवाजपेयादिः दानंगांदद्यादि
त्यादिविधिविधेयंप्रोक्षणंव्रीहिन्प्रोक्षतीत्यादिविधिवि
धेयंदिक्प्राचीनप्रवणेयजेतप्राङ्मुखोन्नादिभुंजीतेत्यादि
विधिविधेयानक्षत्रंश्राद्धरोमघादिः मंत्रआपोहिष्ठेत्या
दिः कालोमासिमासिवोशनमावास्यायामपराह्णेदद्यात्यी
षमेयंचतथावसंतेऽग्नीनादधीतेत्यादिविधिविधेयःनिय
मोवर्णाश्रमिणांयथाशास्त्रमनुष्ठानंतदेवंधर्मस्यात्मासम
वायिकारणमात्ममनः संयोगोऽसमवायिकारणंश्रद्धास्वर्गा
दिलक्षणप्रयोजनज्ञानंचनिमित्तकारणमनुसंधेयं एवं
धर्मसाधनमभिधायाधर्मसाधनमपिसंक्षिप्तेनाह
चातुराश्रम्यमुपधाअनुपधाश्च चतुर्णामाश्रमाणांसमा
नंयद्धर्मसाधनंतत्रावपूर्वसूत्रेणोक्तमितिशेषः उपधा
भावस्यश्रद्धायादोषः अनुपधाश्चश्रद्धायाभावस्यादोषाः
तेपिधर्माधर्मयोःसाधनानियथास्वमूहनीयानि उपधाप
देनाधर्मसाधनानिसर्वाण्युपगृहीतानिउपधानुपधे
लक्षणतोविवेचयन्नाह २ भावदोषउपधाऽदोषोनु
पधा भावदुष्टात्मनः प्रमादोश्रद्धामदमानास्वस्वाप्र

ष्टंतयोर्भावादोषाउपधापदेनोच्यंतेश्रद्धामनःप्रसादोदेशि
तकर्मानुष्ठानाध्यवसाय इतिकर्तव्यतापरिच्छेदश्चानुपधा
नदेतयोर्द्वैमाधर्मनिमित्तकारणत्वमुक्तं शुच्यशुचिनी
चोपधानुपधेतत्रशुच्यशुचिनीविवेचयति यदिष्टरूप
रसगंधस्पर्शंप्रोक्षितमभ्युक्षितंचतत् ।शुचिरिष्टंश्रक्सा
स्रक्साचयद्द्रव्यादिकंविहितंयस्यद्रव्यस्यतत्तथातेरूपमर
णायैकहायन्यापिपिंगाक्ष्यागवासोमंक्रीणातिश्वेतंछा
गमालभेतेत्यादौप्रोक्षितंमंत्रेणोदकसिक्तंअभ्युक्षितं
विनामंत्रमुदकसिक्तंचकारान्न्यायतोलब्धंतच्चयजनाध्या
पनप्रतिग्रहैर्ब्राह्मणोधनमर्जयेदित्यादिनियमविधिबो
धितं अशुचिलक्षणमाह ५ अशुचीतिशुचिप्रतिषेधः
यद्द्रव्यंशुचितद्विपरीतमशुचीत्यर्थः अप्रशस्तरूपरसगं
धस्पर्शममंत्रप्रोक्षितमनभ्युक्षितंनिषिद्धजलाभ्युक्षितं
वा अन्यायार्जितंकृषिवाणिज्याद्यागतंब्राह्मणस्यद्रव्यम
शुचीत्यर्थः अशुच्यंतरमाह ६ अर्थांतरंच प्रशस्त
रूपरसगंधस्पर्शमपिप्रोक्षितमभ्युक्षितंन्यायार्जितंच
यत्तदपिवाग्दुष्टंभावदुष्टंचयत्तदप्यशुचीत्यर्थः इदानीं
धर्माधर्मौप्रतिसहकार्यांतरमाह ७ अयतस्यशुचि
भोजनादभ्युदयोनविद्यतेनियमाभावात् विद्यतेऽवा
र्थांतरत्वाद्यमस्य अयतस्य·यमरहितस्यासंयतस्या
संयतस्येतियावत् हस्तौपादौप्रक्षाल्याचम्यवाग्यतोभुं
जीतभोक्ष्यमाणः प्रयेतोपिद्विराचमेदित्यादिबोधि

तयमरहितस्यभोजनंनाभ्युदयाय किंतुपापायकुतएवमि
त्यत आह नियमाभावात् नियमस्य सहकारिणोऽभावात् नि
यमेसतियत्तदाहविद्यतेवायथोक्तयमसाहित्येनाभोजनेभव
त्येवाभ्युदयः कुतइत्यत आह अर्थान्तरत्वाद्यमस्यभोजनाद
र्थान्तरंयतोयमस्तस्माच्च सहकारिकारणंविनानफलसिद्धिस्त
स्मिन् सतिफलसिद्धिरित्यर्थः ननुयममात्रमेवतन्त्रंतर्हिभो
जनमतन्त्रमेवेत्यत आह असतिचाभावात् यमेसत्यपिशु
चिभोजनेऽसत्यभावादभ्युदयस्येतिशेषः तथाचयमोभो
जनंचद्वयंपुण्यकारणमित्यर्थः भोजनमित्युपलक्षणंयाग
दानस्नानहोमादीनामपिश्रौतस्मार्तकर्मणांयमनियमौसह
कारिणौ एवंधर्माधर्मप्रादुर्भावेप्रतियमंसहकारिकारण
मभिधायदोषंसहकारिणमभिधातुंदोषनिदानमाह सु
खाद्रागः स्रक्चन्दनवनितादिविषयानुभवजन्मनः सुखा
दुत्तरोत्तरतज्जातीयसुखेतत्साधनेवारागइच्छासंतायते अहि
कंटकादिजन्मनोदुःखात्तत्रतत्साधनेवा द्वेषइत्यपिद्रष्ट
व्यंरागद्वेषमोहाश्चप्रवर्त्तकत्वेनदोषाइत्यभिधीयंते तथाच
गौतमीयंसूत्रंप्रवर्त्तनालक्षणादोषाइति अत्रसुखदुःखेए
वयदिरागद्वेषौजनयतस्तदातयोर्नाशेकथंतौस्यातामतआ
ह ११ तन्मयत्वाच्च रागद्वेषौभवतइतिशेषः विषयाभ्यासजनि ना:
तोदृढतरः संस्कारविशेषस्तन्मयत्वंयद्वशात्कामातुरः कामि
नीनलभमानस्यसर्वत्रकामिनीदर्शनं एकदाभुजंगदष्टस्य
तत्रदृढतरसंस्कारवतः सर्वत्रभुजंगदर्शनंतदुक्तंतन्मयत्वं

वै० सू० वृ०

७१

71

तत्प्रकाशोबाह्याभ्यंतरतत्त्वयेति हेत्वंतरं समुच्चिनोति १२ अ
दृष्टाच्च रागद्वेषाविति शेषः यद्यप्यदृष्टंसाधारणकारणंत
थापिकंचित्तं प्रत्यसाधारणतामप्यनुभवतियथातन्मानानु
भूतकामिनीसुखस्यापि यौवनोद्भेदे कामिनीरागः अननुभूत
भुजंगदंशदुःखानामपि भुजंगेषु द्वेषः परस्याप्युन्नेयं न
च प्राग्भवीयः संस्कार एवात्र निबंधनं तत्कल्पने दुर्बोधक
ल्पने च प्रमाणाभावात् अदृष्टस्यावश्यकल्पनीयत्वात्
सहकार्य्यंतरमाह १३ जातिविशेषाच्च रागद्वेषावि
ति शेषः तथाहि मनुष्यजातीयानामन्नादौ रागः मृगजाती
यानां तृणादौ करभजातीयानां कंटकादौ तत्रापि तत्तज्जा
तिनिष्पादकमदृष्टमेव तंत्रं द्वारमात्रं तु जातिविशेषो ज
न्मविशेषः एवं पारावतादीनामुक्तो रागः तथा महिष
जातीयानां तुरंगमे द्वेषः सारमेयाणां सृगाले नकुलानां भु
जंगमे इत्याद्यून्नेयं एवं धर्माधर्मनिमित्ततया रागद्वेष
निमित्तामपि परिसंख्याय संप्रति दोषाणां धर्माधर्मकारण
त्वं प्रवृत्तिद्वारेणाह १४ इच्छाद्वेषपूर्विका धर्माधर्मप्र
वृत्तिः विहिते कर्मणि रागनिबंधना निषिद्धे कर्मणि हिंसा
दौ द्वेषनिबंधना प्रवृत्तिः रागनिबंधना यागादौ प्रवृत्तिर्द्धर्मं
प्रसूते द्वेषनिबंधना हिंसादौ प्रवृत्तिरधर्मं तावेतौ रागद्वे
षौ संसारमनुवर्त्तयतः तथा च गौतमीयं सूत्रं प्रवृत्तिर्वाग्बुद्धि शरीरारंभ इति
बुध्यते ज्ञायतेऽनेनेति मन उच्यते तेन मानसी प्रवृत्तिर्भूतद
यादिः शारीरी प्रवृत्तिर्दानं परिचरणमित्यादिका दशवि।

वागारम्भो वाचिकी प्रवृत्तिः सत्यप्रियं हितं

धापायादृष्टविधापुण्याचेति इदानींधर्माधर्मयोःप्रयो
जनंप्रेत्यभावमाह १५ तत्संयोगोविभागः ताभ्यांधर्माध
र्माभ्यांसंयोगोजन्मअपूर्वाभिःशरीरेंद्रियवेदनाभिःसम्ब
न्धःसंयोगइहोच्यतेविभागस्तुशरीरमनोविभागोमरणल
क्षणःतथाचायंजन्ममरणप्रबन्धःसंसारःप्रेत्यभावापरना
माधर्माधर्माभ्यामित्यर्थःअस्यैवप्रेत्यभावस्याजवंजवीभाव
इतिवैदिकीसंज्ञा तदेतस्यप्रेत्यभावस्यजन्ममरणप्रबंधस्य
यत्रचपर्य्यवसानंतंमोक्षंनिरूपयितुमाह १६ आत्मकर्म
सुमोक्षोव्याख्यातः अयमेवशरीरमनोविभागआत्मक
र्मसुसत्सुमोक्षोभवतीत्यर्थः तत्रात्मकर्मणितावत्श्रवणं
मननंयोगाभ्यासोनिदिध्यासनमासनंप्राणायामःशमद
मसंयतिःस्वात्मपरात्मसाक्षात्कारोदेहदेशांतरोपभोग्यपू
र्वोत्पन्नधर्माधर्मपरिज्ञानंतद्भोगानुरूपनानादेहनिर्माणं
तयोर्भोगेनप्रक्षयोरागद्वेषलक्षणदोषतुषविदमादग्रिमधर्मा
धर्मयोरनुत्पादात् प्रवृत्त्यपायेजन्मापायाद्दुःखापायलक्ष
णोपवर्गस्तत्रषट्पदार्थीतत्त्वज्ञानमाधमात्मकर्म इतिश्री
शांकरेवैशेषिकसूत्रोपस्कारेषष्ठोऽध्यायःपरिसमाप्तः
६ संसारमूलकारणतयासर्वोसत्तिमन्निमित्तकारणत
याभोगसाधनतयाचोत्सतितःप्रत्यात्मनियतत्वेनपरादृष्टस्या
पिपरस्योपयोगित्वेनचधर्माधर्मौपरीक्ष्येदानींगुणान्प
रीक्षिषुस्तेषामुद्देशलक्षणंचस्मारयन्नाह १ उक्तागु
णाः उद्दिष्टालक्षिताश्चगुणाइत्यर्थः तत्ररूपादयःसप्तद

शाकंठरवेणोक्ताश्चशब्दसमुच्चिताश्चसप्तनेन चतुर्विंशतिरपि
गुणाउक्ताः तत्रनित्यवृत्तिनित्यवृत्तिसत्तासाक्षाद्व्याप्यजाति
मत्त्वंगुणत्वंसमवायिकारणावृत्तिनित्यवृत्तिसत्तासाक्षाद्व्या
प्यजातिमत्त्वम्वा असमवायिकारणवृत्तिनित्यवृत्तिसत्तासा
क्षाद्व्याप्यजातिमत्त्वंवाकार्य्यासमानाधिकरणकर्मावृत्ति
जातिमत्त्वंवातत्रगुणत्वेनगुणपरीक्षासप्तमाध्यार्थः त
त्रप्रथमाह्निकेऽनित्यभयागुणपरीक्षानित्यतयापाकज
गुणपरीक्षासंख्याद्यनेकवृत्तिगुणपरीक्षाचेतिपंचप्रक
रणानितत्ररूपादीनांचतुर्णामनित्यत्वमाह २ पृथिव्या
दिरूपरसगंधस्पर्शाद्रव्यानित्यत्वादनित्याश्च पृथिव्यादीनां
वाद्यंतानामवयविनांरूपादयश्चत्वारोगुणाअनित्याःय
द्यप्यन्येपिगुणाअवयविषुवर्त्तमानाअनित्याएवतथा
पितेषामन्यतोपिविनाशः रूपादयश्चत्वारोगुणाआश्र
यनाशादेवनश्यंतिनतुविरोधिगुणादपिद्रव्यानित्यत्वा
दिति द्रव्यस्याश्रयस्यतस्यानित्यत्वादाश्रितानामनित्य
त्वमित्यर्थः रूपादीनामनित्यत्वेयावदाश्रयानित्यत्वंतत्र
तयानित्याश्रयवृत्तीनांनित्यत्वमित्याक्षेपबललभ्यमि
त्याह ३ एतेननित्येषुनित्यत्वमुक्तं रूपादीनामेवच
तुर्णांनित्येष्वाश्रयेषुवर्त्तमानानांनित्यत्वमुक्तंएतेनेति
आश्रयानित्यत्वेनानित्यत्वाभिधानेनेत्यर्थः वृत्तिकृतस्तु
नित्येषुनित्यत्वमुक्तमित्यकारप्रश्लेषस्तथाचसत्यावस्
थायापार्थिवपरमाणुष्वग्निसंयोगान्नाशइतिव्याचक्रुः

नन्ु किं पार्थिवेपि नित्येरूपादीनां नित्यत्वमेवेत्यतो विशिनष्टि

४ अप्सु तेजसि वायौ च नित्या द्रव्यनित्यत्वात् आप्यपर
माणौ रूपरसस्पर्शौ वायुपरमाणौ स्पर्शो नित्यः ननु नित्ये
पि वर्त्तमानां रूपादीनामनित्यत्वे को विरोधः शब्दबुद्ध्यादीना
मिवेत्यतश्चकारेण गुणान्तराप्रादुर्भावो ह्येवं तरं स्याद्यत्र शब्दे
हि तीव्रमन्दादिभावेन गुणान्तरप्रादुर्भावोनुभूयते ज्ञानादौ
च ज्ञानादिविरोधी संस्कारादिः आप्यतैजसवायवीयपरमा
णुषु रूपादिविरोधिगुणान्तरं न प्रादुर्भवति यदि प्रादुर्भावेत्त
दा तदारब्धेषु द्व्यणुकादिप्रक्रमेणाप्याद्यवयविष्वपि पूर्वविजा
तीयं रूपाद्यनुभूयेत न हि शुक्लरूपविजातीयं रूपं तोयतेज
सोर्न्न वा शीतोष्णस्पर्शविजातीयस्पर्शो वा जलतेजसोरनुष्णाशीतो वायु
रित्यादिप्रतीतिरूपाधिनिबन्धनेति भावः पूर्वं पृथिवीमन्त
र्भाव्य नित्येष्वनित्या इत्युक्तमिदानीमाप्यादिष्वेवाह ५ अ
नित्येष्वनित्या द्रव्यानित्यत्वात् अवाद्यवयविरूपादय आश्र
यनाशादेव नश्यन्ति चेत् तत्कथमाश्रयनाशमात्रनाश्या इत्य
त आह ६ कारणगुणपूर्वकाः पृथिव्यां पाकजाः पाक
जा इति रूपरसगन्धस्पर्शा इत्यर्थः कारणगुणपूर्वका इति
रूपाद्यं यस्य घटादेर्यत्समवायिकारणं कपालादि तद्गुण
पूर्वकास्तथा च कपालरूपं कारणैकार्थसमवायप्रत्यासा
त्त्या घटरूपाद्यसमवायिकारणमेवं रसादावपि रूपरसगन्ध
स्पर्शो रूपत्वादिगुणत्वसाक्षाद्व्याप्यजातिमन्तः ननु चचक्षु
र्ग्राह्यत्वमेव रूपत्वमुपाधिरिति चेत् इन्द्रियापातमात्रेण

विरोधिगुणान्तरादय इत्यपेन नु पृथिव्याम वय विरूपापामपि
क पादयोगास्ति संयोगादेवो त्य पन्ते न रूप निच ६

रूपमिति प्रत्ययानुदयप्रसंगात् अननुसंहितोपाधेरूपहि
तप्रत्ययायोगादिति उपाधिश्चात्र चक्षुर्बाह्येन्द्रियग्राह्य
त्वं च ग्रहणविषयत्वं तदप्यचाक्षुषं रूपत्वविशिष्टप्रतीते
श्चाक्षुषत्वात् चक्षुर्मात्रबहिरिन्द्रियग्राह्यगुणत्वं च रूप
त्वं अतीन्द्रियरूपाव्याप्तिरिति चेत् न चक्षुर्मात्रबहिरिन्द्रि
यग्राह्यजातिमत्त्वस्य विवक्षितत्वात् तादृशी च जाती रूपत्वं
नीलत्वादिका चेति नन्वेकैकाएव नीलपीतादिव्यक्तयो नित्या
न तु तत्र नीलत्वादिजातय एकव्यक्तिकत्वादिति चेत् न नी
लतरनीलतमादिप्रत्ययानुदयप्रसंगात् धावल्यादिसं
भेदाभावकृतस्तत्र तारतम्यव्यवहार इति चेत् न प्रमाणा
भावात् श्यामं रूपं नष्टं रक्तमुत्पन्नमिति प्रतीतेश्च न च स
मवायोत्पत्तिविनाशकृतेति वाच्यं समवायस्य तत्रानुल्लेखा
त् तस्य नित्यत्वाच्च घटादेरूपनिस्तायामेवं सत्यनाश्वासा
पत्तेः समवायानित्यत्वे तत्राप्यन्यथासिद्धेः सुवचत्वात् न
नु नीलपीतादयो गुणाद्रव्याभिन्ना एव धर्मधर्मिणोरभेदा
दिति चेन्न रूपं घटः स्पर्शो घट इत्यादिव्यवहारप्रसंगात् न
नु नेदमनिष्टं यतो भवत्येव शुक्लः पटो नीलः पट इत्यादि
प्रतीतिरिति चेत् न मतुब्लोपादभेदोपचाराद्वा प्रतीत्युपप
त्तेः भेदे प्रमाणे सति कल्पनेयं यथाकथंचिदुपपद्यत इ
ति चेत् न चन्दनस्य रूपं चन्दनस्य गन्ध इत्यादिव्यपदेश
बलाद्भेदसिद्धेश्च पटस्य रूपाभेदे पटवद्रूपमपि त्वगिन्द्रि
येण गृह्येत पटमानयेत्युक्ते यत्किंचिद्रूपमानयेत् रूप

मानयेत् रूपमानयेसुक्तेयकिंचिद्द्रव्यमानये तत्रभ्रसत्तर्हि
भेदाभेदः असंतभेदे ऽसंताभेदे च सामानाधिकरण्यानुप
पत्तेरितिचेत् न अवच्छेदभेदं विनाविरुद्धयोर्भेदाभेदयोरे
कत्रासंभवात् अन्योन्याभावत्वमव्याप्यवृत्तिनित्याभाववृत्ति वृत्ति
धर्मत्वात् असंताभाववदितिचेत् न एकत्रसंयोगतदसं
ताभावस्याव्याप्यवृत्तित्वाभ्युपगमात् अन्योन्याभावेतुतयाप्र
तीतेरभावात् तदेवद्रूपं पृथिव्यांनानाप्रकारकं पाथसि।
तेजसि च शुक्रमेव क्वचिदादौ च चित्रमपि रूपमधिकं अ
न्यथा तद्चाक्षुषत्वापातात् रूपवत्त्व एव चाक्षुषद्रव्यत्वात् न
च विजातीयरूपैरूपानारंभः नीलपीतादिनामारंभे रूपत्वेने
व साजात्यस्यापेक्षितत्वात् अन्यथा चाक्षुषत्वानुपपत्तेरुक्तत्वा
त् न चावयवरूपोपग्रहेणैवावयविग्रहः अवयवानाम
पि चित्रतया नीरूपत्वप्रसंगात् यत्र वा परमाणुषु पाकाच्चि
त्रं रूपं च त्रैव तत्परंपरारब्धघटादौ चित्ररूपोपपत्तेः न चै
वं हरीतक्यां रसोपि चित्र इति वाच्यं हरीतक्यानीरसत्वेपि दोषा
भावात् षड्रसत्वव्यवहारस्तत्तद्रसगुणकारितया एवं गं
धोपि न चित्रः सौरभासौरभवदवयवद्वयस्यानारंभकत्वा
त् कर्कद्यादौ क्वचिदवयवे तैक्ष्ण्यं क्वचिन्माधुर्य्यं तया च क
तमो रसः कर्कद्यामिति चेत् माधुर्य्यमेव गुणविरोधेन क
थं तथा स्यादिति चेत् तदवयवयवे तैक्ष्ण्याभावात् तयानु
भवः कथमिति चेत् कर्कटीभक्षणक्षुभितरसनाग्रव
र्त्तिपित्तद्रव्यस्य तिक्ततोपलंभात् तत एव कदाचि न्मुख

मपि तिक्तायते हरीतक्यामपि कथमियं न गतिरिति चेन्न
तदवयवेषु कषायमाधुर्यलवणादिनानारसानुभवादिस्य
लं पल्लवेन तत्र रूपं नयनसहकारि नन्वेवं वायो रूपाभा
वस्य तमसश्च कथं चाक्षुषतेति चेन्न भावस्य महत्त्वरूप
स्य नयनसहकारित्वात् विषयालोकचक्षुषां त्रयाणामपि
पि रूपाणि चाक्षुषप्रतीतिप्रयोजकानि रसोपि रसत्वजातिमा
न् रसत्वं रसनेन्द्रियमात्रजन्यसाक्षात्कारविषयजातिः तादृ
शजातिमत्त्वं च रसत्वं सोयं जीवनपुष्टिबलारोग्यहेतुः रस
नसहकारी रसनेन्द्रियग्राह्यगुणत्वव्याप्यजातिमत्त्वं रसत्वं
तथा सति नातीन्द्रियरसेऽव्याप्तिः घ्राणमात्रग्राह्यो गुणो गन्धः
घ्राणमात्रग्राह्यगुणत्वव्याप्यजातिमत्त्वं गन्धत्वं स च सुरभिरसु
रभिश्चेति द्विविधः यद्वा पृथिवीवृत्तिमात्रवृत्तिगुणत्वसाक्षा
द्व्याप्यजातिमत्त्वं गन्धत्वं एवं स्पर्शोपि स्पर्शत्वजातिमान् गु
णः त्वगिन्द्रियमात्रग्राह्यगुणत्वसाक्षाद्व्याप्यजातिमत्त्वं।
स्पर्शत्वं द्रव्यचतुष्टयवृत्तिश्चायं अनुष्णाशीतशीतोष्णभे
दात्त्रिविधः इदानीं प्रसंगात् पाकजप्रक्रिया विविच्यते तत्र कार्य का
रणसमुदाय एव पच्यत इति पिठरपाकवादिनः पीलवः प
रमाणव एव स्वतन्त्राः पच्यन्ते तत्रैव पूर्वरूपादिनाशाग्निम
रूपाद्युत्पत्तिकारणगुणप्रक्रमेणाचयविनिरूपाद्यस्य
तद्वृत्ति पीलुपाकवादिनः अत्रेदं तत्त्वं आपाकनिःक्षिप्तस्य
घटादेरामद्रव्यस्य वह्निना नोदनाभिघाताद्वा तदारम्भके
षु परमाणुषु द्रव्यारम्भकसंयोगविरोधिविभागेनारम्भक

संयोगनाशेद्रव्यनाशावश्यंभावात् दृश्यतेहिस्याश्यामाहि
तानांतंडुलादीनामप्यधःसंतापनमात्रेणभर्जनात्तदानीमे
वनाशः क्षीरनीरादीनांच संतप्तुलणनात यावापाकेवह्नि।
ज्वालाजालाभिहतानांद्रव्याणांमवस्थानमितिमहतीस्याशा किंच
यदिद्रव्यनाशस्तदामध्यभागेपाकानुपपत्तिः नहिदृत्तराव ८
यवांतरावरुद्धेमध्यभागेतेजःसंयोगसंभावनायेनतत्रश्या
मादिनिवृत्तिःस्यात् तथाचश्यामाअवयवाअवयवीचर
क्तइतिमहद्वैशसंननुसच्छिद्राण्येवावयविद्रव्याणिकथ
मन्यथाकुंभादावंतर्निहितानांतैलघृतादीनांस्यंदनंस्रवणं
चतथाचमध्यभागेपितेजःसंयोगःस्यादेवेतिचेत् नमूर्त्तानां
समानदेशताविरोधाद्दवयांतरसंयुक्तेमध्यभागेतेजःसंयो
गासंभवात् संभवेवातेननोदनादभिघाताद्वाद्रव्यारंभका
वयवक्रियोत्पादादिक्रमेणद्रव्यनाशावश्यंभावस्योक्तत्वात्
ननुयदिद्रव्यनाशःकथंतर्हि सएवायंघटइतिप्रत्यभिज्ञा
कथंवासर्वावस्थास्वापाकादौघटादेस्तादृशस्यैवदर्शनं
घटादेरूपविनिहितानांशबाद्वेदंचनादीनां तथैवदर्शनंघ
टादिस्फुटनेहितेषांपातःस्यात् कथंवा यावंतएवापाके
निहितास्तावंतएवपुनःप्राप्यंतेपरमाणुभिर्द्व्यणुकादिप्रक्र
मेणन्यूनाधिकानांवातदानीमारंभसंभवात् कथंवा
तावत्परिमाणाएवघटादीन्यापाकोत्तीर्णान्युपलभ्यंते
रेखायरेखादिचिह्नविलोपोवाकथन्नभवेत्तथाचावय
विविधेवयाकइतिचेत् मैवंसत्यग्रेणघटादौत्रिचतुरत्न

सत्येणुविभागेसति द्रव्यारंभकसंयोगनाशे द्रव्यनाशे सर्वासा
मनुपपत्तीनामुभयसमाधेयत्वात् नहितत्र द्रव्यं न नश्यतीति
पिठरपाकवादिनोपिवक्तुमुत्सहंते तत्रापिघटादयो न न
श्यंतिकतिपयावयवनाशेप्यवशिष्टावयवमाश्रित्यकार्या
वस्थानसंभावादन्यथाप्रत्यभिज्ञानाद्यनुपपत्तिरेवेतिमी
मांसकाः तेतु तादृगवयवावस्थानयोग्यस्य घटादेः स्वल्पेष्व
वयवेष्वणुकपर्यंतवृत्तिःस्यादिति प्रष्टव्याः अविनष्ट एव घटेप
रिमाणसंकोचवादे तदुपपत्स्यत इति तेषामुत्तरमिति चेत्
न कठिनतरावयवानां काष्ठपाषाणस्तंभकुंभादीनां संको
चविकाशयोरदर्शनात् घटादिनाशाभिमते न तत्परिमाण
मेव नश्यतीतिचेत् न परिमाणस्याश्रयनाशैकनाश्यत्वात्
घटादिप्रत्यभिज्ञानवत् सूचीदलनस्थलेपरिमाणस्या
पिप्रत्यभिज्ञायमानत्वात्तन्मतेतन्नाशस्याप्यनुपपत्तेरिति
दिक् येषांमते द्रव्यारंभकसंयोगप्रतिद्वंद्वी तदप्रतिद्वंद्वी
चविभाग एकस्यैवावयवक्रियाजन्यस्तेषां द्व्यणुकनाश
मारभ्यनवमक्षणे द्व्यणुकांतरेरक्ताद्युत्पत्तिरेकस्मिन्ने
वयवपरमाणौ क्रियाचिंतनात् तथाहि वह्निनोदनाद्व्यणुका
रंभकेपरमाणौकर्म ततोविभागस्ततोद्रव्यारंभकसंयोगना
शस्ततो द्व्यणुकनाशः नष्टे द्व्यणुके केवलेपरमाणवा[illegible]सं ग्नि
योगाच्छ्यामादिनिवृत्तिः श्यामादौ निवृत्तेऽन्यस्मादग्निसं
योगाद्रक्ताद्युत्पत्तिः रक्तादावुत्पन्नेपरमाणुक्रियानिवृ
त्तिः तदनंतरमदृष्टवदात्मसंयोगात्परमाणौकर्म ततोवि

भागस्ततः पूर्वसंयोगनिवृत्तिस्ततश्च परमाण्वंतरेण द्रव्यारंभकः
संयोगस्ततो द्व्यणुकोत्पत्तिरुत्पन्ने द्व्यणुके कारणगुणप्रक्रमेण
रक्ताद्युत्पत्तिरिति नवक्षणाः यदि पूर्वक्रियानिवृत्तिक्षण एव
क्रियांतरमुत्पद्यते तदा यदि तु पूर्वक्रियानिवृत्त्यंतरकाले क्रि
यांतरमुत्पद्यते तदा दशक्षणाः विभागजविभागाभ्युपगमे
पि यदि द्रव्यारंभकसंयोगनाशविशिष्टं कालमपेक्ष्य विभाग
जो विभागस्तदा दशक्षणा यदि तु द्रव्यनाशविशिष्टं कालमपे
क्ष्य विभागेन विभागांतरं जन्यते तदैकादशक्षणा प्रक्रिया त
था हि द्व्यणुकनाशविभागजविभाग इत्येकः कालः ततः पूर्व
संयोगनाशश्यामादिनिवृत्ती उत्तरसंयोगरक्ताद्युत्पत्ती उत्तरसं
योगेन विभागजविभागक्रियानिवृत्ती ततो द्रव्यारंभानुगुणा पर
माणुक्रिया क्रियातो विभागो विभागात्पूर्वसंयोगनिवृत्तिस्ततो
द्रव्यारंभकः संयोगस्ततो द्रव्योत्पत्तिरुत्पन्ने द्रव्ये रक्ताद्युत्पत्ति
रिति दशक्षणाः यदा तु द्रव्यविनाशविशिष्टं कालमपेक्ष्य विभा
गेन विभागो जन्यते तदैकक्षणवृद्ध्या एकादशक्षणाः तथा हि
द्रव्यविनाशस्ततो विभागजविभागश्यामादिनिवृत्ती उत्तर
संयोगरक्ताद्युत्पत्ती ततो विभागजविभागकर्मणोर्निवृत्तिः त
तः परमाणोर्द्रव्यारंभानुगुणा क्रिया ततो विभागः पूर्वसंयोग
निवृत्तिः द्रव्यारंभकसंयोगोत्पत्तिः द्व्यणुकोत्पत्तिः रक्ताद्यु
त्पत्तिश्चेत्येकादशक्षणाः एकस्मिन्नेव परमाणौ क्रिया क्रिया
यां परमचिंतनादेव परमाण्वंतरे यदि द्रव्यारंभानुगुणा क्रिया
चिंत्यते तदा द्व्यणुकविनाशमारभ्य पंचमे षष्ठे सप्तमे वा क्ष

णेरकाद्युत्पत्तिरूहनीया विहितं चैतत् कणादरहस्ये पार्थि
वपरमाणुरूपादीनां तेजःसंयोगासमवायिकारणत्वं साधयि
तुमाह ७ एकद्रव्यत्वात् पाकजानामिति शेषः अत्र च गुण
त्वे कार्य्यत्वे सतीति विवक्षितं तदयं प्रयोगः पार्थिवपरमाणु
रूपादयः संयोगासमवायिकारणकाः कार्य्यगुणत्वे सति
नित्यनिष्ठा द्विगुणत्वात् शब्दवत् बुद्ध्यादिवच्च संयोगज
त्वमात्रं वा साध्यं तेन विभागजे शब्दे न व्यभिचारः वायुसंयो
गस्य शब्दमात्रे निमित्तकारणत्वात् पार्थिवरूपादीनां च तेजो
ऽन्वयव्यतिरेकदर्शनात् तेजःसंयोगासमवायिकारणत्वं पक्ष
धर्मताबलात् सिध्यति रूपरसगंधस्पर्शानेकपृथक्त्वेन गुरुत्वाद्यपरि
माणस्य सर्वसिद्धत्वेन संख्यायां च विप्रतिपत्तिपत्तिबाहुल्यादुद्दे
शक्रममतिक्रम्य सूचीकटाहन्यायेन प्रथमं परिमाणपरीक्षा
मारभमाण आह ८ अणोर्महतश्चोपलब्ध्यनुपलब्धी नित्ये व्या
ख्याते नित्ये इति विषयेण विषयिणं नित्यत्वप्रतिपादकं चतु
र्थाध्यायमुपलक्षयति उपलब्ध्यनुपलब्धी इति यथायोगम
न्वयः येन यस्याभिसंबंधो दूरस्थस्यापि तस्य स इति न्यायेन त
था चाणोरनुपलब्धिरिति लभ्यते तदेवं स्थूलो नीलः कलश
इति प्रात्यक्षिके प्रत्यये यथा नीलं रूपं विषयस्तथा परिमा
णमपि तेन च परिमाणेन परमाणुपर्य्यन्तं परिमाणमनुमी
यते द्रव्यत्वाच्च किंच द्रव्यप्रत्यक्षतायां रूपवत्परिमाणमपि
कारणं नहि महत्त्वमंतरेण द्रव्यं प्रत्यक्षं भवति तथा च द्रव्य
प्रत्यक्षासमकारणत्वेन स्वयं च प्रत्यक्षतया परिमाणं गुणोस्ती

तिनिश्चीयते यदि हि घटादिस्वरूपं परिमाणं स्यात्तदा महदानये
सुक्ते घटमात्रमानयेत् तथा चैवैषसंप्रतीती विरुद्ध्येयातां एवं
घटपदात् परिमाणं प्रतीयेत परिमाणपदाद्वा घट इति मा
नव्यवहारः साधारणकारणत्वं द्रव्यसाक्षात्कारकारणं विषय
निष्ठसामान्यगुणत्वं महत्त्वं मानव्यवहारो हस्तवितस्त्यादिव्य
वहारो न तु पलसंख्यादिव्यवहारः तत्र परिमाणं चतुर्विधं मह
त्त्वमणुत्वं दीर्घत्वं ह्रस्वत्वं च तत्र परममहत्त्वपरमदीर्घत्वे विभुचतु
ष्टयवर्त्तिनी परमाणुत्वपरमह्रस्वत्वे परमाणुवर्त्तिनी अवांत
राणुत्वावांतरह्रस्वत्वे द्व्यणुकवर्त्तिनी त्रसरेणुमारभ्य महावयवि
पर्य्यन्तं महत्त्वदीर्घत्वे एवं च सर्वाण्यपि द्रव्याणि परिमाणद्वयवं
ति बिल्वामलकार्ण्युत्वव्यवहारः समिदिक्षुदंडादिषु च ह्रस्वत्वव्य
वहारो भाक्तः भक्तिश्चात्र प्रकर्षभावाभावः आमलके यः प्र
कर्षभावस्तस्याभावः कुवलबिल्वे यः प्रकर्षभावस्तस्याभाव आ
मलके स च गौणमुख्योभयभागित्वाद्भक्तिपदवाच्यः दीर्घत्व
ह्रस्वत्वे निसे नवर्त्तेक्के रूपेके परिमाणे एवते न भवतः रूप परे
महत्तु दीर्घमानीयतामिति वन्महत्सुवर्त्तुलं त्रिकोणं चानीय
तामिति निर्द्धारणबलाद्वर्त्तुलत्वादीनामप्यापत्तेरितेषामाश्र
यात् इदानीं परिमाणकारणानि परिसंचष्टे १० कारणबहु
त्वाच्च चकारो महत्त्वप्रचययोः समुच्चिनोति परिमाणमुत्पद्यत इति
सूत्रशेषः तत्र कारणबहुत्वं केवलं त्र्यणुके महत्त्वदीर्घत्वे जन
यति महत्त्वप्रचययोस्तत्कारणेऽभावात् तच्च बहुत्वमीश्वरा
पेक्षाबुद्धिजन्यं तद्बुद्धेरनेकविषयत्वेप्यदृष्टोपग्रहो नियाम

मकः एवं परमाणुद्वयगतं द्वित्वं द्व्यणुके परिमाणोत्पादकं र
क्ष्यते द्वाभ्यां तंतुभ्यामप्रशिथिलाभ्यामारब्धे पटे केवलं महत्त्वमेवास
मवायिकारणं बहुत्वप्रचययोस्तत्राभावात् यत्र च द्वाभ्यां तूल
कपिंडाभ्यां तूलकपिंडारंभस्तत्र परिमाणोत्कर्षदर्शनादसमवा
यः कारणं बहुत्वस्याभावात् महत्त्वस्य सत्त्वेपि परिमाणोत्कर्षप्र
त्यप्रयोजकत्वात् एवं च सति यदि महत्त्वमपि तत्र कारणं तदा
न दोषस्तदुक्तं द्वाभ्यामेकेन सर्वैर्वेति प्रचयश्चारंभकः संयोगः
स च स्वाभिमुखकिंचिदवयवासंयोगित्वे सति स्वाभिमुखकिंचिद
वयवसंयोगलक्षणः स चावयवसंयोगः स्वावयवप्रशिथिल
संयोगापेक्षः परिमाणजनकः गुणकर्मारंभे सापेक्षत्वमितिव
चनात् महत्त्वदीर्घत्वेमुत्पाद्याणुत्वमुत्पादयति ११ अ।
तो विपरीतमणु अतः प्रत्यक्षसिद्धान्महतः परिमाणाद्वि
परीतं तदृश्यं परिमाणमित्यर्थः वैपरीत्यं चाप्रत्यक्षत्वाकार
णवैपरीत्याच्च महत्त्वे हि महत्त्वबहुत्वप्रचयानां कारणत्वमणुत्वे
कारणगतस्य द्वित्वस्येश्वरापेक्षाबुद्धिजन्यस्य कारणत्वं एतेन
दीर्घत्वविपरीतं ह्रस्वत्वमित्यपि द्रष्टव्यं वैपरीत्यं चात्रापि पूर्ववद
त् इदानीं कुवलामलकादणुत्वव्यवहारो भाक्त इति दर्शय
ति १२ अणु महदिति तस्मिन् विशेषभावाद्विशेषाभावाच्च
इति शब्दो व्यवहारपरः तं दर्शयति तेन बिल्वापेक्षया कुव
लमणु कुवलापेक्षयामलकं महदामलकापेक्षया बिल्वं म
हदिति तावद्व्यवहारोस्ति तत्र महदिति तेषु व्यवहारो मुख्यः
कुत एवमत आह विशेषभावान्महत्त्वविशेषस्यैव तरतमादि

भावेनभावात् अणुव्यवहारस्तत्तेषुभाक्तः कुतएवमतआह
विशेषाभावात् अणुत्वविशेषस्यतत्राभावात् अणुत्वंहिका
र्येद्व्यणुकमात्रवृत्तिनित्यंतुपरमाणुवृत्तिकुवलादौतदभावा
त् यद्वाविशेषस्यमहत्त्वकारणस्यैवावयववहुत्वमहत्त्वप्रचया
नांकुवलाद्यवयवेष्वभावात् सद्भावात् विशेषाभावात् वि
शेषस्याणुत्वकारणस्यमहत्त्वासमानाधिकरणद्वित्वस्यकुव
लाद्यवयवेष्वभावादसद्भावादित्यर्थः अणुत्वव्यवहारोभा
क्त इत्यत्रहेतुमाह १३ एककालत्वात् महत्त्वमणुत्वंचद्वयमप्ये
कस्मिन्कालेनुभूयतेनेचमहत्त्वाणुत्वेपरस्परविरोधिनीनैक
त्राश्रयेसहसंभवतः अतोमहत्त्वकारणसद्भावान्महत्त्वप्रत्य
यस्तत्रमुख्योणुत्वप्रत्ययप्रयोगौचभाक्तावित्यर्थः महत्त्वप्रत्य
यस्यमुख्यत्वेहेतुमाह १४ दृष्टांताच्च दृश्यतेतथावस्त्रगस्ता
महत्त्वेवकुवलामलकविल्वेषुस्थूलस्थूलतरस्थूलतमव्यवहा
रेणभवितव्यमित्यर्थः यथावस्त्रगस्ताश्शुक्लेषुवपटसंखस्फ
टिकादिषुशुक्लशुक्लतरशुक्लतमव्यवहारः ननुमहत्परि
माणमितिव्यवहारवलान्महत्त्वेपिपरिमाणेमहत्त्वमणुत्वे
प्यणुमस्तीतिज्ञायतेतत्कथंद्रव्यमात्रवृत्तित्वमनयोः कथंवा
गुणेगुणवृत्तिविरोधोनापद्यतइत्यतआह १५ अणुत्वम
हत्त्वयोरणुत्वमहत्त्वाभावः कर्मगुणैर्व्याख्यातः यथागुण
कर्मणीनाश्रयत्वमहत्त्ववतीतथाणुत्वमहत्त्वेअपिनाणुत्वमह
त्त्ववतीइत्यर्थः प्रयोगश्चभाक्तोद्रष्टव्यः ननुयथागुणावंत
ः कथमन्यथामहान्शब्दोद्वौशब्दावेकःशब्दः श्चतुर्विंश

निर्गुणाः इत्यादिव्यवहारः कर्मण्यपि च कर्मवंति प्रतीयंते क
थमन्यथा शीघ्रं गच्छति द्रुतं गच्छतीत्यादिव्यवहारस्तथाणुत्वम
हत्वे अपि तद्वतीस्यातामित्यत आह १६ कर्मभिः कर्माणि
गुणैश्च गुणाः व्याख्याताः यथा कर्मभिः कर्माणि न तद्वंति
गुणैश्च गुणा न तद्वंतस्तथाणुत्वमहत्वे अपि न तद्वती व्यवहा
रस्तु सर्वत्र भाक्त इत्यर्थः ननु महांति कर्माण्यणूनि कर्मा
णि महांतो गुणा अणवो गुणा इत्यादिव्यवहारादणुत्वमह
त्ववंति कर्माणि तदुभयवंतश्च गुणाः प्रसक्ता इत्यत आह १७
अणुत्वमहत्वाभ्यां कर्मगुणाश्च व्याख्याताः यथाणुत्वमहत्वे
नाणुत्वमहत्ववती तथा न कर्माणि तदुभयवंति न वा गुणा
स्तदुभयवन्त इत्यर्थः प्रयोगस्तु पूर्ववद्भाक्त इति भावः १८
अणुत्वमहत्वप्रक्रियां दीर्घत्वह्रस्वत्वयोर्वेतिदिशति १८
एते न दीर्घत्वह्रस्वत्वे व्याख्याते ह्रस्वत्वे दीर्घत्वे अपि न ह्रस्व
त्वदीर्घवती महत्वोत्पादकमेव दीर्घत्वोत्पादकमणुत्वो
त्पादकमेव ह्रस्वत्वोत्पादकं कारणैक्यात् कथं कार्य्यभेद
इति चेत् न प्रागभावभेदेन पाकजवदुपपत्तेः यत्रैव महत्वं त
त्र दीर्घत्वं यत्राणुत्वं तत्र ह्रस्वत्वं यत्र नित्यमणुत्वं तत्र नित्यं ह्र
स्वत्वमित्याद्यतिदेशार्थः इदानीं विनाशकमाह १९ अ
नित्ये अनित्यं एतच्चतुर्विधमपि परिमाणं विनाशि नित्य
त्ववर्त्तमानमाश्रयविनाशादेव नश्यति न तु विरोधिगुणां
तरात् घटे सत्यपि तत्परिमाणं विनश्यति कथमन्यथा कं बु
कुभंगेपि स एवायं घट इति प्रत्यभिज्ञेति चेन्न आश्रयना

शेनतत्रघटनाशावश्यकत्वात् नहिपरमाणुद्वयसंयोगनाशा
द्व्यणुकेनष्टेतदाश्रयस्यत्रसरेणोस्तदाश्रयस्यचूर्णशर्करादे
र्विनाशइतियुक्तिरभ्युपगमोवाकथंतर्हिप्रत्यभिज्ञेतिचेत्
सैवेयंदीपकलिकेतिप्रत्यभिज्ञानवद्भ्रान्तत्वात् प्रदीपप्रत्यभि
ज्ञापिभ्रमैवह्रस्वत्वदीर्घत्वेपरमुस्यादविनाशिनीइतिचेत् नत
द्विनाशस्याश्रयविनाशमंतरेणानुपपत्तेरुक्तत्वात् तत्किंपा।
र्थिवपरमाणुरूपादिवत् परमाणुगतमणुत्वंशब्दबुद्ध्यादि
वदाकाशादिगतंमहत्वमपिनश्यतीत्यतआह २० नित्येनित्यं
नित्येष्वाकाशादिषुपरमाणुषुचपरिमाणंतन्नित्यंविनाशका
भावात् परमाणुपरिमाणस्यवैशेषिकसिद्धांसंज्ञामाह २१
नित्यंपरिमंडलं परिमंडलमेवपारिमांडल्यंतदुक्तमन्यत्रपा
रिमांडल्यादित्यत्रइतिननुकुवलामलकादिषुसमिदिक्षुप्रभृति
षुचव्यवह्रियमाणमणुत्वंह्रस्वत्वंवायदिनपारमार्थिकंतदापा
रमार्थिकयोस्तयोःकिंप्रमाणमतआह २२ अविद्याचवि
द्यालिंगं विद्यालिंगमविद्यातदयमर्थःकुवलामलकाद
वणुत्वज्ञानंसमिदिक्षुप्रभृतिषुह्रस्वत्वज्ञानंनावदविद्या
तत्रपारमार्थिकाणुह्रस्वत्वयोरभावात् सर्वत्राप्रमाप्रमापूर्विके
वभवतीत्यन्यथाख्यातिवादिभिरभ्युपगमात् तथाचसत्य
मणुत्वज्ञानंसत्यंचह्रस्वत्वज्ञानमनुमेयमित्यर्थःएवंच
भाक्तःशब्दप्रयोगोमुख्यमर्थमंतरेणनभवतीतिमुख्ये
अणुत्वह्रस्वत्वेक्वचिदवश्यंमंतव्ये द्रव्यत्वेनहेतुनाकाशा
दीनामनुमितस्यपरिमाणस्यस्वरूपमाह २३ विभवान्म

हानाकाशस्तथाचात्मा विभवः सर्वमूर्त्तसंयोगित्वं तच्च परम
महत्त्वमंतरेणानुपपद्यमानं परममहत्त्वमनुमापयति दृश्यते चे
ह वाराणस्यां पाटलिपुत्रे च युगपदेव शब्दो सन्निस्तत्र चैक
मेकाशसमवायिकारणमित्याकाशस्य व्यापकत्वं सिद्धं व्या
पकत्वं च परममहत्परिमाणयोग एव नानाकाशकल्पने गौ
रवमित्येक एवाकाशो ऽभ्युपगंतव्य आकाशस्य प्रदेश इति
तु व्यपदेशः प्रदेशवद्भिर्घटादिभिः संयोगनिबंधनो भाक्तः
भक्तिश्च प्रदेशवद्द्रव्यसंयोगित्वं तथात्मेति यथाकाशं विभवा
न् सकलमूर्त्तसंयोगित्वात् परममहत्तथात्मापि परममहा
न् यद्यात्मनः सकलमूर्त्तसंयोगित्वं न भवेत्तदा तेषु तेषु मूर्त्तेष
दृष्टवदात्मसंयोगात् क्रिया नोत्पद्येत् व्यधिकरणस्यादृष्टस्य
प्रत्यासत्त्यपेक्षया क्रियाजनकत्वात् सा च प्रत्यासत्तिरदृष्ट
वदात्मसंयोग एव एवं संचारिणि शरीरे तत्र तत्र ज्ञानसुखा
दीनामुत्पत्तिरात्मनो विभवमंतरेणानुपपन्ना सात्मापि व्या
पकः स च नाकाशवदेक एव व्यवस्थादर्शनादित्युक्तमिति भा
वः तच्च महत्त्वं सातिशयं निरतिशयं च परमाण्वणुत्ववत् एव
माकाशादौ परमदीर्घत्वं परमाणुषु च परमह्रस्वत्वं महनी
यं ननु मनो ऽपि सर्वदा निःस्पर्शद्रव्यत्वादाकाशवत् ज्ञा
नाद्यसमवायिकरणसंयोगाधारत्वादात्मवदित्याकाशा
त्मनोः साहचर्य्येण मनो ऽपि किं नोक्तमत आह २८ तद
भावादणुमनः तस्य विभवस्य सकलमूर्त्तसंयोगित्वस्याभा
वादणु मनः सकलमूर्त्तसंयोगित्वे तु युगपदनेकेंद्रियसंयो

गेज्ञानयोगपद्यंस्यात्तथाचव्यासंगोनस्यात् अनुमानेतु
मनोयावन्नसिद्धंतावदाश्रयासिद्धेः मनःसिद्धिदशायांतु
धर्मिग्राहकमानोबाधितेननुप्रभवाभावादेवंनाणुत्वंसिद्ध्य।
तिघटादौव्यभिचारादितिचेत् नविभ्वाभावेनाव्यापकत्वसा
धनात् तथाचैकत्रदेहेमनस्तावदेकंनानाकल्पनेगौरवा।
पत्तेः एकस्याप्यवयवकल्पनेकल्पनागौरवान्निरवयवत्वेना
नारंभकत्वाच्चेत्यादियुक्तेरणुत्वसिद्धेरितिभावः दिशःपर
ममहत्वेयुक्तिमाह २५ गुणैर्दिग्व्याख्याता गुणैःसकल
द्वीपवर्तिपुरुषसाधारणंपूर्वापरादिप्रत्ययरूपैःसकल
मूर्त्तनिष्ठपरत्वापरत्वलक्षणैश्चदिगपिव्यापकत्वेनव्याख्या
तेत्यर्थः परत्वापरत्वयोःकृत्स्नौसंयुक्तसंयोगभूयस्त्वा।
ल्पीयस्त्वविषयापेक्षाबुद्धेःकारणत्वस्यवक्ष्यमाणत्वात्ना
नादिक्कल्पनस्यकल्पनागौरवप्रतिहतत्वात् कथंतर्हिद।
शदिगादितिप्रतीतिव्यपदेशावितिचेत् नतत्तदुपाधिनिबंध
नत्वादित्युक्तत्वात् कालस्यव्यापकत्वमाह २६ कारणे
कालः परापरव्यतिकरयौगपद्यायौगपद्यचिरक्षिप्रत्यय
कारणेद्रव्येकालइतिसमाख्यानतादृशःप्रत्ययःसर्वदेश
पुरुषसाधारणोकालस्यव्यापकतामंतरेणसंभवतीतितस्य
व्यापकत्वंपरममहत्वयोगइत्यर्थः यद्वाइदानींजातइत्या
दिप्रतीतिबलात्सर्वोत्पत्तिमन्निमित्तकारणत्वंकालस्यप्र
तीयतेतदपिव्यापकत्वाधीनंनिमित्तकारणासमवाय्यसमवा
यिकारणप्रत्यासत्तिनियमात् यद्वा अतीतानागतवर्त्त

मानव्यवहारः सार्वत्रिक इति सर्वगत एव कालः यद्वा क्षण
लवमुहूर्त्तयामदिनाहोरात्रपक्षमासर्त्वयनसम्वत्सरादिव्य
वहारकारणद्रव्यं कालाख्यमिति व्यवहारस्य सार्वत्रिकत्वात्
कालः सार्वत्रिक इति परममहान् तस्य नानात्वकल्पना
च कल्पनागौरवप्रतिहतेत्युक्तं इति श्रीशंकरे वैशेषि
कसूत्रसंस्कारे सप्तमस्याध्यायस्य प्रथममाह्निकं द्वितीया
ह्निके एकानेकवृत्तिगुणपरीक्षाप्रकरणं अनेकमात्रवृत्ति
गुणपरीक्षाप्रकरणं अनेकमात्रवृत्तिगुणपरीक्षाप्रक
रणं प्रसंगाच्छब्दार्थसंबंधपरीक्षाप्रकरणं विशेषगुणरहि
तविभुसंयोगासमवायिकारणकैकवृत्तिगुणपरीक्षाप्र
करणं समवायपरीक्षाप्रकरणं चेति तत्र महत्वैकार्थसमवायाधी
नं संख्यादीनामपि प्रत्यक्षत्वमिति वोद्दृशक्रमम् अतिक्रम्य परि
माणनिरूपणानंतरं संख्यापृथक्त्वं च परीक्षितुमाह रूपर
सगंधस्पर्शव्यतिरेकादर्थांतरमेकत्वं रूपरसगंधस्पर्शेति
संख्यादिपंचकभिन्नगुणोपलक्षणं व्यतिरेकादिति व्यभि
चारात् तदयमर्थः एको घट इति विशिष्टप्रतीतिर्विशेष
णजन्या तच्च विशेषणं न रूपादि तद्व्यतिरेकेण जायमान
त्वात् न च घटत्वादिकमेव निमित्तं पटेऽपि जायमानत्वात्
न चैकत्वं सत्तावत् सामान्यं सत्तया सहान्यूनानतिरिक्तवृत्तित्वा
त् न च द्रव्यमात्रसामान्यं तत् द्रव्यत्वेनान्यूनानतिरिक्तदेशत्वा
त् न चान्यूनानतिरिक्तदेशत्वेऽपि प्रतीतिभेदाद्भेदः प्रतीति
भेदस्य स्वरूपकृतत्वे सत्तापि भिद्येत विषयभेदकृतत्वे तु वि

षयभेदानुपपत्तेरुक्तत्वात् अन्यथा घटत्वैकत्वशालित्वयोरपिभेदा
पत्तेः नच स्वरूपाभेद एकत्वमिति दूषणमतंयुक्तं घटस्वरूपाभे
दश्चेदेकत्वं तदा पटादावेकप्रत्ययो न स्यात् स्वरूपभेदो द्वित्वादि
कमित्यपि दूषणमतमनुपपन्नं स्वरूपभेदस्य त्रिचतुरादिसाधा
रण्येन व्यवहारवैचित्र्यानुपपत्तिरिति भावः एकत्वतुल्यन्याय
तयैकपृथक्त्वमपि साधयितुमाह १ तथा पृथक्त्वं अपोद्धा
रव्यवहारस्तावदस्ति इदमस्मात् पृथगर्थान्तरमित्याकारः अ
पकृष्यावधिमपेक्ष्य य उद्धारो निर्धारणं स ह्यपोद्धारस्तत्र च नरू
पादितं व्यभिचारात् अवध्यनिरूप्यत्वाच्च ननु अन्योन्याभाव एव
पृथक्त्वं इदमस्मात् पृथगन्यदर्थान्तरमिति वा भिन्नमिति प्र
तीतेरन्योन्याभावालंबनत्वात् न पृथगादिशब्दानां पर्यायत्वे
पि नान्योन्याभावार्थत्वं तत्र पंचमीप्रयोगानुपपत्तेः इदमस्मात्
पृथगिदमिदं न भवतीति प्रतीत्योर्भिन्नविषयत्वात् न चान्योन्या
भाववानर्थः पृथक्त्वं अघटः पट इत्यत्रापि पंचमीप्रयोगापत्तेः
ननु पृथगिति विशिष्ट इति प्रतीत्योरेकाकारत्वाद्वैशिष्ट्यमेव पृ
थक्त्वमिति चेन्न मैत्रस्य दंडवैशिष्ट्यदशायां मैत्रात् पृथगयं मै
त्र इति प्रतीत्यापत्तेः एवं शब्दविशिष्टे व्योम्नि बुद्धिविशिष्टे चात्म
नि पृथक्त्वव्यवहारापत्तेः अत एव वैधर्म्यमपि न पृथक्त्वं
पाकरक्ते घटे श्यामात्तद्धटात् पृथगयं घट इति व्यवहारापत्तेः
तद्विरोधिधर्मवत्त्वमेव हि तद्वैधर्म्यं तच्च श्यामानन्तरं रक्ततार
शायामपि न च सामान्यमेव पृथक्त्वं सामान्यस्यावध्यनिरूप्य
त्वात् जातिसांकर्यप्रसंगाच्च सन्मात्रवृत्तित्वे सत्तया द्रव्यमात्र

वृत्तित्वे द्रव्यत्वेनान्यूनानतिरिक्तवृत्तित्वापत्तेः नन्वेकमेकत्वं
रूपादिभ्यः पृथक् पृथक्त्वमिति व्यवहारादेकत्वेप्येकत्वं पृ
थक्त्वेपि पृथक्त्वमेवं तत्र तत्रार्थीत्यत आह २ एकत्वैकपृ
थक्त्वयोरेकत्वैकपृथक्त्वाभावोणुत्वमहत्त्वाभ्यां व्याख्यातः य
थाणुत्वमहत्त्वेनाणुमहत्त्ववतीति व्यवहारस्तत्र भाक्त इत्यर्थः
कर्मभिः कर्माणि गुणैः गुणा इत्यपि दृष्टान्तसूत्रं द्वयं पूर्वं दृष्टा
न्तसूत्रेणैकवाक्यतापन्नमेवात्र प्रतिभासते यथा कर्माणि
न कर्मवन्ति गुणाश्च न गुणवन्तस्तथैवैकैकपृथक्त्वे न तद्वतीत्य
र्थः ननु गुणेषु कर्मसु च साधारण एकैकत्वव्यवहारः कि
मत्र विनिगमकं यद्द्रव्येष्वेवैकत्वं न गुणादिष्वपीत्यत आह १३
निःसंख्यत्वात् कर्मगुणानां सर्वैकत्वं न विद्यते सर्वेषामेकत्वं
तन्न विद्यते कुत इत्यत आह निःसंख्यत्वात् कर्मगुणानामिति
संख्याया निष्क्रान्तानि निःसंख्यास्तेषां भावो निःसंख्यात्वं तथा च क
र्माणि गुणाश्च निःसंख्यानि संख्याया गुणत्वे न गुणेषु तावत्संख्या
न विद्यते न वा कर्मसु गुणानां कर्मसु निषेधात् अन्यथा द्रव्यत्व
प्रसंगात् साधितं च संख्याया गुणत्वमेकत्वस्य च संख्यात्वमिति
भावः तर्हि कथमेकं रूपमेको रस इत्यादि ज्ञानमित्यत आह
४ भ्रान्तं तत् गुणकर्मसु यदेकत्वज्ञानं तद्भ्रान्तमित्यर्थः सूत्रे
च ज्ञानमिति शेषः आक्षिप्तपूर्वपक्षत्वात् प्रयोगस्तु भाक्तः स्व
रूपाभेद एवात्र भक्तिः न च तदेवैकत्वं उक्तोत्तरत्वात् ननु द्रव्ये
ष्वप्ययमेकत्वप्रयोगो भाक्तोस्तु प्रत्यक्षस्तु तत्र भ्रान्तः किमेक
त्वेनेत्यत आह ५ एकत्वाभावाद्भक्तिस्तु न विद्यते यदि पा

रमार्थिकमेकत्वं क्वचिन्नाभ्युपगन्तव्यं तदानप्रयोगोभाक्तः मुख्य
पूर्वकत्वाद्भक्तेः न वा प्रत्ययोभ्रान्तः प्रमापूर्वकत्वाद्भ्रमस्यप्रमितं।
ह्यारोप्यते नाप्रमितं असत्ख्यातेर्निरासादन्यथाख्यातेश्च।
साधनादिति भावः कार्य्यकारणयोस्तन्तुपटयोरेकत्वं यत्र
येवैकत्वमत एवैकप्रत्ययत्वमपि नहि स्वस्मादेव स्वस्य प्रथागिति
संभवति नहि पटे पाद्यमाने प्रत्येकं तन्तूनामाकर्षेतद्भिन्नः पे
वैकत्वमत एवैकप्रत्ययत्वमपि नहि स्वस्मादेव स्वस्य प्रथागिति संभ
वति नहि पटे पाद्यमाने प्रत्येकं तन्तूनामाकर्षेतद्भिन्नः पट उप
लभ्यते यदि तन्तुभिन्नः पटः स्यात्तदा तद्भिन्नतयोपलभ्येत घटव
त् एवं घटोप भग्ने कपालद्वयातिरिक्तस्यानुपलम्भात् घटोपि
कपालद्वयात्मक एव तदुक्तं नान्योवयव्यवयवेभ्य इति तदिदं
सांख्यीयं मतं प्रसंगान्निराचिकीर्षुराह ६ कार्य्यकारणयोरे
कत्वैकप्रत्ययत्वाभावादेकत्वैकप्रत्ययत्वे न विद्यते कार्य्यकारणं
च द्वयमेकं न भवति कुत एदित्याह एकत्वाभावाद्भेदाभावात् न
हि यदेव कार्य्यं तदेव कारणं तन्तवः पट इति बहुत्वैकत्वयोः सा
मानाधिकरण्यानुपपत्तेः भवत्येव सामानाधिकरण्यमेकस्या
मपि पात्र्यः कणिकायामापः इति प्रयोगादेकस्यामपि योषिति
दारा इति प्रयोगादेकस्यामपि योषिति दारा इति प्रयोगादिति
चेत् न तत्रावयवबहुत्वमादायोपपत्तेः पाद्यैः परमाणोतुप्रकृ
कृतिगतरूपादिबहुत्वमादायैव के शब्दस्याभाव्यमिदं पर्य्यनु
योनुयोज्यमित्यपरे न च रंडाकरंडावस्थितास्तन्तवः पटव्यप
देशं लभन्ते न बाधारणाकर्षणे तन्तवः प्रत्येकं कर्तुमीशते न बा

वै०सू०वृ०
८२
82

कार्य्यकारणं चद्वयमप्येकपृथक्त्वाश्रय परस्परावधिकत्वप्रतीतेः कुतः इत्यत आह एकपृथक्त्वाभावात् एकपृथक्त्वे धर्म्मितदभावात् कार्य्यकारणयोरन्योन्यवैधर्म्यानुभवात् तंतुतपटत्वयोर्घटत्वकपालत्वयोश्चभिन्नबुद्धिव्यपदेशयोः सार्वलौकिकत्वात् कथंतर्हिरूपरसगंधस्पर्शानांनभेदेनोपलंभः असंतसात्म्यात् क्वचिच्चित्रपटादौभेदोपलम्भोपिसंख्यापरिमाणादिभेदस्यचातिस्फुटत्वात् अनित्ययोरेकत्वैकपृथक्त्वयोः कारणगुणपूर्वकत्वमाह ७ एतदनित्ययोर्व्याख्यातं अनित्ययोःसंख्यापृथक्त्वयोः कारणगुणपूर्वकत्वंयद्व्याख्यातं तदनित्ययोरेकत्वैकपृथक्त्वयोरेववोद्धव्यंतेःअन्येषांसंख्यापृथक्त्वानामपेक्षाबुद्धिजन्यत्वात् यथाऽनित्ययोस्तेजोरूपस्पर्शयोः कारणगुणपूर्वकत्वं तथैकत्वैकपृथक्त्वयोरप्यनित्ययोरितिभावः अर्थादनेकद्रव्याद्वित्वादिकापरार्द्धान्ता इत्युपसंख्यानं उपसंख्यानांतरंचतत्समानाधिकरणंचद्विपृथक्त्वादिपरार्द्धपर्य्यन्तं तदयंद्वित्वादिकिमपरार्द्धान्ता इ घ्रत्यादपिनाशक्रमः समानजातीययोरसमानजातीययोर्वा द्रव्ययोश्चक्षुः सन्निकर्षेसतितन्निष्ठैकत्वसंख्ययोर्यत्सामान्यमेकत्वंतयोर्विकल्पकानंतरं तद्विशिष्टैकत्वगुणबुद्धिरुत्पद्यतेसैवचापेक्षाबुद्धिस्तयातयोर्द्रव्ययोश्चक्षुः सन्निकर्षेसतितन्निष्ठैकत्वसंख्ययोर्यत्सामान्यमेकत्वंतयोर्विकल्पकानंतरंतद्विशिष्टैकत्वगुणबुद्धिरुत्पद्यतेसैवचापेक्षाबुद्धिस्तयातयोर्द्रव्ययोर्द्वित्वमुत्पाद्यतेउत्पन्नस्य चद्वित्वस्ययत्सामान्यंद्वि

र्वं तदालोचनं तेनालोचनेनापेक्षाबुद्धेर्नाशो द्वित्वविशिष्टद्वि
त्वगुणविषयाविशिष्टबुद्धिश्चैकदा भवति तदग्रिमक्षणे च द्वि

वुद्धिविनाशाद्द्विनाशः
द्वे द्रव्ये इति द्वित्वविष्टद्रव्य
ज्ञानं च गुणपदुत्पद्यते
ततः तस्मात् द्वित्वविशिष्टद्र
व्यज्ञा २

त्वगुणस्यापेक्षा नाशः संस्कारः तदयं संक्षेपः उत्पत्स्यमानद्वित्वा
धारेणेन्द्रियसन्निकर्षस्ततः एकत्वगुणगतसामान्यज्ञानं तत एक
त्वत्वसामान्यविशिष्टैकत्वगुणसमूहालंबनारूपापेक्षाबुद्धिस्त
तो द्वित्वगुणोत्पत्तिस्तत्रस्थद्वित्वसामान्यस्य ज्ञानं ततस्तत्सामा
न्यविशिष्टाद्वित्वगुणज्ञानं ततो द्वित्वगुणविशिष्टद्रव्यज्ञानं त
तः संस्कार इतीन्द्रियसन्निकर्षमारभ्य संस्कारपर्यन्तमष्टौ क्ष
णाः विनाशक्रमस्तु एकत्वत्वसामान्यज्ञानस्यापेक्षाबुद्धितो
विनाशः द्वित्वत्वसामान्यज्ञानादपेक्षाबुद्धेर्विनाशः द्वित्व
त्वसामान्यज्ञानस्य च द्वित्वगुणबुद्धितो विनाशः द्वित्वगुणबुद्ध
द्धेश्च द्वित्वविशिष्टद्रव्यज्ञानात् तस्य च संस्काराद्विषयान्तरज्ञा
नाद्वेति नन्वेकत्वज्ञानात् द्विविशिष्टद्रव्यज्ञानमेव कथं नोत्पद्यते
तत्सामग्रीतत्त्वात् न हि गुणज्ञाने सति द्रव्यज्ञाने विलम्बोस्ति
तथा च तत एवापेक्षाबुद्धेर्विनाशे तन्नाशाच्च तदग्रिमक्षण ए
व द्वित्वनाश इति द्वे द्रव्ये इति विशिष्टज्ञानपूर्वक्षण एव द्वित्व
विनाशाय सद्द्वित्वविशिष्टद्रव्यज्ञानस्यानुत्पत्तिरेवेति चेन्न द्वित्वा
द्युत्पत्तिसामग्र्या न भिभूताया एवापेक्षाबुद्धेर्द्रव्यविशिष्टज्ञान
जनकत्वनियमात् फलबलेन तथा कल्पनात् ननु तथापि
स्वजनितसंस्कारेणैवापेक्षाबुद्धिनाशे पुनः सदोषस्तदवस्थ ए
व न द्वित्वविशिष्टज्ञानपूर्वक्षण एव द्वित्वनाशस्य संभवादिति
चेत् न केवलगुणज्ञानस्य संस्काराजनकत्वात् न हि केवलो

गुणः क्वापि समर्प्यते सर्वत्र द्रव्योपरागेणैव गुणस्मरणात् न
नुभवश्चैवं तथापि विशिष्टबुद्धिकालेऽपि द्वित्वनाशे विशिष्ट
प्रतीत्यनुदयस्तदवस्थ एव न हि वर्त्तमानावभासिनी विशिष्ट
प्रतीतिर्विशेषणनाशकाले सम्भवति तथाऽदर्शनादिति चे
न्न विशेषणज्ञानविशेष्येन्द्रियसन्निकर्षतदुभयासंसर्गा
ग्रहस्य विशिष्टज्ञानसामग्र्याः प्रकृतेऽपि संभवात् यदि तु वि
शेषणेन्द्रियसन्निकर्षोऽपि मृग्यते तदा पूर्वक्षणे तस्यापि स
त्त्वात् पूर्वक्षणावर्त्तिन एव सन्निकर्षस्य कारणत्वेनाभ्युपग
मात् विशेषणं विशिष्टज्ञानागोचरोऽपि संभवति विशिष्टज्ञा
नजनकज्ञानविषयत्वमात्रमेव हि विशेषणत्वे तन्त्रं न तु विशि
ष्टज्ञानविषयत्वमपि उपलक्षणस्याप्येवं विशेषणत्वापत्तिरि
ति चेत् नै प्रत्याय्यव्यावृत्तिसामानाधिकरण्यस्य विशेषण
त्वे तन्त्रत्वात् उपलक्षणं तु तद्व्यधिकरणं एवं यदा देवदत्तगृहे
काकवत्ता तदा काको विशेषणं यदा तु उपरि भ्रमन्न सन्वा त
दोपलक्षणं एवं सति रूपवत्तिरस इत्यादौ रूपादेरपि दैत्तै
विशेषणतापत्तिरिति चेत् न इष्टत्वात् न हि तत्रापि रसो वर्त्ते
त्ति चेन्न विशिष्टवृत्तेर्विशेषणावृत्तित्वानावश्यकत्वात् न हि वि
शेषणं विशिष्टमित्येकं तत्त्वं द्वित्वनाशकाले विशेषणासंबंधो ना
स्ति कुतो विशिष्टप्रत्यय इति चेत् न अतद्व्यावृत्तेरेव वैशिष्ट्या
पदार्थत्वात् तद्ज्ञानं तु तत्रापीति न किंचिदनुपपन्नमित्याचार्य्याः
एवं हि द्वित्वोत्पत्तिविनाशवत् त्रित्वाद्युत्पत्तिविनाशावप्यूहनी
यो द्वित्वमपेक्षाबुद्धिनाशनाश्यम् आश्रयनाशविरोधिगुणां

तराभावेगुणस्यसतोविनाशित्वात्चरमेज्ञानवत्चरमज्ञानस्या
दृष्टनाशनाश्यत्वात् क्वचिदाश्रयनाशादपिनश्यतिद्वित्वाधा
रावयवकर्मसमकालमेकत्वसामान्यज्ञानंतद्यथाअवयवकर्म
सामान्यज्ञानेविभागापेक्षाबुद्धीसंयोगनाशगुणोत्पत्तीद्रव्य।
नाशद्वित्वसामान्यज्ञानेतत्रद्रव्यनाशाद्वित्वनाशःसामान्य
ज्ञानादपेक्षाबुद्धिनाशः अपेक्षाबुद्धिनाशस्यद्वित्वनाशसमा
नकालत्वात् कार्य्यकारणसमानभावाभावात् यदातुद्वित्वा
धारावयवकर्मापेक्षाबुद्ध्योर्यौगपद्यंतदाद्वाभ्यामाश्रयनाशा
पेक्षाबुद्धिनाशाभ्यांद्वित्वनाशः तद्यथाअवयवकर्मापेक्षा
बुद्धीविभागोत्पत्तिद्वित्वोत्पत्तीसंयोगनाशद्वित्वसामान्यज्ञाने
द्रव्यनाशापेक्षाबुद्धिनाशौताभ्यांद्वित्वनाशः प्रत्येकंसामर्थ्ये
यहातृ द्वयंचप्रक्रियाज्ञानयोर्वध्यघातकपक्षेपरमुपपद्यते
सएवचपक्षः प्रामाणिकः ननुद्वित्वत्रित्वादीनांसामग्रीसाम्ये
कथंकार्य्यवैलक्षण्यंद्वाभ्यामेकत्वाभ्यांद्वित्वंत्रिभिरेकत्वैस्त्रि
त्वमितिचेत् नएकत्वेद्वित्वाद्यभावात्समवायिकारणगतमे
वद्वित्वत्रित्वादिकन्तत्रमितिचेत् नद्वित्वाद्यसत्वेः पूर्वन्तत्र
द्वित्वाद्यभावात् तत्रापिकारणचिंतायाअनिवारणात् अपे।
क्षाबुद्धावेकत्वेषुचतादृश्यविशेषस्यानुपलंभबाधितत्वात्
फलबलेनतत्कल्पनेवाद्वित्वादिव्यवहारोपिंतएवास्तुकिं।
द्वित्वादिना अदृष्टविशेषाद्विशेषइतिचेत् एवंसतिद्वित्वादे। ५त
स्तित्क्रियापिसामग्र्याकदाचित्त्रित्वंचतुष्ट्वंचोत्पद्येतेत्यनियमप्र
संगः अत्रोच्यतेप्रागभावविशेषाद्विशेषोपपत्तेः यथातुल्यया

सामग्र्यापाकजानांरूपरसगंधस्पर्शानां प्रागभावोपि साधार
णएवेतिचेत् न स्वस्वप्रागभावस्यैवकार्य्यं प्रतिकारणत्वावधा
रणात् यद्वा अपेक्षाबुद्ध्या द्वित्वे द्वित्वसहितयात्रित्वमिति
नेयं(द्वयं) शतंपिपीलिकानांमयाहतमित्यादौ समवायिकारणा
भावे द्वित्वंतावन्नोत्पद्यते तथा च गौणस्तत्रसंख्याव्यवहारो
द्रष्टव्यः सेनावनादौ नियतापेक्षाबुद्ध्यभावाद्बहुत्वमात्रमुत्प
द्यते न तु शतसहस्रादिसंख्येति श्रीधराचार्य्याः एवं सति शत
सहस्रादिकोटिकस्तत्रसंशयो न स्यान्न स्याच्च महतीमहती
सेनेति नैवमित्युदयनाचार्य्याः अत्रैवमालोचनीयं त्रित्वा
दिपरार्द्धपर्य्यन्तासंख्यैव बहुत्वं तद्भिन्नं वा संख्यान्तरं नाद्यः सेना
वनादावपि शतसहस्रादिसंख्यास्त्विति नियमात् न द्वितीयः
त्रित्वादिविलक्षणस्य बहुत्वस्याननुभवात् तथा च प्रतिनिय
तैकत्वानालम्बनापेक्षाबुद्धिजनितशतादिसंख्येव बहुत्वं शता
द्यभिव्यक्तिस्तु तत्र न भवति तादृशव्यंजकाभावात् वयं तु ब्रू
मः त्रित्वादिसमानाधिकरणं संख्यान्तरमेव बहुत्वं त्रित्वादि
जनिकापेक्षाबुद्धिजन्यप्रागभावभेदादेवभावः कथमन्य
था बहवस्तावत्सन्ति शतं वा सहस्रं वेति विशिनष्टानीमद्य इति
यथैव द्रव्ये महत्वदीर्घत्वं च तथैकत्रैवाधिकरणे त्रित्वादिकं
बहुत्वं च भवति हि शतं वा सहस्रं वा चूतफलान्यानयामीति
प्रश्ने बहवस्तावदानीयन्तां किं विशेषजिज्ञासयेति एवं च द्वि
त्वसहितापेक्षाबुद्ध्या त्रित्वं त्रित्वसहितापेक्षाबुद्ध्या चतुष्ट्वमेवमु
त्तरोत्तरं बहुत्वोत्पत्तौ तु नापेक्षाबुद्धौ पूर्वपूर्वसंख्याविषयत्व

नियमः अत एव सेनावनादिषु च बहुत्वमात्रमुत्पद्यते न तु सं
ख्यांतरं संशयस्त्वसत्कोटिकोऽपि भवत्येवेति तत्सामानाधि
करणं च पृथक्त्वमिति यथा द्वित्वं तथा द्विपृथक्त्वमित्यादि न तु द्वि
त्वत्रित्वादिसमानाधिकरणैवैकपृथक्त्वेरेव तद्व्यवहारोपपत्तौ
किं द्विपृथक्त्वादिनेति चेत् न घटात्पटलोष्टौ पृथगिति द्विपृथक्
स्यान्योन्यावधिकत्वाप्रतीतेः प्रत्येकपृथक्त्वे च तत्प्रतीतेरिति
वैषम्यात् न चैवं द्विपरत्वापत्तिः द्वित्वसमानाधिकरणाभ्यांप
रत्वाभ्यामेव तदुपपत्तेः यथा पृथक्त्वे परस्परावधिकत्वविरोध
स्तथा न परत्वे द्वावित्रौ नीलाविति वदुपपत्तेः समानदेशस्थयो
ःसंयुक्तसंयोगभ्रमस्त्वसाम्येऽपि दिक्पिंडसंयोगस्यासमवा
यिकारणस्य भेदेन भिन्नकार्योत्पत्तिसंभवात् मिलितयोरेकत्व
यो द्वित्वं प्रतियथाऽसमवायिकारणत्वं तथा मिलितयोरेकपृ
थक्त्वं प्रत्यसमवायिकारणत्वसंभवात् द्रव्यातिरिक्तमेकं का
र्य्यं प्रत्यनेकेषां संयोगानां कार्य्यैकार्थसमवायप्रत्यासत्त्यासंभ
यारंभकत्वादर्शनात् कारणैकार्थसमवायप्रत्यासत्त्या तु
बहुवस्तं तु तुरीसंयोगा एकं पटं वी संयोगमारभंत एवेति दिक्
द्वित्वादिविनाशवद्द्विपृथक्त्वादिविनाशोऽप्यूहनीयः प्रकर
णांतरमारभते ८ अन्यतरकर्मज उभयकर्मजः संयोगज
श्च संयोगः संयोगे संयुक्तप्रतीतिरबाधिता प्रमाणं कार्य्यो
णि च अवयवसंयोगे पुद्रव्यं अग्निसंयोगे पाकजा रूपादयः
प्रचये परिमाणविशेषः भेर्य्याकाशसंयोगे शब्द इत्याद्यूह्यं
न चाविरलदेशोत्पत्तिरेव संयोगः क्षणभंगपरिणामयोर्नि

द्वावित्रौ पराविति प्रतीतिः

वै०सू०वृ०
८५
85

णसात् अप्राप्तिपूर्विका प्राप्तिः संयोगः स चान्यतरकर्मजः क्रि
यावता श्येनेन निष्क्रियस्य स्थाणोः तदभिमुखक्रियारहितस्य
सक्रियस्यापि धावतः यथा धावता पुरुषांतरेण घृष्टे देश
संयोगः उभयकर्मजो मेषयोर्वा प्रत्येकं गृहीतसामर्थ्याभ्यामु
भाभ्यामेव तज्जननात् तृतीयस्त्वंगलीतरुसंयोगाद्रुस्तरु
संयोगः स चैकस्मादपि भवति यथा तंतुवीरणसंयोगात् पट
वीरणसंयोगः क्वचिद्द्वाभ्यां संयोगाभ्यामेकः संयोगः यथा द्वा
भ्यां तंतुभ्यामाकाशस्य द्वौ संयोगौ ताभ्यामेक एव द्वितंतुपटस्याका
शेन संयोगः क्वचित्त्वबहुभिरपि संयोगैरेकः संयोग आर
भ्यते यथा दशभिस्तंतुभिराकाशदशसंयोगा एवमेवमेव शतंतु
कपटाकाशसंयोगमारभंते क्वचित्पुनरेकस्मादपि संयोगा
दसमवायिकारणात् संयोगद्वयमुत्पद्यते यथा पार्थिवाप्या
योः परमाण्वोः प्रथमनारम्भके संयोगे जाते पार्थिवे परमाणौ
पार्थिवपरमाण्वंतरेणाप्ये च परमाणावाप्यपरमाण्वंतरेणा
प्ये च द्व्यणुकद्वयारंभकं संयोगद्वयमुत्पद्यते ताभ्यां संयोगा
भ्यां सजातीयनिष्ठाभ्यां द्व्यणुकद्वयं युगपदारभ्यते तत्रयः।
पार्थिवाप्यपरमाण्वोरनारम्भकः संयोग उत्पन्नस्तेनैकेनैव
पार्थिवपरमाणुनाप्यद्व्यणुकेनैकः संयोग आप्यपरमाणु
ना पार्थिवद्व्यणुकेनापरः संयोगो द्व्यणुकयोरुत्पादकस
त्तिसमकालमेव जायते कारणाकारणसंयोगेन कार्याका
र्यसंयोगयोरवश्यं जननात् मूर्तैर्विभूनामन्यतरकर्मज ए
व विभुनोस्तु न संयोगः कारणाभावात् कर्माभावात्तत्र नास्ति
तावत्र

नचकारणंयेनकारणाकारणसंयोगात्कार्य्याकार्य्यसंयोगोपिना
स्तिनित्यस्तु संयोगोनसंभवति अवाप्तिपूर्विकायाः प्राप्तेः संयो
गत्वात् नित्यत्वेतद्विघाता एवंसतिविभागोप्यजस्तत्रस्यान्नचेष्टा
पत्तिः संयोगविभागयोर्विरोधिनोरविनश्यद्द्रव्यस्यपोरेकत्रानु
पपत्तेः किंचसंयोगंप्रतिप्रयोजिकायुतसिद्धिर्नचविभुनोस्तत्सं
भवः साहिद्वयोरन्यतरस्यवापृथग्गतिमात्त्वं नाश्रयाश्रयित्वं
वाविनाशस्तु संयोगस्यसमानाधिकरणाद्विभागादाश्रयनाशा
दपिक्कचित् यथातंतुद्वयसंयोगानंतरमेतस्यतन्तोर्वयवेऽशैक
मेजायतेतेनांश्वतराद्विभावः क्रियतेविभागादारंभकसंयोगना
शस्ततस्तंतुविनाशस्तन्तुविनाशात् संयोगनाशोयत्रतन्तुद्व
यंचिरंसंयुक्तंसद्वस्यन्नक्रियंभवतिकेचित्तुतन्त्ववयवकर्मणाय
दातन्त्वारम्भकसंयोगनाशः क्रियतेतदातन्त्वन्तरेकर्मचिंतनादा।
श्रयनाशविभागाभ्यांयुगपदुत्पन्नाभ्यांसंयोगोनश्यतीत्या
हुः तच्चानुपपन्नंसमवायिकारणनाशक्षणेविभागानुत्पत्तेः स
मवायिकारणस्यकार्य्यसमकालस्थायित्वनियमात् सचायंसंयो
गोद्रव्यारम्भेनिरपेक्षोगुणकर्मारम्भेसापेक्षः स्वसमानाधिकर
णात्यन्ताभावप्रतियोगीतथैवानुभवात् शाखामात्रावच्छेदेनापि
महतिन्यग्रोधतरौवर्त्तमानकपिसंयोगोन्यग्रोधतरौकपिसंयो
गद्वात्यनुभवात् अवच्छेदमात्रेणान्यथासिद्धौपरमाणुवृत्ति
त्वापद्येतविभूनामप्युपाधिभेदएवप्रदेशस्तदवच्छेदेनवर्तमा
नस्यसंयोगस्याव्याप्यवृत्तित्वंपरमाणुनिष्ठस्यापिसंयोगस्यदिगा
द्यवच्छेदकाश्चिन्तनीयाः विभागेसंयोगोत्पत्तिप्रकारमतिदि

वै०सू०वृ०
८६
86

शन्नाह ९ एतेनविभागोव्याख्यातः संयोगवद्विभागोप्यन्यतर
कर्मजउभयकर्मजोविभागजश्चस्येनकर्मणास्थाणुस्येनविभा
गः संयुक्तयोर्मल्लयोर्मेषयोर्वाकर्मभ्यांतदुभयविभागःस्वा
यंकर्मासत्यव्यवहितक्षणोत्पत्तिकः अपेक्षणीयान्तराभावात् तदु
क्तंसंयोगविभागयोरनपेक्षकारणंकर्मेतिविभागेजननीयेआ
श्रयः संयोगेचजननीयेसचपूर्वसंयोगनाशश्चापेक्षणीय
मितिचेत् न स्वोत्पत्त्यनंतरोत्पत्तिकभावभूतानपेक्षत्वस्यकर्म
णोनिरपेक्षार्थत्वात् विभागजस्तु विभागो द्विविधः कारणाका
रणविभागात् कार्य्याकार्य्यविभागोयथांगुलीतरुविभागाद्ध
स्ततरुविभागस्ततोभुजतरुविभागो द्विविधः कारणाकारण
विभागात् कार्य्याकार्य्यविभागोयथांगुलीतरुविभागव्यव
हारएवेतिचेत् नसंयोगाभावोसंताभावश्चेत् गुणकर्मयोरपि
विभागव्यवहारप्रसंगात् द्रव्ययोर्वर्त्तमानःसंयोगात्यंताभा
वोविभागप्रत्ययहेतुरितिचेत् नअवयवावयविनोरपिप्रसंगा
त् अकार्य्यकारणभूतयोर्द्रव्ययोरितिचेत् विंध्यहिमवतोरपि
स्यात् भवत्येवतत्रेतिचेत् नभ्रान्तस्यगुणकर्मणोरपिभावात् अ
भ्रांतमधिकृत्यव्यवहारस्यचिंसमानत्वात् संयोगनाशोविभा
गइतिचेत् एकतरसंयोगिनाशेननष्टेसंयोगेतद्व्यवहारप्रसं
गात् संयोगिनोर्विद्यमानयोरितिचेत् एकसंयोगनाशानंतरं
पुनः संयुक्तयोः कुवलामलकयोः संयोगेतद्व्यवहारप्रसंगा
त् संयोगिनोर्विद्यमानयोरितिचेत् एकसंयोगनाशानंतरंपु
नः संयुक्तयोः कुवलामलकयोः संयोगदशायामपिविभक्तप्र

ननुविभागएवनप्रमाणं
संयोगाभावएवविभाग १

कारणमात्रविभागजकारणाकारणविभागभेदात् कारणाकारणविभागाजकार्याका
र्यविभागभेदात्तत्र कारण(मात्र)कारणविभागात् कारणाकारणविभागः यथा कपालद्वयविभा
देः कपालाकाशविभागः ८

सर्वप्रसंगात् यावत्संयोगनाशस्तथेतिचेत् एकसंयोगनाशे तदभा
वप्रसंगात् तत्र यावदर्थाभावात् तस्मादस्ति विभागोऽर्थान्तरं स।
वगुणः विरोधिगुणान्तरनाश्यः विरोधिनं समानाधिकरणं गुणम
न्तरेण तस्याश्रये गुणनाशानुपपत्तेः कर्मैव संयोगनाशकं स्यादिति
चेत् न विरोधिनो गुणस्यैव गुणनाशकत्वात् किंच यत्रांगुलीहस्तभु
जशरीराणां स्वस्वकर्मणा तरुसंयोगस्तत्रांगुलीमात्रे समुत्पन्नेन
कर्मणांगुलीतरुसंयोगेनाशसंभवेपि हस्ततरुभुजतरुशरीरतरु
संयोगानामनाशप्रसंगात् हस्तादीनामक्रियत्वात् अंगुलीकर्मण
श्च व्यधिकरणत्वात् अधिकरणस्यापि कर्मणः संयोगनाशक
त्वे क्वचिदुत्पन्नेन कर्मणा युगपदेव सर्वसंयोगनाशापत्तेः तन्म
नेतत्र का गतिरितिचेत् अंगुलीतरुविभागेन हस्ततरुविभागो ज
नितो हस्ततरुसंयोगनाशकः इत्यभ्युपगमात् व्यधिकरणेनांगु
लीकर्मणैव हस्ततरुसंयोगादिनाशोस्तु नचातिप्रसंगः आश्रया
श्रितपरंपरासंयोगस्यैव व्यधिकरणकर्मनाश्यत्वाभ्युपगमादि
रितिभावः सर्वत्तेन यदुक्तं तदपि न युक्तं विरोधिनः समानाधिकर
णस्यैव सर्वत्र नाशकत्वानुभवात् बाधकमन्तरेण तत्परित्यागानु
पपत्तेः शब्दविभागो च विभागकार्य्यो तत्र विभागस्य शब्दासमवायि
कारणं पश्यामः न च वदवदहनदह्यमानस्फुटद्वंशचीत्कारे विभागाति
रिक्तं समवायिकारणं पश्यामः कारणाकारणविभागाच्च कार्या
कार्य्यविभागमनुमन्यामहे कथमन्यथा स्वस्वकर्मजनितांगुली
तरुसंयोग हस्ततरुसंयोग भुजतरुसंयोग शरीरतरुसंयोगा
नंगुलीमात्रोत्पन्नकर्मांगुलीतरुविभागे सत्यंगुलीतरुसं

वै० सू० वृ०
८७
87

योगनाशेऽस्यापि हस्ततरुसंयोगादीनां नाशस्तत्र हि विभाग
जविभागपरंपरैव तन्न तत्संयोगनाशिके सुक्तत्वात् कारणद्रव्य
विभागपूर्वके तु कारणाकारणविभागे न संप्रत्ययः यतो वंशद
लेयदुत्पन्नं कर्म तेन दलांतर~~विभाग~~विभागवदाकाशादिवि
भागस्यापि जननसंभवात् यावद्भिः समं तत्कुलं संयुक्तमासीत्ता
वद्भिस्तत्कर्मणां विभागस्य दर्शनात् नह्यंगुल्यामुत्पन्नेन कर्म
णांगुल्यंतरविभागवदाकाशादिदेशेभ्यो विभागा न जन्यंते क
मलदले चोत्पन्नेन कर्मणा दलांतरविभागवदाकाशादिदेशे
भ्यो वा न विभागा आरभ्यंते द्रव्यारंभकसंयोगाविरोधिनः श्चत
मपि विभागानेकं कर्मारभते तत्तु कर्म द्रव्यारंभकसंयोगविरोधि
नं विभागमारभते न तद्द्रव्यारंभकसंयोगाविरोधिनमपि यच्च।
द्रव्यारंभकसंयोगाविरोधिनं न तद्द्रव्यारंभकसंयोगविरोधि
नमिति ब्रूमः कुत एतदिति चेत् कार्यवैचित्र्येण कारणवैचित्र्य
स्यावश्यकत्वात् ननु कर्मणि वैचित्र्यमावश्यकं तथा चैकं कर्म
द्रव्यारंभकसंयोगविरोधिनं विभागं जनयतु यथा विकशत्क
मलकुड्मलादावपरं च द्रव्यारंभकसंयोगविरोधिनमविरोधि
नं चोभयमिति मैवं कार्यविरोधो हि कारणवैचित्र्यकल्पनामूलं
स च विरोध एकस्य द्रव्यारंभकसंयोगप्रतिद्वंद्वित्वेन अपरस्य
तु तदप्रतिद्वंद्वित्वेनेति तथैव वैचित्र्यस्यापि कल्पनौचित्यात् तच्चे
दं वंशदलवर्त्तमानं कर्म दलद्वयविभागमात्रं जनयति स च विभा
गोऽग्रे आकाशादिदेशाद्विभागं द्रव्यारंभकसंयोगप्रतिद्वंद्वि
नं विभागमारभते तस्य च नित्ये स्वस्य विभागजननेन कर्म वा

पत्तिरिति द्रव्यनाशविशिष्टं कालमपेक्षते नैनु तदानीमपि कर्मैव
तज्जनयतु अतीतकालत्वात् विभागजननेकर्मणः स्वोत्तरसंत
रक्षणएव कालः नन्वेवं विभागेनजनितेविभागांतरे कर्मप्रदेशां
तरसंयोगमपिनजनयेत् नसंयोगजननं प्रतिकर्मणोऽनतीतका
लत्वात् अन्यथा कर्मेन नश्येदेवतस्योत्तरसंयोगमात्रनाश्यत्वा
त् सोयं विभागउत्तरसंयोगनाश्यः क्षणत्रयस्थायी क्वचिदाश्र
यनाशनाश्यः तद्यथा तंतोरवयवेऽंशौ कर्म तदनंतरमंशुद्वयवि
भागस्तदैव तंत्वंरे कर्म ततोऽंशुद्वयविभागेन तंत्वारंभकसंयोगेनहि
तन्नाश्येतविभागेच नष्टे नोत्तरसंयोगद्वनिचेत् न· तंतौयत्कर्मोत्प
न्नंतेनयथाविनश्यदवस्थातंतोर्विभागोजनितस्तथातदंशोरपि
पिविभागोजननीयः सोप्यारंभकसंयोगविरोध्येवतेनांशुतंतुवि
भागेन तंत्वाकाशविभागस्तेनचोत्तरसंयोगस्तेन ~~कुतः~~ ततः कर्मनाशः
पद्वायत्रतंतौयदाकर्म तदंशावपि तदैवकर्म तच्चकर्मविनश्य
दवस्थतंतुतदवयवाकाशादिदेशायुगपदेवविभागानारभतेस
र्वेषां विभागानामारंभकसंयोगाविरोधित्वात् तथाच कारणमंशु
कारणंचाकाशादितद्विभागात्कार्य्यस्यतंतोरकार्य्येनाकाशादि
नायोविभागउत्पन्नस्तदनंतरोत्पत्तिकेनसंयोगेनतंतुसंभवे
तस्यकर्मणो विनाशइतिक्वचिद्वाभ्यां तद्यथा तंतुवीरणयोः संयो
गेसति तंत्ववयवेऽंशौ कर्मवीरणेच कर्मैकः कालः स्तंभक
र्मणा अंश्वंतरविभागस्तेनच संयोगस्य तंत्वारंभकस्यविनाशः
वीरणकर्मणाच तंतुवीरणविभागस्तंतुवीरणसंयोगनाशश्च
तंत्वारंभकसंयोगनाशांतरं वीरणस्यप्रदेशांतरसंयोगः ता।

नाशस्तंतु कर्मणा च विभागस्ततो द्रव्यारंभकसंयोगनाशात्तंतुनाशः तन्नाशाच्च तन्तरे कर्मजन्यविभागनाशः न त्वेवं तत्त्वतरोत्पन्नस्य कर्मणोन नाशः स्यात् विनाशकाभावात् आरं[illegible]न

भ्यां भाश्रयनाशसंयोगाभ्यां विभागनाशः ननु संयोगेपि सं
योगोक्तविभागपि विभाग इति प्रसंगनिवारणार्थमाह १०
संयोगविभागयोः संयोगविभागभावोणुत्वमहत्त्वाभ्यां व्याख्या
तः कर्मभिः कर्माणि गुणैर्गुणाः अणुत्वमहत्त्वाभ्यामिति य
थाणुत्वमहत्त्वेनाणुत्वमहत्त्ववतीतथासंयोगविभागेन संयोग
विभागवंतौ द्वितीयं च सूत्रं व्याख्यातमेव ननु द्रव्ययोरवयवा
वयविनोः संयोगः कथं नेत्यत आह ११ युतसिद्ध्यभावा
त् कार्य्यकारणयोः संयोगविभागौ न विद्येते असंबंधयोर्वि
द्यमानत्वं युतसिद्धिः पृथगाश्रयाश्रितत्वं वा तदभावस्त्ववयवा
वयविनोरित्यर्थः दृष्टांतीप्रसंगात् शब्दार्थयोः सांकेतिकं संबंधं
साधयितुं प्रकरणांतरं तत्र पूर्वपक्षमाह १२ गुणत्वात् संयो
गस्येति शेषः तथा च गुणस्य शब्दस्य गुणः संयोगः कथं
स्यादर्थेन घटादिनेत्यर्थः किंच विषयेपि कश्चिद्रूपरसादिल
क्षणस्तेन संयोगो न संभवति गुणे गुणानंगीकारादित्यत आह
१३ गुणोपि विभाव्यते गुणोपि विषय इति शेषः गुणोपि
रूपादिः शब्दस्य विषयो न तु तेन समं संयोगः संबंध इत्यर्थः य
द्वा गुणोपि शब्देन विभाव्यते प्रतिपाद्यते तेन च शब्दस्य न सं
योगः संबंध इत्यर्थः किंच कस्यचिदाकाशादेर्द्रव्यस्य नान्य
तर कर्मजः संयोगो नोभय कर्मजः शब्दस्यापि निष्क्रियत्वादित्या
ह १४ निष्क्रियत्वात् शब्दस्य कस्यचेति शेषः संबंधे बाधकां
तरमाह १५ असति नास्तीति च प्रयोगात् असत्यपि घटप
टादौ नास्ति गेहे घटो नास्ति पटः श्वस्तपूर्वो गकारो नास्ति अ

चिदर्थस

न्नस्यटः पटो भविष्यतीत्यादिप्रयोगदर्शनादित्यर्थः तथा चास
ता घटादिना शब्दस्य न संयोगो न वा समवाय इति भावः किंचा
नइत्यत आह १६ शब्दार्थावसंबंधौ शब्दार्थयोः संयोग
श्चेन्नास्ति तदेतदायातं शब्दार्थावसंबंधावेवेत्यर्थः ननु संयोग
समवाययोरन्यतरः संबंधः कथं नस्यादित्यत आह १७ संयोगि
नो दंडात्समवायिनो विशेषाच्च दंडी पुरुषो हस्ती कुंजर इति।
प्रत्यययोस्तत्र प्रथमः संयोगाद्द्वितीयः समवायात् हस्तेऽवयव
विशेषे कुंजरस्य समवायाधीनप्रत्ययः हस्तसमवायितयास्या
स्तिसहस्तीति विशेषादिति विशेषणे वहस्तादौ समवायसंबंधा
द्विशेषणं ननु तं वादीनामपि तंतुमान् पट इत्यादिवदवयवविशे
षणभावेन प्रत्ययो भवत्येव घटशब्दवान् घटोर्थ इति प्रत्ययो
न भवति तथा च शब्दार्थयोर्न संयोगो नापि समवाय इति भावः
ननु यदि न संयोगो न वा समवायः शब्दार्थयोस्तर्हि केन शब्दो नि
यतमर्थं प्रतिपादयतीत्यत आह सामयिकः शब्दादर्थप्रत्ययः
सामयिक इति समय ईश्वरसंकेतः तस्माच्छब्दादयमर्थो बोद्धव्य
इत्याकारः यः शब्दो यस्मिन्नर्थे भगवता संकेतितः स तमर्थं प्र
तिपादयति तथा च शब्दार्थयोरीश्वरेच्छैव संबंधः स एव समयस्तद
धीन इत्यर्थः यथा नकुलदंष्ट्रा गस्पृष्टा या काचिदोषधिः सा
सर्वा सर्पविषं हंति स च समयः क्वचिद्व्यवहारात् यथा प्रयोजके
न घटमानयेत्युक्ते प्रयोज्यस्य कम्बुग्रीवावंतमर्थमानयतो ज्ञानं
तावदनुमिनोति तटस्थो बालः इयमस्य प्रवृत्तिर्ज्ञानजन्या प्र
वृत्तित्वात् मत्प्रवृत्तिवत् तच्च ज्ञानमेतद्वाक्यजन्यमेतदनंत

वै० सू० वृ०
८९
४१

रभावित्वात् एतज्ज्ञानविषयोऽयं कम्बुग्रीवावानर्थो घटपदवा
च्य इत्यावापोद्वापप्रक्रियया वा तस्य घटपदादावर्थे व्युत्पत्तिः
क्वचित्तु साक्षादाप्तवाक्यादेव यथायं कम्बुग्रीवावानर्थो घटपु
दवाच्य इति क्वचिदुपमानात् यथा गोसदृशो गवयो यथा मुद्गस्
स्तथा मुद्गपर्णी यथा माषस्तथा माषपर्णीत्यादिसाधर्म्योपमा
नात् क्वचिन्निंदापवादवाक्यात् यथा धिक्करभमतिलम्बौष्ठं
कठोर दीर्घग्रीवं कण्टकाशिनमपसदं पशूनामिति निंदावाक्यश्रवणा
नंतरं तादृशपिंडमुपलभ्यायमसौ करभ इति व्युत्पत्तिः क्वचित्प्र
सिद्धपदसामानाधिकरण्यात् यथा प्रभिन्नकमलोदरे मधू
नि मधुकरः पिबतीति वाक्यश्रवणानंतरं भक्षयमसौ मधुक
रपदवाच्यः प्रभिन्नकमलोदरे मधुपानकर्तृत्वात् यथा सहका
रतरौ मधुरं पिको रौतीति तदेतदनुमानं वा शब्द एव वा प्रसिद्धप
दसामानाधिकरण्यसामर्थ्याद्व्युत्पादकः उपमानविशेष एव
वा मधुपानकर्तृत्वस्य भ्रमरादिव्यतिरेकसाधर्म्यस्योपनयात् स
मयश्च जातिमात्रे व्यक्तेर्वाक्षेपत एवोपस्थितेरिति तौतातिकाः
जातौ व्यक्तौ चोभयशक्तिः किंतु जात्यंशे ज्ञाता व्यक्त्यंशे स्वरूप
सती प्रयोजिकेति प्राभाकराः समयश्च शक्तिरेव व्यक्त्याकृति
जातयः पदार्था इति वृद्धाः गवादिपदानामियं गतिः गुणक
र्मादिवाचकपदानां तु जातिव्यक्ती एवार्थ इति मयूखे विषयं वित
इदानीमुद्देशक्रमप्राप्ते परत्वापरत्वे परस्परानुबद्धव्यवहार
कारणतया शिष्यबुद्धिवैशद्यार्थं संक्षेपार्थं चैकग्रंथेनाह १८
एकदिक्काभ्यां सन्निकृष्टविप्रकृष्टाभ्यां परमपरं च परमपरंचे

मेकए कालीभ्यां

त्तिभावप्रधानो निर्देशः उत्पद्येते इति शेषः यद्वा परमेवं चेति
व्यवहार इति शेषः इतिरध्याहार्य्यः एकादिक्स्थयोस्तावेकदि
क्कौ ताभ्यामेकदिक्काभ्यां पिंडाभ्यामित्यर्थः तुल्यदेशावप्येक
दिक्कौ भवतो न तु ताभ्यां परत्वापरत्वे उत्पद्येते अवकियेते वेस
तउक्तं सन्निकृष्टविप्रकृष्टाभ्यामिति सन्निकर्षः संयुक्तसंयोगा
ल्पत्वं विप्रकर्षस्तद्भूयस्त्वं तद्वद्भ्यामित्यर्थः एतेन समवायिका
रणमुक्तं दिक्पिंडसंयोगस्त्वसमवायिकारणं तथा हि प्राङ्मु
खस्य पुरुषस्य प्राच्यामवस्थितयोः पिंडयोरेकस्मिन्संयुक्तसं
योगभूयस्त्वमपरस्मिन्संयुक्तसंयोगाल्पत्वं चापेक्ष्य परत्वाप
रत्वे चोत्पद्येते समवायिकारणमुक्तं सन्निकृष्टविप्रकृष्टाभ्या
मिति विषयेण विषयिणं प्रत्ययमुपलक्षयति तथा चापेक्षाबुद्धे
र्निमित्तकारणत्वमुक्तं एकदिगवस्थितयोरेव परत्वापरत्वे उत्प
द्येते इति न सर्वत्रोत्पत्तिः एकस्यैव द्रष्टुरपेक्षाबुद्धिः समुत्पद्यत
इति न सर्वथोत्पत्तिः अपेक्षाबुद्धिनियमान्न सर्वदोत्पत्तिः का
रणभूतकेरुत्सन्नयोः प्रत्यक्षसिद्धत्वान्न परस्पराश्रयत्वं अन्य
था हि नोत्पद्येयातां न वा प्रतीयेतां परस्परापेक्षायां हि द्वयोरनुत्प
त्तिरप्रतीतिः स्यात् प्रतीयेते [illegible] परत्वापरत्वे प्रतीतिश्च तयो
र्नोत्पत्तिमंतरेणेति एककालाभ्यामिति कालिके परत्वापरत्वे
भिप्रेत्य तत्रैककालाभ्यामिति एकं वर्त्तमानः कालो ययोर्वस्थ
विरपिंडयोस्तावेककालौ ताभ्यामेककालाभ्यामित्यर्थः सन्नि
कर्षोल्पतरतपनपरिस्पंदान्तरितजन्मत्वं विप्रकर्षश्च बहुतर
तपनपरिस्पंदांतरितजन्मत्वं अत्रापि विषयेऽपि विषयेण विषयि

रित स्ता

वै० स० वृ०
टी०
१०

णीबुद्धिमुपलक्षयति तेन युवस्थविरपिंडौ समवायिकारणं का
लपिंडसंयोगश्चासमवायिकारणं अल्पतरतपनपरिस्पं
दांतरितजन्मत्वबुद्धिः परत्वे बहुतरतपनपरिस्पंदांतरितज
न्मत्वबुद्धिः परत्वे निमित्तकारणं एते च परत्वापरत्वे॥ नियतदि
ग्देशयोरपि पिंडयोरुह्यचेते तत्र दैशिकपरत्वापरत्वयोः स
प्तधा विनाशः उत्पादस्तु युगपदेव द्वयोरन्यथान्योन्याश्र
यः स्यात् अपेक्षाबुद्धिनाशात् संयोगस्यासमवायिकारण
स्य नाशात् द्रव्यस्य च समवायिकारणस्य नाशात् निमित्तास
मवायिकारणयोर्नाशात् निमित्तसमवायिकारणयोर्नाशा
त् निमित्तनाशासमवायिकारणनाशेभ्यश्च तत्रापेक्षाबुद्धि
नाशात्तावत्परत्वोत्पत्तिः परत्वसामान्यज्ञानं ततोपेक्षाबुद्धि
विनाशस्तद्विनाशात् परत्वाविशिष्टद्रव्यज्ञानकाले परत्वना
नाशः द्वित्वनाशवदेव सर्वमूहनीयं असमवायिकारणना
शादपि तद्यथा यदैवापेक्षाबुद्धिस्तदैव परत्वाधारे पिंडे कर्म त
तो यदैव परत्वोत्पत्तिस्तदैव दिक्पिंडविभागः ततो यदा परत्वसा
मान्यज्ञानं तदा दिक्पिंडसंयोगनाशः ततः सामान्यज्ञाना
दपेक्षाबुद्धिनाशस्तदैव दिक्पिंडसंयोगनाशात् परत्वाप
रत्वयोर्नाशः अत्र चापेक्षाबुद्धिनाशस्य परत्वनाशसम
कालत्वान्नाशकत्वं ननु समवायिकारणनाशादपि गुणना
शे आत्ममनःसंयोगनाशादपि संस्कारादृष्टादीनां विनाशे
बहु व्याकुलं स्यादिति चेत् न विप्रकृष्टत्वेन परत्वस्यापना
त् परत्वाधारस्यान्यत्र गमने विप्रकर्षाभावात् परत्वनिवृ

नाशे समकारणा

त्तिरावश्यकीत्वं तदानाशकांतरमस्तीत्यन्यथानुपपत्त्यासंयोग
नाश एव नाशकः कल्प्यते संस्कारादृष्टादेः कार्य्यस्य स्मृतिसुखा
देश्चिरेणापि दर्शनान्न तन्नाशकल्पना उपलक्षणं चैतत् अ
वधेर्द्रव्यस्य तद्देशसंयोगनाशादपि परत्वापरत्वे विनश्यतः क्व
चित्क्वचित् समवायिकारणनाशादपि क्वचित्परत्वनाशः तथा
हि यदा पिंडावयवे समुत्पन्नेन कर्मणा ऽवयवांतराद्विभागस्तदै
वापेक्षाबुद्धिः विभागात् पिंडारंभकसंयोगनाशः परत्वोत्पत्तिः अ
ग्रिमक्षणे संयोगनाशाद्द्रव्यनाशः परत्वसामान्यज्ञानं द्रव्यना
शात् परत्वनाशोऽपेक्षाबुद्धिनाशश्च सामान्याज्ञानान्तथा च योग
पद्यान्नापेक्षाबुद्धिनाशात् परत्वनाश इति क्वचिद्द्रव्यनाशापेक्षा
बुद्धिनाशाभ्यां परत्वनाशः तद्यथा पिंडावयवे कर्मापेक्षाबुद्धे
रुत्पादः ततोऽवयवांतरविभागः परत्वोत्पत्तिः ततः आरम्भकसंयो
गनाशः सामान्यज्ञानं ततो द्रव्यनाशापेक्षाबुद्धिनाशौ ततश्च पर
त्वनाशः क्वचिद्द्रव्यस्य संयोगस्य च नाशाभ्यां परत्वनाशः तद्यथा
यदा द्रव्यावयवविभागस्तदैव पिंडकर्मापेक्षाबुद्ध्योरुत्पादः त
दनंतरमवयवसंयोगनाशादिक्पिंडविभागः परत्वोत्पत्तिः
ततो द्रव्यनाशो दिक्पिंडसंयोगनाशः परत्वसामान्यबुद्धयः त
तो द्रव्यनाशादिक्पिंडसंयोगनाशाभ्यां परत्वनाशः सामान्यबु
द्धेरपेक्षाबुद्धिनाश इति क्वचित्संयोगनाशापेक्षाबुद्धिनाशा
भ्यां परत्वनाशः तद्यथा परत्वोत्पत्तिपिंडकर्मणी सामान्यज्ञा
नविभागौ अपेक्षाबुद्धिनाशादिक्पिंडसंयोगनाशौ ततः प
रत्वनाशः क्वचित्समवाय्यसमवायिनिमित्तनाशेभ्यः तद्य

थापरत्वोत्पत्तिपिंडावयवविभागपिंडकर्मणी युगपत् तदनंत
रं परत्वसामान्यज्ञानावयवसंयोगनाशादिक्पिंडविभागाः
तदनंतरमापेक्षाबुद्धिनाशद्रव्यनाशादिक्पिंडसंयोगना।
शेभ्यो युगपदुत्पन्नेभ्यः परत्वस्यापरत्वस्य वा दैशिकस्य नाशः
कालकृतयोस्तु परत्वापरत्वयोरसमवायिकारणनाशाधी
नो नाशो नास्ति दैशिकयोर्दिक्पिंडसंयोगनाशे संनिकर्ष
विप्रकर्षनाशो यथा न तथा कालिकयोरिति तयोः समवा
यिकारणनाशादपेक्षाबुद्धिनाशाद्द्वाभ्यां चेति त्रयः पक्षा
पूर्ववदूहनीयाः कालिकपरत्वापरत्वे प्रति विशेषमाह
२३ कारणपरत्वात्कारणापरत्वाच्च परत्वापरत्वयोः का
रणं कालस्तस्य परत्वापरत्वे परत्वासमवायिकारणकाल।
संयोगोऽपरत्वासमवायिकारणकालसंयोगश्च लक्षण
योक्तः अन्यथानन्वयापत्तेः न हि परत्वापरत्वाभ्यामेव पर
त्वापरत्वे उत्पद्येते तस्मात्परत्वापरत्वपदयोस्तदुत्पादककाल
संयोगावर्थौ भाक्तयौ लक्षणया ननु परत्वेपि परत्वम
परत्वेप्यपरत्वं किं न स्यादित्यत आह परत्वापरत्वयोः
परत्वापरत्वाभावोणुत्वमहत्वाभ्यां व्याख्यातः कर्मभिः क
र्माणि गुणैर्गुणाः एतानि सूत्राणि पूर्वमेव व्याकृतकल्या
नि तेनने ह व्याक्रियंते परत्वापरत्वादीनां मूर्त्तमात्रसमा
वेतत्वमुक्तं ज्ञानसुखादीनां चात्मसमवेतत्वं तत्र समवाय
एव कर्तृति शिष्यजिज्ञासामनुरुध्य बुद्धेरुद्देशक्रमप्राप्ताया
अपि लंघनात् समवायपरीक्षामाह २४ इहेदमितिय

तः कार्य्यकारणयोः समवायः कार्य्यकारणयोरित्युपलक्ष

णं अकार्य्यकारणयोः इत्यपि द्रष्टव्यं तदुक्तं पदार्थप्रदेशाख्ये

प्रकरणे अयुतसिद्धानामाधार्य्याधारभूतानां यः संबंधः इहे

ति प्रत्ययहेतुः समवाय इति असम्बद्धयोरविद्यमानत्वमयुत

सिद्धिः इह कुंडे दधीत्यं कुंडे बदराणीति वदिह तन्तुषु पट इह वी

रणेषु कट इह द्रव्ये द्रव्यगुणकर्माणीह गवि गोत्वमिहात्मनि ज्ञान

मिहाकाशे शब्द इतीह बुद्धिरुत्पद्यमानानां विना संबंधमनुत्पत्तु

मर्हतीति तेनानुमीयते स्ति कश्चित् संबंधः न चासौ संयोग एव अन्य

तरकर्मादीनां तदुत्पादकानामभावात् विभागपर्य्यवसानाभा

वाच्च संबंधिनामयुतसिद्धित्वाच्च नियताधिकरणतयैवोन्नेयत्वा

द प्रत्यक्षत्वादेकत्वान्नित्यत्वाच्च ननु एकश्चेत् समवायस्तदा द्रव्य

त्वादीनां संकरप्रसंगः कर्मत्वादि समवायस्य द्रव्ये संभवात् मै

वं आधाराधेयनियमादेवासंकरात् यद्यपि य एव द्रव्यत्व सम

वायः स एव गुणकर्मत्वादीनामपि तथापि तेषां न द्रव्यमाधा

रः तत्र तेषामप्रतीतेः द्रव्येष्वेव द्रव्यत्वं प्रतीयते गुणेष्वेव गुणत्वं

कर्मस्वेव कर्मत्वं न त्वन्यत्रे त्यन्वयव्यतिरेकदर्शनादेव नियमः

यथा कुंडदध्नोः संयोगाविशेषेपि कुंडमेवाधारो न दधीत्या

श्रयाश्रयिभावनियमस्तथा व्यंग्यव्यंजकशक्तिभेदादेवा

त्रापि नियम उत्पद्यते नहि द्रव्येण द्रव्यत्ववत् कर्मत्वाद्यप्य

भिव्यज्यते तदुक्तं संविदेव हि भगवती वस्तूपगमे नः शरणमि

ति न ह्याधारत्वं प्रति विपरीता संविदस्ति न हि भवति द्रव्ये क

र्मेति न वा भवति पटे तंतव इति एतेन वायोरूप समवायेपि वा

योरूपमित्याधारतानवायोः प्रतीयते तस्मात्स्वभावशक्तिरे
वसर्वत्रनियामिकेसचायन्नित्यः अकारणत्वात् भावानांहि
समवायिकारणादुत्पत्तिनियमः तदनुरुद्धेचनिमित्तासमवा
यिनीतथाचसमवायस्यसमवायिकारणंयत्स्यात्तत्समवा
यांतरेणतेनैवसमवायेनवानतावदाद्यः अनवस्थापातात् न
द्वितीयः नहिसएवसमवायः स्वेनैवसमवायसंभवतीत्यात्मा
श्रयात् तंतुषुपटसमवायः पटेरूपसमवायइतिप्रतीतिः क
थमितिचेत् स्वरूपसंबंधेनसमवायांतरांगीकारेनवस्थापाता
त् नहीहपटरूपमित्यपीहप्रत्ययः स्वरूपसंबंधेनैवस्यात्
हिंसमवायेनेतिचेत् नतत्रातिरिक्तसंबंधेवाधकाभावात् तर्ही
हभूतलेघटाभावइत्यत्रापिसमवायःसंबंधांतरंवास्यादिति
चेत् नस्वरूपसंबंधेनैवतदुपपत्तेः अन्यथाघटात्यंताभावा
न्योन्याभावयोर्नित्ययोरनेकसमवेतयोः सामान्यत्वापत्तिः
प्रध्वंसस्यचसमवेतकार्य्यत्वेनविनाशित्वापत्तेःप्रागभावस्यच
समवेतानुत्पन्नत्वेनाविनाशित्वापत्तेः नचभावत्वंतत्रतत्र
भावत्वस्यापाद्यत्वात् अभावेस्यैववैशिष्ट्याख्यसंबंधांतरमि
तिभाट्टाः तत्र यदि सर्वाभावव्यक्तीनामेकमेववैशिष्ट्यंतदाघट
वत्यपिघटाभावप्रत्ययप्रसंगः घटाभाववैशिष्ट्येनैवघटाभा
ववैशिष्ट्यसत्वात् घटएवतत्रघटाभावधीप्रतिबंधकइति
चेत् वैशिष्ट्यसंबंधेनप्रतिबंधकाभावस्यैवतत्रसत्वात् न
चाश्रयस्वभावएवतादृशोयेननतत्रघटाभावाभिव्यक्तिः
घटापसारणानंतरंतत्रैवघटाभावप्रतीतेः तवापिरक्तरू

पनाशौंतरं कथं न रूपवत्ताप्रत्ययः समवायस्य नित्यत्वादेकत्वा
च्चेति चेत् न रूपनाशादेव तत्प्रतीतेरुपपत्तेः समवायि प्रतिबंदी
प्रत्यक्षमयूखे मोचित एवेत्यास्तां   द्रव्यादिभ्यः पंचभ्यो भेदं सा
धयन्नाह २९ द्रव्यत्वगुणत्वप्रतिषेधो भावेन व्याख्यातः भा
वः सत्ता यथा सत्ता न द्रव्याद्यात्मिका विलक्षणबुद्धिवेद्यत्वात् त
था समवायोपि तत एव द्रव्यादिभ्यो भिन्नः द्रव्यत्वगुणत्वेत्युप
लक्षणं कर्मत्वाद्यपि द्रष्टव्यं   एकत्वं साधयति २९ तत्त्वं भा
वेन   व्याख्यातमिति शेषः तत्त्वमेकत्वं भावेन सत्तया व्याख्या
तं यथैका सत्ता सर्वत्र सद्बुद्धिप्रवर्त्तिका तथा एक एव समवायः स
र्वत्र समवेतबुद्धिप्रवर्त्तकः स्वलिंगाविशेषाद्विशेषलिंगाभावा
च्च न हि समवायस्य विशेषलिंगं भेदकं लिंगमाकलयामो येन
नानात्वमभ्युपगच्छामः अत एव नित्यः देशकालादिभेदे
प्यभिन्नस्य सत्तावदेवानित्यत्वायोगात् ननु समवायोपच्चे
संबंध एव तदा तंतुपटयोः घटरूपयोर्वा विश्लेषः स्यादिति चे
न्न तत्सिद्ध्यभावाद्विश्लेषानुपपत्तेः न हि रूपतद्वतोरव
यवावयविनोर्वेद्वयोर्विद्यमानत्वमस्ति येन विश्लेषः स्यात्
तत्सिद्धिरेवापाद्यत इति चेत् न कदाचिदपि तथानुभवे
नापाद्यबाधात् समवायो नाना ऽनित्यश्चेति प्राभाकराः त
च्चानुपपन्नं रूपं नष्टमिति हि प्रत्ययो न तु रूपसमवायो न
ष्ट इति कस्यापि प्रत्ययः प्रत्यक्षः समवाय इति नैयायिकाः
तदप्यनुपपन्नं समवायोतीन्द्रियः आमान्यवत्सर्वसत्यसम
वेतभाववत्त्वात् मनोवत्कालादिवत्वो   इति शंकरे वैशेषिक

सूत्रोपस्कारे सप्तमोऽध्यायः समाप्तः॥ ॥७ विषयजिज्ञासा
नुरोधात् क्रमलंघनमिदानीमुद्देशक्रममालम्बते तत्र बुद्धि
परीक्षायाष्टमाध्यायार्थः आत्मसाधनाय पूर्वं बुद्धिरुक्ता
तां स्मारयन्नाह द्रव्येषु ज्ञानं व्याख्यातं द्रव्येष्विति विषयेण
विषयिणं तृतीयाध्यायमुपलक्षयति इंद्रियार्थप्रसिद्धिरि
न्द्रियार्थेभ्योऽर्थान्तरस्य हेतुः आत्मेंद्रियार्थसन्निकर्षाद्यदु
त्पद्यते तदन्यदित्येताभ्यां सूत्राभ्यां ज्ञानं व्याख्यातमित्यर्थः
तत्र बुद्धिरुपलब्धिर्ज्ञानं प्रत्यय इति पर्य्याया इति समानतंत्रे
बुद्धिलक्षणसांख्यमतनिरासार्थं पर्य्यायाभिधानं सांख्या
हि बुद्ध्यादिशब्दानामर्थभेदमाचक्षते तथाहि सत्वरजस्तम
सां साम्यावस्था प्रकृतिः सा चैकैव पुरुषास्तु परं भिद्यन्ते ते च
कूटस्थानित्या अपरिणामिनो नित्यचैतन्यस्वभावाः ते च पंगवो
ऽपरिणामित्वात् प्रकृतिस्त्वंधा जडत्वात् यदा च विषयभोगे
च्छा प्रकृतिपुरुषभेददिदृक्षा च प्रकृतेर्भवति तदा पुरुषोपरा
गवशात्परिणमते तस्याश्चाद्यः परिणामो बुद्धिः अन्तःकरण
विशेषः बुद्धिरेव महत्तत्त्वं तदुक्तं प्रकृतेर्महानिति सा च बुद्धि
र्दर्पणवन्निर्मला तस्यां च बहिरिंद्रियप्रणाडिकया विषयाका
रः परिणतिर्भवति घट इति पट इत्याद्याकारस्तज्ज्ञानं वृत्तिरि
ति चाख्यायते स्वच्छायां बुद्धौ वर्त्तमानेन ज्ञानेन चैतन्यस्य पुरु
षस्याभेदाग्रहादहं जानामीत्ययोभिमानविशेषः सैवोपल
ब्धिः स्रक्चन्दनादिविषयसन्निकर्षादिंद्रियप्रणाडिकयैव
सुखदुःखाद्याकारो बुद्धेरेव यः परिणामविशेषः स प्रत्ययः

अतएवज्ञानसुखदुःखेच्छाद्वेषप्रयत्नसंस्कारधर्माधर्माः सर्वेए
वबुद्धेः परिणामविशेषाः सूक्ष्ममात्रया प्राकृतास्ते वर्तमाना
अवस्थाभेदादाविर्भवंतितिरोभवंतिचपुरुषस्तु पुष्करपला
शवन्निर्लेपः प्रतिविम्बितेपरं बुद्धावितिमन्यंतेतदनेनप
र्य्यायाभिधानसूचितप्रमाणेननिराक्रियतेतथाहि बुद्धिशब्दो
यदिबुध्यतेऽनयेतिकरणव्युत्पन्नस्तदामनएतस्यपर्य्यवस्यति
नचमनःप्रत्यक्षं बुद्धिस्त्वहं बुध्यइतिप्रत्यक्षवेद्यैवनचांतःक
रणेभासः अभिमानोसावितिचेन्नतात्विकत्वेबाधकाभावात्
पुरुषस्यागंतुकधर्माधारत्वं कूटस्थत्वंतदेवबाधकमितिचे।
न्नआगंतुकधर्माधारत्वेपिनित्यत्वसंभवात् नहि धर्मी धर्मस्त्व
त्येकं तत्त्वयेनधर्मो स्यादविनाशादेवधर्म्यस्याद्विनाशेस्यातां
तथाचयएवचेतयतेसएवबुध्यतेजानात्युपलभतेप्रत्येतिचेति
नार्थांतरकल्पनायुक्तेतिदिक् तच्चज्ञानंद्विविधंविधं विद्या
चाविद्याचविद्याचतुर्विधाप्रत्यक्षलैंगिकस्मृत्यार्षलक्षणा अवि
द्यापिचतुर्विधासंशयविपर्य्ययस्वप्नानध्यवसायलक्षणा तत्रयदैं
गिकंतदनिंद्रियजंकुतनेदिस्याहा तत्रात्ममनश्चाप्रत्यक्षे आ
त्माद्वैपरात्मास्वात्माचास्वात्मनि मानसस्यकाचित् काहंप्रत्ययस्या
हंगोरः कृशो महाबाहुर्विद्यादिप्रत्ययतिरस्कृतत्वात् स्वात्मनो
प्यप्रत्यक्षतोकाचकारादाकाशकालदिशांवायोः परमाणु
नांचद्रव्याणामुपग्रहः इंद्रियमपि द्विविधंसर्वं ज्ञी[illegible]जध
र्मलक्षणया प्रत्यासत्यातत्तत्पदार्थसार्थज्ञानंतथाहि परमा
णवः प्रमेयत्वादभिधेयत्वात्सामग्रीविरहात् कथमेवंमह

स्वज्ञानादयो धर्माः
कर्तृधर्मत्वेनैव तेषां ति
ष्ठेः भवतीति स्वप्रहृजानेहं
प्रत्यभिज्ञाहमुपलभे इत्य
हंत्वतामानाधिकरण्येन
प्रति ८

यमस वंशी यंचसर्व ज्ञीयंयोग

प्रत्ता तत्वा

त्वस्यापिप्रत्यक्षंप्रतिकारणत्वात् नचपरमाणावोमहांतः रूपव
त्स्यापिचाक्षुषप्रत्यक्षकारणत्वान्नचदिग्गादयोरूपवंतइति
चेत् नयोगजधर्मसहकारिणामनसैवतत्संभवतितदुपग्रहात्
चक्षुरादिनावा अचिंत्यप्रभावोहियोगजोधर्मोनसकार्य्यांतरम
पेक्षते विवादाध्यासितः पुरुषोनसर्वज्ञः पुरुषत्वादहमिवे
त्यादितुप्राभाकरोनमीमांसाभिज्ञः पुरुषत्वादहमिवेत्यादि
वद्वियस्वाधकं तर्कशून्यत्वात् प्रयोजकं असर्वज्ञीयंचप्रत्य
क्षंद्विविधंसविकल्पकंनिर्विकल्पकंचसविकल्पकंज्ञानंनप्र
माणमितिकीर्त्तिदिङ्नागादयः तथाहि अभिलापसंसर्ग
योग्यप्रतिभासंहितत् नह्यभिलापेननाम्नासंभवत्यर्थस्यसंबं
धोयेनघटइतिपटइतिवानामानुरंजितः प्रत्ययः स्यात् न
चजात्यादिपरमार्थसंबंधेनघतद्वैशिष्ट्यविषयेष्विंद्रियेणानुभू
त नचसतः स्वलक्षणस्यासतासंबंधः संभवति नचासदिंद्रि
यगोचरः तस्मादिंद्रियेणालोचनंजन्यते आलोचनमहिम्ना
चसविकल्पकमुत्पद्यमानंतत्रार्थेप्रवर्त्तयत् प्रत्यक्षमितिप्र
माणमितिचोच्यइतिनचेतदनुपपन्नंअभिलापसंसर्गयोग्य
प्रतिभासंचभवेत् प्रमाणंचेंद्रियार्थसन्निकर्षजन्यंस्यादिति
संदिग्धव्यतिरेकित्वंनामवैशिष्ट्यंचचाक्षुषज्ञानेसंभवत्ये
वसुरभिचंदनमितिवदुपनीतभानसंभवात् यद्वासंज्ञावै
शिष्ट्यंप्रत्यक्षज्ञानेनभासतेसंज्ञायाः स्मरणमात्रंस्मृतेवार्थे
व्यावर्त्तिकाअभावज्ञानेप्रतियोगिस्मरणंतु जात्यादिकं
चवस्तुभूतंसाधितमेवातः सविकल्पमपींद्रियार्थसन्निक

षजत्वात् प्रत्यक्षं ननु निर्विकल्पकं न व्यवहारप्रवर्त्तकं न वा व्यवहा
रविषय इति किं तत्र प्रमाणमिति चेत् सविकल्पकमेव तद्धि वि
शिष्टज्ञानं न च विशेषणज्ञानमन्तरेणा तदुत्पद्यते विशिष्टज्ञा
ने हि विशेषणज्ञानविशेष्येन्द्रियसन्निकर्षतदुभयासंसर्गाग्र
हस्य कारणत्वावधारणात् यत्र यथा ज्ञानं यत्कारणकं च तद्द
र्शयितुमाह २ ज्ञाननिर्द्देशे ज्ञाननिष्पत्तिविधिरुक्तः ज्ञा
नान्तराणि निर्द्दिष्टव्यं यत्प्रकारकं यद्विषयकं यद्धर्मकं तत्र ज्ञाननिर्द्दे
शे कर्त्तव्ये ज्ञानस्य निष्पत्तिविधिरुत्पत्तिप्रकार उक्त उच्यत इ
त्यर्थः आदिकर्मणि क्तविधानात् कीदृशी निष्पत्तिविधिस्त
माह ३ गुणकर्मसु सन्निकृष्टेषु ज्ञाननिष्पत्तेर्द्रव्यं कारणं गु
णेषु रूपादिषु कर्मसु चोत्क्षेपणादिष्वक्षाश्रितेषु यज्ज्ञानं निष्प
द्यते तत्र द्रव्यं कारणं योग्यद्रव्यनिष्ठमेव तदुभयं गृह्यत इति
द्रव्ययोग्यतैव तत्र तन्त्रं सन्निकर्षश्च तेषां द्रव्यघटित एव संयु
क्तसमवायेन तेषां ग्रहणात् यद्यपि विपक्वचंपकावयवकर्पूर
भागानामयोग्यानां गन्धो गृह्यते तत्सन्निकर्षघटकं तत्रायो
ग्यमपि द्रव्यमेव यद्यपि शब्दग्रहे द्रव्ययोग्यता न तन्त्रं तथापि त
त्रैव समवेतः शब्दो गृह्यत इति तदेव तन्त्रं ननु दृष्टसन्निकर्षक
ल्पना कुतः क्रियत इति चेत् न ज्ञाननिष्पत्तेः कार्य्येण हि का
रणमवश्यं कल्पनीयमिति भावः अपरं ज्ञाननिष्पत्तिविधि
माह ४ सामान्यविशेषेषु सामान्यविशेषाभावात्तत एव ज्ञा
नं सामान्यं सत्ता तस्य विशेषा द्रव्यत्वगुणत्वकर्मत्वानि एव
मेतेष्वपि सामान्यानां विशेषाः पृथिवीत्वादिरूपत्वादिक

तू क्षेपणत्वादीनि तत्र द्रव्यगतानां सामान्यानां ततराव योग्या
श्रयविशेषादेव तन्निबंधनाच्च संयुक्त समवायात् गुणकर्मग
तानामपि सामान्यानां तत एव योग्याश्रयादेव तन्निबंधना
च्च संयुक्त समवेत समवायात् शब्दत्वकत्वादेः समवेत समवा
यात् सत्तायाश्च संयुक्त समवायात् समवेत समवायाच्च सर्वे
न्द्रियं ज्ञानं गुणत्वे च संयुक्त समवायः समवायश्च न प्रत्यासत्ति
रिति व नतु तत एव स्वाश्रय सन्निकर्षादेवेत्यवधारणा
नुपपत्तिः मतः सामान्य विशेषेषु च पृथिवीत्वादिषु सामा
न्यविशेषांतरमस्त्येव तत्सन्निकर्षोपि कारणमेवात आह
सामान्यविशेषाभावादिति नहि सामान्य विशेषेषु सामान्य
विशेषा वर्त्तन्ते अनवस्थाप्रसंगात् तेषां परस्परं भेदप्रतीतिः
स्वरूपत एव गवेतराद्व्यावृत्तिर्वे सति सकलगोव्यक्तिवृत्तित्वलक्षणोपाधि
संभेदाद्वा एवं घटत्वादिष्वपीति ननु यथा सामान्यविशेषेषु सा
मान्यविशेषाभावाद्यथा तन्निरपेक्षमेव ज्ञानं न तथा द्रव्यगु
णकर्मस्वपि तन्निरपेक्षमेव नेत्याह ५ सामान्यविशेषा
पेक्षं द्रव्यगुणकर्मसु ज्ञानमुत्पद्यत इति प्रकृतं तथाहि अ
द्रव्य
स्य गुण कर्मसु द्रव्यत्व गुणत्व विशिष्ट बुद्धिस्तावदस्तिविशिष्ट
ज्ञानं च विशेष्य विशेषणेन्द्रियसन्निकर्षादुत्पद्यत इति सामा
न्यविशेषापेक्षात्र आवश्यकी भवतिहि द्रव्यमिहि द्रव्यमिदं
गुणोयं कर्मेदमिति विशिष्ट ज्ञानमिति भावः तत्र किं द्रव्ये
पि सामान्य विशेषमात्रापेक्षमेव ज्ञानमत आह ६ द्रव्ये
द्रव्यगुण कर्मापेक्षं ज्ञानमुत्पद्यत इति प्रकृतं घंटावान्

शुक्लो गौर्गच्छतीति ज्ञानं तत्र द्रव्यं घटादि विशेषणं शुक्ल इति गुण
श्चलतीति कर्म तथा चनागृहीतविशेषणा विशिष्टप्रतीति
र्न्नवा विशेषणसंबंधमंतरेणेति द्रव्यज्ञाने द्रव्यगुणकर्मापे
क्षेति भावः ननु किं गुणकर्मणोरपि गुणकर्मापेक्षज्ञानं स्या
ह ७ गुणकर्मसु गुणकर्माभावाद्गुणकर्मापेक्षं न विद्यते
ज्ञानमिति शेषः गुणे गुणविशिष्टबुद्धेः कर्मविशिष्टबुद्धेरभा
वात् गुणकर्मापेक्षा न तदुभयबुद्धिः नहि गुणे गुणो न वा
कर्मसु कर्मेति न तत्र विशेषणत्वेनभासेतेति भावः ननु गुण
कर्मणोः स्फुरणा गुणबुद्धौ च कथं न गुणकर्मापेक्षेत्याशं
क्य प्रकरणांतरमारभते ८ समवायिनः श्वैत्यात् श्वैत्य
बुद्धेश्च श्वेते बुद्धिस्ते एते कार्यकारणभूते समवायिन इत्य
भिधानात् संबंधस्य कारणतामाह तथा च गुणे गुणसम
वायाभावात् कर्मसु कर्मसमवायाभावाच्च न तत्त्वज्ञाने गुण
कर्मापेक्षा विशेषणत्वेन विशेष्यत्वेन चत्वस्येव एवं च श्वेतः शं
ख इत्यादि प्रतीतौ श्वैत्यसमवायस्य श्वैत्यगुणस्य श्वैत्यत्वविशेष
णज्ञानस्य च कारणत्वमित्युक्तं तथा च विशेषणसंबंधविशे
षणतज्ज्ञानानां विशिष्टप्रत्यक्षप्रसंगप्रतिकारणत्वमिति ते
न पूर्वोक्तं सर्वं सिध्यति ननु यथा घटावानित्यत्र द्रव्यापेक्षं
द्रव्यज्ञानं तथायं कुंभोयं स्तंभ इत्यादावपि द्रव्यविशेषण
कबुद्धौ द्रव्यबुद्धिः कारणं तथा च क्वापि प्रथमतो द्रव्यबुद्धि
र्न्न स्यादित्यत आह ९ द्रव्येष्वनितरेतरकारणाः बुद्ध
य इति शेषः स्तंभज्ञानानंतरकालीनमपि कुंभज्ञानं न स्तं

वै० सू० वृ०
९६
96

भज्ञानकार्य्यस्तंभस्यकुंभंप्रतिविशेषणत्वायोगात् ननुघ
टपटादिबुद्धीनांक्रमेदृश्यतेक्रमश्चकार्य्यकारणभावघटित
एवेसतआह १० कारणायौगपद्यात् कारणक्रमाच्चघट
पटादिबुद्धीनांक्रमोनहेतुफलभावात् कारणक्रमाधीनो
घटपटादिबुद्धीनांक्रमोनहेतुफलभावाधीनः कारणक्र
मएवकथमतआह कारणायौगपद्यादितिबुद्धीनांयौगप
द्यंप्रतिषिद्धमतोनानाबुद्धिकारणानामपिनयौगपद्यंयदि
तुकारणयौगपद्यंभवेत्तदाकार्य्ययौगपद्यमप्यापद्येततथा
चयुगपज्ज्ञानानुत्पत्तिर्मनसोलिंगमितिवहुभज्येतेतिभावः
इतिशांकरेवैशेषिकसूत्रोपस्कारेऽष्टमाध्यायस्यप्र
थममाह्निकं प्रात्याक्षिकंसविकल्पकंनिर्विकल्पकस्य
चज्ञानस्यनिष्पत्तिविधिमभिधायेदानींविशिष्टवैशिष्ट्य
प्रत्यक्षमभिधातुमेकदेशमाह अयमेषत्वयाकृतंभो
जयैनमितिबुद्ध्यपेक्षं सन्निकृष्टेवस्तुनितावदयमि
तिबुद्धिरुत्पद्यतेविप्रकृष्टेचवस्तुन्येषइतिक्रियायांस्वतंत्रो
यमितिबुद्धिमपेक्ष्यत्वयेतिकर्तृत्वोपवर्णबुद्धिः करणव्यापा
रविषयत्वबुद्धिमपेक्ष्यकृतमितिकर्मबुद्धिः अयंभुजिक्रिया
यांकर्ताप्रयोजकश्चायमितिबुद्धिमपेक्ष्यभोजयेतिनियोज्य
नियोक्तृव्यापारस्यविषयोयमितिबुद्ध्यपेक्षमेनमितिएव
मन्यदपिबुद्ध्यपेक्षमूहनीयं अन्वयव्यतिरेकपरिच्छेद्य
मेवैतदित्याह १२ दृष्टाभावाददृष्टेस्वभावात् यदायमि
तिबुद्धेः सन्निकृष्टोविषयएवइतिहेश्चविप्रकृष्टोपिबुद्ध्या

रूढो विषयस्तैयेति बुद्धेः सन्निकृष्टः कर्त्ता विषयः कृतमिति
बुद्धेश्च कर्मविषयो भोजयेति नियोज्यनियोक्तारौ विषयौ वेन
मितितदुभयव्यापारविषयः सन्निकृष्टो भवतितदेतादृशीबु
द्धिरुत्पद्यते अदृष्टेषु तु विषयेषु नैतावुद्भवः प्रादुर्भवंतीत्य
न्वयव्यतिरेकाभ्यां वैनैतदित्यर्थः इदानीं प्रकरणांतरमा
रभते १३ अर्थ इति द्रव्यगुणकर्मसु एतेषां द्रव्यगुणक
र्मणां समर्थो माभवंते न तेन विधिनोतुं नेन तेषु त्रिषु वैशेषि
काणामर्थ इति परिभाषा अर्थपदेन त्रयाणामुपस्थितेः तदु
क्तं प्रशस्तदेवाचार्य्यैः त्रयाणामर्थशब्दाभिधेयत्वं चेति प्रकर प्रतिषिद्धं
णांतरमवतारयति १४ द्रव्येषु पंचात्मकत्वं द्रव्येष्विति द्र
व्यपदार्थनिरूपणप्रकरणमुपलक्षयति प्रत्यक्षाप्रत्यक्षाणा
मित्यादिसूत्रेण शरीरादीनां पंचात्मकत्वं पंचभूतात्मकत्वं प्रा
प्तिसिद्धं निराकृतं यथा शरीरस्य नानाप्रकृतित्वं तथा वक्ष्यमा
णानां घ्राणादीनामिंद्रियाणामपि तेन तेषां प्रतिनियतगुण
ग्राहकत्वं सिद्ध्यतीति भावः यदर्थमिदमारब्धं तदाह १५
भूयस्त्वाद्गंधवत्त्वाच्च पृथिवी गंधज्ञाने प्रकृतिः गंधो ज्ञा
यतेनेनेति गंधज्ञानं घ्राणं तत्र पृथिवी पृथिवीमात्रं प्रकृति
रुपादानकारणं कुत एतदित्यत आह गंधवत्त्वात् नहि गंधव
न्निर्गंधेनारभ्यत इत्युक्तं गंधवत्त्वं च बहिरिंद्रियाणां ग्राह्य
जातीयगुणवत्त्वनियमात् सिद्धं तर्हि पार्थिवत्वाविशेषेपि श
रीरावयवांतराणां न गंधव्यंजकत्वं किंतु घ्राणस्यैवेति कुतो
नियम इत्यत आह भूयस्त्वादिति इतरद्रव्यानभिभूतैः पार्थि

वावयवैवारब्धत्वमेव भूयस्त्वं पारिभाषिकं चैतद्भूयस्त्वं समान
तंत्रेपि इंद्रियांतरेप्येतदितिदिशति ॥ २६ ॥ तथापस्तेजोवायु
श्च रसगंधस्पर्शाविशेषात् रसनचक्षुस्त्वगिंद्रियाणां प्रकृति
रितिशेषः ते न यथासंख्यं रसनादीनामवादयः प्रकृतयः त
त्तत्तन्नियतार्थग्राहकत्वात् अत्रापि नियमे भूयस्त्वमेव तंत्रं र
सादिमत्त्वे च रसनादीनां ग्राह्यजातीयविशेषवत्त्वनियमए
व प्रमाणमित्युक्तं एवं च विशिष्टादृष्टोपगृहीतकर्णशष्कुल्यवच्छि
न्नो नभोदेश एव श्रोत्रं इति शांकरे वैशेषिकसूत्रसंस्कारेऽष्ट
मोध्यायः समाप्तः ॥ ८ संयोगसमावायान्यतरसन्निक
र्षजलौकिकप्रत्यक्षनिरूपणानन्तरं तदितरप्रत्यासत्तिजन्य
लौकिकालौकिकप्रत्यक्षमुत्पादनफलकं नवमोध्यायमा
ह क्रियागुणव्यपदेशाभावात्प्रागसत् कार्य्यमितिशे
षः प्रागिति कार्य्यासत्तेः प्राक्कार्य्यं घटपटादि असत् तत्काली
नध्वंसनकाभावप्रतियोगीत्यर्थः अत्र हेतुः क्रियागुण
व्यपदेशाभावात् यदि तदानीमपि कार्य्यं घटादि सदेव
स्यात्तदा क्रियावत्त्वेन च व्यपदिश्येत यथोत्पन्ने घटे घट
स्तिष्ठति घटश्चलति रूपवानयं दृश्यते घट इत्यादिप्रकारे
ण व्यपदिश्यते न तयोत्पत्तेः प्रागपि व्यपदेशोस्ति तेन ग
म्यते तदानीमसन्निति सव्यूह्यमाने सुवीरणेषु वध्येमा
णेषु तंतुषु चक्रारूढायां मृदि कुलालादिव्यापारे वनुव
र्त्तमानेषु भविष्यत्यत्र कटः पटो घटो वेति सार्वलौकिकी
प्रत्यक्षप्रतीतिः चक्षुर्विस्फारणानंतरं जायमानत्वात् न च सं

योगसमवायान्यतरघटिताप्रत्यासत्तिरत्र भवतितस्मादिं।
द्रियसंबद्धविशेषणताप्रत्यासत्तिरत्रतंत्रं ननुचैवान्योन्याश्रयः
सत्यांविशेषणतायांतत्प्रतीतिः प्रतीतौचविशेषणतेतिचे
त्. नविशेषणताहितदुभयस्वरूपमेवोपश्लिष्टप्रत्ययज
ननयोग्यंतत्त्वप्रतीतेः पूर्वमपिसदेवतदुक्तं न्यायवार्त्तिकेस
मवायेऽभावेचविशेषणविशेष्यभावइतिसचायंप्रागभावः
प्रतियोगिजनकः नहिघटेजातेसएवघटस्तदानीमेवोत्प
द्यतेतत्रकारणांतरसत्वेपिकारणवैकल्यमनुस्रियमाणंस्व
प्रागभाववैकल्पमेवानुसर्तुमर्हतितद्घटोत्पत्तौसएवघटःप्र
तिबंधक इतिचेत् तर्हिप्रतिबंधकाभावत्वेनतस्यकारणत्व
मवर्जनीयं ननुयदिघटएवतस्याभावस्तदाघटेनष्टेतदुन्मा
ज्जनापत्तिरितिचेत् नघटनाशस्यापितद्विरोधित्वात् नहि
विरोधिसत्वकालेपिविरोध्यंतरप्रादुर्भावइति नह्यनयोर्देश
कृतोविरोधोयेनगोत्वाश्ववत् समानकालीनत्वंस्यात्
किन्तर्हिकालकृतस्तथाचकथमेककालावस्थायित्वंभवे
त् अभावांतरंप्रतीतिबलसिद्धमाह १ सदसत् यथा
कारणव्यापारात्पूर्वंप्रत्यक्षानुमानाभ्यांकार्यस्यासत्वं
प्रमीयतेतथाविनाशकस्यमुद्गरादेर्व्यापारानंतरंसदेवकार्य्यं
घटादीदानीमसदितिप्रत्यक्षानुमानाभ्यामेवप्रमीयतेसचाय
मभावोध्वंसइतिगीयतेभवतिहिघटोनष्टोध्वस्तइदानीं
श्रुतपूर्वोगकारोनास्तीत्यादिधीरितिभावः ननुघटएवा
वस्थाविशेषध्वंसेव्यवहारंकरोतिनतुघटादन्यस्तस्यध्वंसे

इत्यत आह २ असतः क्रियागुणव्यपदेशाभावादर्थान्त
रं सदितिसूत्रशेषः असतः सदर्थान्तरं कुत इत्यत आह क्रिया
यागुणव्यपदेशाभावावादिति नहि प्रध्वंसकालेपि वर्त्तते घ
टोस्ति घट इदानीं रूपवान् घटो घटमानयेत्यादिव्यपदेश
स्तदितो वैधर्म्यादसतः सदर्थान्तरमिति प्रागभावप्रध्वंसौ
साधयित्वान्योन्याभावं साधयितुमाह ३ सच्चासत् यत्र
सदेव घटादि असदिति व्यवह्रियते तत्र तादात्म्याभावः प्र
तीयते भवति ह्यसन्नश्वो गवात्मना असन् गौरश्वात्मना अ
सन् पटो घटात्मना अघटः पटो ऽनश्वो गौरगौरश्व इत्या
दिप्रतीतिः तदस्यां अश्वान्योन्याभाववान् गौः पटान्यो
न्याभाववान् घट इत्यन्योन्याभाव एव तादात्म्याभावा
पर नामा भासते न त्वत्र तादात्म्यप्रतियोगितावच्छेदकं प्रति
योगिसमानाधिकरणश्चायमभावः भवति हि घटो न भू
तमिति प्रतीतिः नित्यश्च कदाचिदपि घटपटयोस्तादा
त्म्यासंभवात् इदानीं चतुर्थमभावमत्यन्ताभावाख्यमाह
४ यच्चान्यदसदतस्तदसत् अतः पूर्वोक्तादभा
वत्रयात् यदन्यदसत् तदत्यन्तासत्त्वं असदित्युभ
यत्र भावप्रधानो निर्देशः तत्रैवमसदुद्देश्यपरमसद्विधे
यं तथा चोक्ताभावत्रयभिन्नो योऽभावः सोऽत्यन्ताभाव इ
ति पर्यवसन्नोऽर्थः तत्र प्रागभावस्यानरविधित्वं प्रध्वंस
स्य पूर्वावधिकत्वमन्योन्याभावस्य प्रतियोगिसमानाधि
करणत्वमत्यन्ताभावस्य तु त्रितयवैधर्म्यमतश्चतुर्थोयम

भावः इदानींप्रकरणांतरमारभते तत्रप्रध्वंसेतावत्प्रत्यक्षसा
मग्रीमाह ५ असदितिभूतप्रत्यक्षाभावात् भूतस्मृतेर्वि
रोधिप्रत्यक्षवत् असदितीतिकारेणप्रत्यक्षाकारंज्ञान
माह तेनासन् घटोनष्टोघटोध्वस्तइदानींघटइतिप्रत्यक्षाप्र
तीतिरितितत्रदृष्टान्तोविरोधिप्रत्यक्षवदितिविरोधिनः पटादे
र्यथास्यत्वंप्रत्यक्षंतथातत्प्रध्वंसस्यापितत्रकारणमाहभूतप्र
त्यक्षाभावादितिभूतस्यातीतस्यविनष्टस्यघटादेः प्रत्यक्षाभा
वात् एतेनयोग्यानुपलब्धिमाहतत्रचायंतर्कः सहकारीयद्य
त्रघटोऽभविष्यत् भूतलमिवाद्रक्ष्यत् नचदृश्यतेतस्मान्नास्ती
तिसहकार्यंतरमाह भूतस्मृतेरितिभूतस्यप्रयोगिनोघटादेः ति
स्मृतेरितिप्रतियोगिस्मरणमुक्तं प्रागभावेप्रध्वंसप्रत्यक्षताप्र
कारमतिदिशन्नाह ६ तथाऽभावेभावप्रत्यक्षत्वाच्च साम
न्यवाच्यप्ययमभावशब्दःप्रकरणात्प्रागभावपरः यथाप्र
ध्वंसेप्रत्यक्षंज्ञानंतथाप्रागभावेपिकुतः भावप्रत्यक्षत्वात्भा
वस्यभूत्वमानीवीरणादेःप्रत्यक्षत्वात् प्रत्यक्षेणविषयीक्रि
यमाणत्वात् यद्वाभाव – स्याधिकरणस्यप्रतियोगिनश्चप्र
त्यक्षत्वात् योग्यत्वादित्यर्थः संसर्गाभावग्रहेधिकरणयोग्यता
याः प्रतियोगियोग्यतायाश्चतंत्रत्वात् चकारात् प्रतियो
गिस्मरणमुक्तंचतर्कंसमुच्चिनोति अनादेरपिप्रागभावस्या
नंतस्यापिध्वंसस्यावस्थाविशेषमात्रेप्रत्यक्षत्वं अन्योन्या
भावस्यप्रत्यक्षतामाह ७ एतेनाघटोऽगौरधर्मश्चव्या
ख्यातः एतेनेतिप्रतियोगिस्मरणाधिकरणग्रहणप्रागु

क्ततर्को नातिदिशति योग्यानुपलंभश्च सर्वत्र समानः चकार
उक्तसमुच्चयार्थः अधर्मेऽत्यंतीन्द्रियस्यापि धर्मस्य सुखत्वाना
दावधिकरणेन्योन्याभावप्रत्यक्षतां वदन्नन्योन्याभावग्रहे
प्रतियोगियोग्यता न तंत्रं किंत्वधिकरणयोग्यतामात्रं तं
त्रमित्युपदर्शयति कथमन्यथा स्तंभः पिशाचो न भवतीति
पिशाचान्योन्याभावः स्तंभे गृह्येत सत्रापि शाचतया पिशाचानुप
लंभस्य तदन्योन्याभावग्राहकत्वात् तस्याप्यनुपलंभस्य प्र
तियोगिसत्वविरोधित्वात् स्तंभे पिशाचतादात्म्यस्यानुपलंभा
नुपपत्तेः ननु पिशाचतादात्म्यमिह न प्रतियोगि किं तर्हि पि
शाचः स च स्तंभे वर्तमानोपि गुरुत्ववन्नोपलभ्यत इति तदनु
पलंभः प्रतियोगिसत्वविरोधी न भवतीति चेत् न अधिकर
णात्वत्ति चेन ज्ञायमानो धर्मः एव प्रतियोगितावच्छेदको न प्र
तियोगितावच्छेदकत्वेनापि तद्ग्रहः तंत्रमित्युक्तत्वात् अथे
दानीमत्यंताभावप्रत्यक्षतामाह ८ अभूतं नास्तीत्यनर्थां
तरं भूतमिदानीन्नास्तीति प्रतीतिर्ध्वंसमालंबते भूतत्वं नोल्लि
खति किंचिदन्नास्तीति मात्रोल्लेखिनी प्रत्यक्षप्रतीतिरत्यंताभा
वमालंबते अभूतमित्युपादविनाशानालिंगनं द्योतयति।
अनर्थान्तरत्वमपि तदभिप्रायकमेव यथा जले पृथिवीत्वं
नास्ति पृथिव्यां न जलत्वमिति यदि हि जलावयविनि पृथि
वीत्वं स्यात् दुपलभ्येत न चोपलभ्यते तस्मान्नास्तीति तर्कपु
रस्कारो त्रापि द्रष्टव्यः एवं च यद्वस्तु यत्र न कदापि भविष्यति
न च कदाचिद्भूतं तस्य वस्तुनस्तत्रात्यंताभावो मंतव्यः भूत

प्रतियोग्यनुपलम्भवत् प्रतियोगि
तावच्छेदकानुपलम्भस्याप्यभा
व कारणत्वात् न प्रतियो
गित्वग्रहाधीनो ऽन्योन्याभाव
ग्रहः प्रतियोगित्वं चान्योन्याभाव
विरहत्वं ततश्चान्योन्याभाव
ग्रहाधीन एवान्योन्याभाव
ग्रहः इति चेन्न

भविष्यतोश्च तत्र प्रध्वंसप्रागभावालंबन एव तत्राधिकरणे ना
स्तीति प्रत्ययः अत एवायमात्यंतिकस्त्रैकालिक इत्यभिधीयते
ननु गेहे घटाभावो नात्यंताभावः कदाचित्तत्र घटसत्वात् नापि
प्रागभावप्रध्वंसौ तयोः समवायिकारणमात्रवृत्तित्वा
त् नाप्यन्यत्वादविनाशशीलोत्यंताभाव एव आत्यंतिकश्चेति पाद
विनाशशीलश्चेति विरोधात् नापि चतुर्थ एवायं संसर्गाभावः त
स्य त्रैविध्यविभागव्याघातादित्यत आह ९ नास्ति घटो गेह
इति सतो घटस्य गेहसंसर्गप्रतिषेधः गेहे घटस्य यः संसर्गः सं
योगस्तस्य प्रतिषेधः स च यदि कदाचिदपि न घटसंयोगस्तदात्यं
ताभाव एव भविष्यतः प्रागभावो भूतस्य प्रध्वंसाभावः तर्हि घ
टसंसर्गो गेहे नास्तीति प्रतीत्या भवितव्यमिति चेत् प्रतीत्या भवि
तव्यमिति कोर्थः यदि तद्विषयया प्रतीत्या भवितव्यमित्यापाद
नार्थस्तदेष्टापत्तिः अथ तदुल्लेखिन्येति तदा गेह इत्यधिकर
णोल्लेखस्यैव संसर्गोल्लेखपर्यवसानं आधारत्वस्यैव धर्मसंबंधा
कारत्वात् तत्किं घटस्तत्रास्त्येव अस्त्येवेति कोर्थस्तत्र समवेतः
संयुक्तो वा नाद्यः समवेतघटस्य तत्राभावात् न द्वितीयः संयो
गस्य निषेधात् नन्वेवं घटादीनां केवलान्वयित्वप्रसंगः तत्संयो
गसमवायान्यतरस्यैव सर्वत्र निषेधादिति चेत् न तदुभयनिषेध त्मक
स्यैव घटनिषेधात्मकत्वात् तत् किं घटस्तत्संयोगश्चैकं तत्वं
येन घटसंयोगनिषेधः स्यात् तत्किं घटस्तत्संयोगसमवायावे
कं तत्वं येन तद्विधिरेव घटविधिः स्यात् न द्वितीयो यत्र निषेध्येते
तत्रापि घटान्वयो येन केवलान्वयित्वं तस्य स्यात् तथाचय

स्य यो विधिस्तन्निषेध इति यद्घटस्य समवायितया गेहेऽत्यंताभा
व एव स एव गेहे घटो नास्तीति प्रतीतिविषयः कपाले संयोगित
यैव एवं सति केवलान्वय्यत्यंताभावप्रतियोगितया घटोऽ
सन्स्यादिति चेन्न भवेदेवं यदि संयोगित्वसमवायित्वाभ्यां सर्व
त्रासन्स्यादिति तदेवं भावाभावविषयकं लौकिकप्रत्यक्षं नि
रूप्य योगिप्रत्यक्षं निरूपयितुं प्रकरणांतरमारभते १०
आत्मन्यात्ममनसोः संयोगविशेषादात्मप्रत्यक्षं ज्ञान
मुत्पद्यत इति शेषः द्विविधास्तावद्योगिनः असमाहितां
तःकरणा ये युक्ता इत्यभिधीयंते समाहितांतःकरणाश्च
यो वियुक्त इत्यभिधीयंते तत्र युक्ताः साक्षात्कर्तव्ये वस्तुन्याद
रेण मनो निधाय निदिध्यासनवंतः तेषामात्मनि स्वात्मनि
परात्मनि च ज्ञानमुत्पद्यते आत्मप्रत्यक्षमिति आत्मा प्रत्यक्षः
साक्षात्कारविषयो यस्य ज्ञानेन तत्तथा यद्यप्यस्मदादीनामपि क
दाचिदात्मज्ञानमस्ति तथाप्यविद्यातिरस्कृतत्वात्तदसत्कल्प
मित्युक्तं आत्ममनसोः सन्निकर्षविशेषादिति योगजधर्मानु
नुग्रह आत्ममनसोः सन्निकर्षविशेषस्तस्मादित्यर्थः तत्कि
मात्मन्येव युक्तानां ज्ञानं नतु कुतः सार्वज्ञ्यमित्यत आह ११
तथा द्रव्यांतरेषु प्रत्यक्षं ज्ञानमुत्पद्यत इति प्रकरणायातये
तियोगजधर्मानुगृहीतेनैव मनसा द्रव्यांतरेषु चतुर्ष्वणुषु म
नसि वायुदिक्कालाकाशेषु द्रव्यपदेन तद्गुणकर्मसामा
न्यानां विशेषपदार्थस्य समवायस्य प्रत्यक्षगतस्यापि गुरुत्व
स्थितिस्थापकादेरात्मगतस्यापि जीवनयोनियत्ननिर्विकल्प

कभावनाधर्माधर्मादेः संग्रहः सामग्र्यायोगजधर्मोऽयमस्य तु
त्यत्वात् तु अन्यथा सार्वज्ञमुक्तं न भवेत् मुक्तानां प्रत्यक्षं ज्ञानमभि
धायेदानीं विमुक्तानामाह ॥ १२ ॥ असमाहितांतःकरणा इत्य असमाहितान्तःकरणा उपसंहृतसमाधयस्ते षाञ्च
स्यैव व्याख्यानमुपसंहृतसमाधय इति यद्वा कथमसमाहितांतः
करणा इत्यत आह उपसंहृतसमाधय इति उपसंहृतो दूरीकृ
तः समाधिर्निदिध्यासनात्मको यैस्ते तथा ते हि समाधिप्रभावाद्धिक
रणधर्मा अणिमाद्याः शरीरसिद्धी दूरश्रवणाद्याश्चेंद्रियसिद्धी
प्राप्तवंतः समाधावप्यलंप्रत्ययमासादयंतस्तावदेवास्य चिरं
यावन्निमोक्षे यसंयत्स्यइत्यादिश्रुतिसममधिगतकृत्यांत
राभावः भोगमात्रस्य कर्तव्यतामाकलयन्तेषु तेषु प्रदेशेषु द्वी
पोपद्वीपादिषु तेन तेन जन्मना तुरंगमतंगविहंगभुजंगादिना
प१ देवर्षिरं यावन्मौषिमानुषभावेन च पूर्वोपात्तान्कर्माशयाननुय
भुंक्ष्महे तावत्प्राप्तैव निरपायाभूमिरिति प्याकलयंतः सकल
मर्थजातं योगजधर्मवलोपबृंहितेंद्रियशक्तयो व्यवहितं वि
प्रकृष्टं च प्रत्यक्षीकुर्वन्ति ननु न तावत्तेषुमानसं ज्ञानं मनसो
वहिरस्वातंत्र्यात् नापि वहिरिंद्रियजन्यं तेषां सम्बंधवर्त्तमा
नार्थग्राहित्वात् यथा योगरूपाद्वादिसापेक्षत्वादालोका
दिसव्यपेक्षत्वाच्चेत्याशंक्य केषुचित्पदार्थेषु प्रत्यासत्तिमु
पपादयन्नाह १३ तत्समवायात् कर्मगुणेषु प्रत्यक्षं ज्ञा
नं जायत इति शेषः भौतिकानींद्रियाणि यदि सन्निकर्षमपे
क्षंते तदा परमाकाशादिकालसमवेतेषु गुणसामान्येषु स्व
मनःसंयोगिसमवायात् ज्ञातरद्रव्येषु कायव्यूहोपभोगार्थी

वै०सू०वृ०
१०१
101

परिगृहीतनानापरमाणुमनःसंयोगात्तत्संयुक्तसमवायात्तत्तद्द्व्यणु
णादिषुज्ञानमुत्पद्यते एकैकोपपत्तिसौकर्य्यमनुरुध्योक्तं वा।
स्तुतोवात्येंद्रियेषुमनस्सिचयोगजएवधर्मः प्रत्यासत्तिस्तत
एवसर्वानुपपत्तिशांतेः अगस्त्यसमुद्रपानंदंडकारण्यनि
र्माणंचात्रदृष्टांतः तत्किंस्वकीयबुद्ध्यादिषयिमनसोद्रव्यां
तरसंयुक्तसमवायएवप्रत्यासत्तिर्नेत्याह १४ आत्मसम
वायादात्मगुणेषु योगिनांप्रत्यक्षंज्ञानमुत्पद्यतइतिप्रक्र
तंआत्मसमवेतानांतुबुद्ध्यादीनांसंयुक्तसमवायादेवप्रत्य
क्षंज्ञानमुत्पद्यतेस्मदादीनामिवेतिनतत्रसन्निकर्षांतरापे
क्षेत्यर्थः तत्रेंद्रियार्थसन्निकर्षोत्पन्नमव्यभिचारिज्ञानं
लौकिकप्रत्यक्षंअनुजन्यासाक्षात्त्वजातियोगिज्ञानंप्रत्यक्ष
मितिलौकिकालौकिकसाधारणं इतिश्रीशांकरेवैशेषि
कसूत्रसंस्कारेनवमाध्यायस्याद्यमाह्निकं तदेवंपूर्वाह्नि
केयोगिप्रत्यक्षमयोगिप्रत्यक्षंचकारणतःस्वरूपतोलक्ष
णतश्चनिरूपितमिदानींप्रमाणंद्विविधंप्रत्यक्षंलैंगिकंचेति
यद्विभक्तंतत्रलैंगिकमिदानींनिरूपयितुमुपक्रमते १५
अस्येदंकार्य्यंकारणंसंयोगिविरोधिसमवायिचेतिलैंगिकं ज्ञा
नमितिप्रकृतंलिंगाज्जातंलैंगिकंव्याप्तिविशिष्टःपक्षधर्मो
लिंगंतत्रव्याप्तिरुक्तायत्रसिसाधयिषाविरोधिप्रमाणाभा
वोयत्रसतंप्रतिपक्षः तादृशंप्रमाणंसाधकंबाधकंचतदुभ
याभाववतः पक्षत्वात् नहिसाधकेवाबाधकेवाप्रमाणे
सतिकस्यचित्संशयःसिसाधयिषावाअतएवसंदिग्धसाध्य

तत्सिसाधयिषितताधर्मीधर्मी।

धर्मो धर्मी वा पक्ष इति प्राचः उत्पाद्यसाध्यवत्तानिर्णयनिवर्त्यसंयो
गोऽसत्तिप्रतिबंधकमानत्वावच्छिन्नाभावो यत्र स पक्ष इति जीवना
थमिश्राः सिसाधयिषाविरहसहकृतसाधकमानाभावो यत्र स
पक्ष इति केचित् एतन्मते तु बाधस्थलेपि पक्षतातदेतदनुमान
मयूखेऽन्वेष्टव्यं तदेतस्य पक्षस्य धर्मो लिंगमित्युक्तं भवति लिंगं च दृ
ष्टमनुमितं श्रुतं वा यदनुभवरूपं ज्ञानं जनयति तल्लैंगिकं तदुक्तं
अनुमेयेन सम्बद्धं प्रसिद्धं च तदन्विते तदभावे च नास्त्येव तल्लिंगम
नुमापकमिति एतेन लिंगमेवानुमितिकरणं न तु तस्य पराम
र्षः तस्य निर्व्यापारत्वेनाकरणत्वात् लिंगस्य तु स एव व्यापारः य
त्र धूमादेरतीतत्वमनागतत्वं वा तत्र कथमनुमितिचेत् न· सा
ध्यस्याप्यतीतानागतत्वयोस्तत्रानुमानात् तत्रैव प्रतिबंधात्
अतीतत्वमनागतत्वं वर्त्तमानत्वं च धूमादेर्यत्र न निश्चितं तत्र क
थमनुमितिरिति चेत् न कथंचित् तत्र साध्यस्यापि संदेहात् पू
र्वापरदिनयोः सत्त्वनिश्चये मध्यदिने तु संदेहे कथमनुमिति
रिति चेत् तद्दिनावच्छिन्नधूमादिना तद्दिनावच्छिन्नवह्न्यादेरे
वानुमानात् तथैव व्याप्तेः कारणत्वावधारणात् धूलीपटला
त् कथं धूमभ्रमादनुमितिरिति चेत् व्याप्तत्वेन ज्ञातस्यैव लिं
गत्वात् ज्ञानस्य च स्वचयायोर्थ्याभ्यामनुमितेस्ताद्रूप्यात् अ
न्यथा तथापि कथं तत्र परामर्षः करणं स्यात् अतीन्द्रियलिंग
स्थलेपरामर्षस्य तदजन्यत्वात् कथं तद्व्यापारत्वमिति चेत् का
र्यात् लिंगाद्यालोकादेरन्याद्यनुमाने कारणादपि यथा व
धिरस्य भेरीदंडसंयोगविशेषात् शब्दानुमानं यथा वा धार्मि

नैतत्सज्ज्ञानिनीहकव
स्यदैशिकसाधारणतायास्त
त्र व्यापारत्वघटकत्वात् अ
न्यथासमवायस्यश्रवणदेर्व्याप
रम्यानुपपत्तेरिति

स्य यथाविधियागस्नानाद्यनुष्ठानाद्धर्मस्वर्गाद्यनुमानं यथा
विधिकारीर्य्याद्यनुष्ठानाद्वृष्ट्यनुमानं पयःपूर्णनद्यादेरुव
न्यमानप्रवाहाद्वाजलनिःसरणानुमानं उपरि वृष्टिदर्शना
द्वानदीवृद्ध्यनुमानं स चायं कार्य्यकारणभावलक्षण एक एव सं
वंधः प्रकारद्वयेनोक्तः संयोगिनः शरीरस्पर्शेनात्वगिंद्रि
यानुमानं विरोधिनो विस्फुर्जतोऽहेर्गेनाच्छादितयंतरितनकु
लानुमानं समवायिना जलौष्ण्येन तत्र संवद्धतेजोनुमानं न
नुव्यापकमिदं परिसंख्यानं नहि चंद्रोदयेन समुद्रे जलवृद्धेर्ज
लप्रसादेनागस्त्योदयस्य कुमुदप्रकाशेन चंद्रोदयस्य चतु
र्द्दशनक्षत्रोदयेनापरचतुर्द्दशनक्षत्रास्तमयस्य रसेन रू
पस्य रूपविशेषेण वा रसविशेषस्यानुमानमनेन न संगृह्यत
इत्यत आह   अस्येदं कार्य्यं कार्य्यकारणसंबंधश्चावयवाद्भ
वति   अस्येदमित्येतावदेव प्रयोजकं भवति स्यस्य धूमादेरिदं
साध्यं वह्न्यादि यद्वास्य व्यापकस्य वह्न्यादेरिदं व्याप्यं धूमा
दि तथा च व्याप्यत्वग्रहमात्रं तंत्रं नैन्तु कार्य्यकारणभावादिर
पि न तु पूर्वसूत्रे हि परिसंख्यानमतं क्रमत आह कार्य्यकारण
संवंध इति अनेन चोक्तं संवंधांतरमप्युपलक्षयति संवंधप
दे च विषयिलक्षणा तेन संवंध इति संवंधोपन्यास इत्यर्थः कु
तस्तदुपन्यास इत्यत आह अवयवादेकादशादुदाहरण
मात्रात्पञ्चायेपंचमीति नोदाहरणमनुरुद्ध्य कार्य्यकारण
भावादेः संवंधस्योपन्यास इह दर्शने सांख्यादिदर्शने च भव
तीत्यर्थः एवं च स्वाभाविकसंवंधशालित्वं व्याप्यत्वं स्वाभावि

कत्वंचानोपाधिकत्वंतच्चप्रत्यक्षाकेषांचित्साध्याव्यापकत्वं केषां
चित्साधनव्यापकत्वनिश्चयादेवानुपाधित्वंज्ञेयमतीन्द्रियाणांच
प्रमाणसिद्धानांकेषांचिदुभयव्यापकत्वमुभयाव्यापकत्वंसाध
नमात्रव्यापकत्वंवातत्राद्येसाधनव्यापकत्वाद्द्वितीयेसाध्याव्या
पकत्वात्ततृतीयेपिसाधनव्यापकत्वादेवानुपाधित्वंनिश्चेयंतती
येपिव्यापकस्यतन्मात्रव्यापकत्वानुपाधिलक्षणंव्याप्तिलक्षणं
चोक्तंतच्चानुमानंद्विविधंस्वार्थंपरार्थंचतत्रस्वार्थंपरमेवव्याप्ति
पक्षधर्मतयोरनुसंधानात् परार्थंचपरोदीरितन्यायजन्य।
व्याप्तिपक्षधर्मताज्ञानात् न्यायश्चतृतीयलिंगपरामर्षप्रयो
जकशाब्दज्ञानजनकंवाक्यंतदवयवाश्चपंच [illegible] तत्रा
वयवत्वंतृतीयलिंगपरामर्षप्रयोजकशाब्दज्ञानजनकशाब्द
ज्ञानजनकवाक्यत्वंतानिचवाक्यानिप्रतिज्ञाहेतूदाहरणो
पनयनिगमनानितत्रप्रतिज्ञाउद्देश्यानुमित्यन्यूनानतिरिक्त
विषयकशाब्दज्ञानजनकंन्यायावयववाक्यंहेतुश्चप्रकृतसा
धनगतपंचम्यंतोन्यायावयवः उदाहरणंतुप्रकृतसाध्यसा
धनाविनाभावप्रतिपादकोन्यायावयवः उपनयश्चाविना
भावविशिष्टस्यहेतोः पक्षवैशिष्ट्यप्रतिपादकोन्यायावयवः
निगमनंतुपक्षेप्रकृतसाध्यवैशिष्ट्यप्रतिपादकोन्यायावय
वः एवंचप्रवर्त्तते न्यायः शब्दोऽनित्यः कृतकत्वात् यद्यत्कृ
तकंतदनित्यंअनित्यत्वव्याप्यकृतकत्ववांश्चायंतस्मादनि
त्यः एतेषामेवप्रतिज्ञापदेशनिदर्शनानुसंधानप्रत्याम्ना
याइत्ययावैशेषिकानांसंज्ञा अत्रचवादजल्पवितंडानांप्रवृ

वै०स०वृ०
१०३
103

तिप्रकारश्छलजातिनिग्रहस्थानलक्षणानिचवादिविनोदे
न्वेष्टव्यानि प्रमेयांतराणिलैंगिकेंतर्भावयितुंप्रकरणांतरमा
रभते ९६ एतेनशाब्दंव्याख्यातं शाब्दंशब्दकरणकंज्ञानमि
दमितियन्नैयायिकादीनामभिमतंतदप्येतेनलैंगिकत्वेनलिं
गप्रवृत्ते नैवव्याख्यातंयथाव्याप्तिपक्षधर्मताप्रतिसंधानापेक्षं
लैंगिकंतथाशाब्दमपितथाहि एते पदार्थामिथःसंसर्गवंतःआ
कांक्षादिमद्भिःस्मारितत्वात् गमिभ्याजेतिपदार्थसार्थवत् तत्र
हिआकांक्षादिमत्पदकदम्बस्मारितत्वंपदार्थानांमिथःसंसर्ग
वत्वव्याप्यंगृहीत्वैवसंसर्गवत्वमनुमिनोतिकिंकल्पनीयप्रमा
णभावेनशाब्देनननुनदीतीरेपंचफलानिसंतीत्याद्यनाप्तवा
क्यव्यभिचारान्नेदमनुमानमितिचेत् नआप्तोक्तत्वेनापिवि
शेषणात् आप्तत्वंहिप्रकृतवाक्यार्थगोचरयथार्थज्ञानवत्वं
नतुप्रकारकत्वमात्रंतच्चवाक्यार्थप्रतीतेःपूर्वंदुर्ग्रहमितिचेत्
नशब्दप्रामाण्यवादिभिरप्यव्यभिचारिशब्दव्यावर्तकस्या
प्तोक्तत्वस्यग्राह्यत्वेनाभिमतत्वात्तेषांप्रामाण्यग्रहणार्थं
तदपेक्षाशाब्दंतुज्ञानंतद्ग्रहमंतरेणाप्युपपद्यतेतत्वतुयाद
शंलिंगंतादृशग्रहणमावश्यकंव्याप्यत्वात्तोक्तत्वविशिष्टमि
तिचेत् नअयमत्राभ्रांतइतिसामान्यतोग्रहणसंभवात् न
न्वत्रेतिप्रकृतसंसर्गइत्येवपर्यवस्यतितथाचपूर्वमशक्य
मेवतद्ग्रहणमितिचेत् नप्रकरणसमभिव्याहारादिमाहा
त्म्यात् सामान्यतआप्तत्वनिश्चयसंभवेनलिंगनिश्चयसंभ
वात् कदाचित्तत्रविषमव्यादेपिवाष्पादौधूमभ्रमेणवानुमा

नप्रवृत्तेः नन्वेते पदार्थाः संसृष्टा एवेति वा साध्यं संभावितसंस
र्गा इति वा नाद्यः अनाप्तोक्ते व्यभिचारात् न द्वितीयः योग्यतामा
त्रसिद्धावपि संसर्गानिश्चयात् निश्चयस्य प्रवृत्त्यनुपपत्तेः योग्यता
याश्च पूर्वमेव हेतुविशेषणत्वेन ज्ञातत्वात् किमनुमानेनेति
चेत् न नियमस्यैव साध्यत्वात् आप्तोक्तत्वेन विशेषणाच्च न व्य
भिचार इत्युक्तत्वात् नन्वाकांक्षा श्रोतरि तद्धेतुसाध्यसंसर्गाव
गमप्रागभावः स च स्वरूपसन्नेव हेतुः तज्ज्ञाने च संसर्गज्ञानस्य
पूर्वमेव भावादनुमानवैयर्थ्यमिति चेत् न नहि संसर्गप्रागभाव
मात्रमाकांक्षां ब्रूमः किं तर्हि स्मारिततदाक्षिप्ताविनाभावविशि
ष्टं तथा च विशेषणांशज्ञानादेवाकांक्षाया ज्ञानात् तर्हि ताव
देवाकांक्षास्त्विति चेत् न विमलं जलं नद्याः कच्छे महिषश्चरती
त्यत्रापि नदीकच्छयोरविनाभावसत्त्वेनान्वयबोधापत्तेः नीलमु
त्पलमित्यत्र नीलोत्पलयोरविनाभावाभावेपि तदाक्षिप्तयोर्द्र
व्यगुणयोरविनाभावसंभवात् यद्वा पदस्मारितगोचरजिज्ञासै
वाकांक्षा अभिधानापर्यवसानं वा तथापि तज्ज्ञानमावश्य
कं ज्ञायमानकरणे ज्ञानोपयुक्तव्यभिचारिवैलक्षण्यात् व्या
प्तिवत् अत एवानन्वयनिश्चयविरहो वा बाधकप्रमाणाभा
वो वा सजातीये दर्शनं वा इतरपदार्थसंसर्गे परपदार्थनिश्च
यत्ताभावाप्रतियोगिप्रमाविशेष्यत्वं वा योग्यतास्तु तज्ज्ञानमा
वश्यकं आसत्तेरप्यव्यवधानेन पदार्थस्मरणरूपाया ज्ञा
नं तत्र संसर्गे च संसृज्यमानविशेषादेव विशेष इति नानभिम
तविशेषसिद्धिः यद्वा एतानि पदानि स्मारितार्थसंसर्गज्ञानपू

वेकाणि आकांक्षायोग्यतासत्तिमत्पदकदम्बत्वात् गामभ्या
जेति पदकदम्बवदित्यनुमानाज्ज्ञानावच्छेदकतयाभिमतवि
शेषसिद्धिः यत्तु एतानि पदानि स्मारितार्थसंसर्गवंतसाध्यंत
सदानांपदार्थसंसर्गवत्त्वंबाधितमित्युपेक्षणीयं नच लि
गतया संसर्गज्ञापकत्वमेव पदानां संसर्गवत्त्वं तस्यानुमाना
त्पूर्वमसिद्धत्वेन व्याप्त्यग्रहात् केचित्तु चेष्टाप्रमाणांतरमि
ति वदंति तन्नोच्यते चेष्टा द्विविधा कृतसमयाऽकृतसमया च त
त्र कृतसमयाऽभिप्रायसंशब्दं स्मारयति न तु संसर्गप्रमामपि ज
नयति लिपिवत् स्मृत्यारूढः शब्द एव तत्र प्रमाणं शब्दस्य
च लिंगत्वमुक्तं न च शब्दस्मरणं चेष्टाया अवांतरव्यापारः चे
ष्टामंतरेणापि शब्दादर्थप्रत्ययात् व्यापारत्वे तु चेष्टानैयत्या
पत्तेः नन्वेवं कथमेडमूकस्य चेष्टाधीनो व्यवहारः तस्य त
त्र समयग्रहाभावादिति चेत् न तस्य चेष्टातः कथमर्थेऽपि सं
प्रत्यय इतीति चिंतनीयत्वात् तस्यार्थेऽपि संगतिग्रहाभावात्
व्यवहारस्तु तस्याविनाभावग्रहात् करितुरगयोरिव कशां
कुशाभिघातात्तत्तद्व्यवहारपाटवोपपत्तेः अकृतसमया त
याकृत्यनुयायिनी सा प्रयोजकाभिप्रायं स्मारयंती प्रयोज्यं प्रव
र्तयति न तु कुत्रचित्प्रमां जनयति यथा शंखध्वनौ त्वया गंतव्य
मिति कृतशंखध्वनिः प्रतिष्ठते न यायदा मया तर्जन्यूर्ध्वीक्रि
यते तदा त्वया सो ताडनीय इति तदा ताडयति परं न तु किं
चित्प्रमिणोति तु स अनुयायिनी त्वकृतसमया यथा दशानामंगुली
नामूर्ध्वीकरणे न दशसंख्यामुद्राणां पुराणानां वा त्वयाज्ञा

तव्येतिकारकप्रधानाद्धस्ताकुंचनदर्शनात्वयासमागंतव्यमिति
क्रियाप्रधानात्तथाचानयाचेष्टयापदार्थाएवस्वतंत्राः परं स्मा
र्य्यंतेनतुतेषांपरस्परमन्वयोपिवोध्यतेतद्बोधककर्तृकर्मादि
विभक्तिवत् प्रकृतेचेष्टैकदेशानांनियतानामभावात् तर्हिसं
सर्गवोधमंतरेणचेष्टातःकथंप्रवृत्तिनिवृत्तीइतिचेत् संशयप्र
तिभायावन्यतस्मादितिगृहाणतस्मान्नचेष्टापिप्रमाणमिति न
नुशब्दःकथंलिंगंशब्दस्यापदेशस्वभावत्वेनलिंगभिन्नत्वादि
त्याशंक्याह ७ हेतुरपदेशोलिंगंप्रमाणंकरणमित्यनर्थां
तरं अपदिश्यतेकथ्यतेननार्थइत्यपदेशः शब्दःसचहेतु
लिंगपर्य्यायएवप्रमाणमितिलिंगविधयाप्रमाकरणमित्यर्थः
एवंकरणशब्दोपिलैंगिकज्ञानकरणेलिंगएववर्त्ततेतयोर्हि
प्रकरणगतिःकिंचित्सन्निकर्षाधीनप्रवृत्तिकिंचिच्चाविना
भावबलप्रवृत्तिशब्दस्यत्वर्थेनसन्निकर्षोनाप्यविनाभावइति
कथमर्थंगमयेत् संकेतात्गमयतीतिचेत् संकेतोहिपदार्थेनतु
तत्संसर्गेतत्रापिसंकेतइतिचेन्नतस्यानेकविधत्वेनसंकेतविष
यभावानुपपत्तेः पदार्थसंकेतवलादेवाक्यार्थोपिभासतइ
तिचेत् न· अन्यसंकेतेनान्योपस्थितावतिप्रसंगात् शब्द
स्मारितसंसर्गत्वेननियमइतिचेत्तथाचेतन्नियमवलेनानु
मानस्यैवलब्धावसरत्वात् संकेतस्यापीच्छामात्रत्वेनातिप्रसक्त
त्वात् ईश्वरेच्छानातिप्रसक्तेतिचेत् नतदिच्छामंतरेणापिगं
गादिपदात्तीरएद्युपस्थितेरित्यलंनैयायिकेषु धृष्टतयेति
उपमानादीनामपिपराभिमतानामविनाभाववलप्रवृत्तिका

नांलैंगिकएवांतर्भावइति प्रतिपादयितुमाह १९ अस्ये
दमितिबुद्ध्यपेक्षितत्वात् उपमानार्थापत्तिसंभवाभावाना
मितिशेषः तस्यव्यापकस्येदंव्याप्यमित्याकारयाबुद्धिः सा
जनकत्वेनापेक्षितायेषांतेतदपेक्षितास्तस्यभावस्तदपेक्षि
तत्वंतस्मादित्यर्थः आहिताग्निपाठात् क्तांतेनबहुव्रीहिः
तारकादिपाठादिष्ट्वा तत्रोपमानंतावदनुमानमेवशब्द
द्वारातथाहिगोसदृशोगवयइतिवाक्यंतावदारण्यकेणकी
दृग्गवयइतिनागरकजिज्ञासायमभिधीयतेतुत्रयोगोसदृ
शः गवयशब्दवाच्यइतिसामानाधिकरण्यबलादतिदेति
शवाक्यश्रवणमनंतरमेवपरिच्छिनत्तिवनंगतस्तुतादृशंपिंड
मुपलभ्यायमसौगवयवाच्यइतिप्रतिसंधत्ते अतिदेशवाक्यश्र
वणसमयेगवयत्वंप्रवृत्तिनिमित्तंनज्ञानमतःकथंसंज्ञापरिच्छे
दइतिचेत् लक्षणयातत्प्रतीतिसंभवात् गोसदृशोगवयइति
वाक्येन्वयानुपपत्तिविरहात् कथंलक्षणेतिचेत् तात्पर्या
नुपपत्तेः सत्वात् नहिश्रुतपित्वंप्रतिगोसादृश्यस्यसर्वज्ञस्य
प्रवृत्तिनिमित्तत्वेनोपदर्शनमुचितंतस्मादखंडजातिविशेषे
तात्पर्यमस्येतिलक्षणासंभवात् यद्वागवयशब्दोगवयवाच
कः असतिवृत्त्यंतरेशिष्टैस्तत्रप्रयुज्यमानत्वात् असतिवृत्त्यं
तरेयः शब्दोयत्रशिष्टैः प्रयुज्यतेसतस्यवाचकोयथागोश
ब्दोगोरित्यनुमानादेवगवयसंज्ञापरिच्छिन्नत्तिः तर्कश्चाय
स्त्वयोपमानसहकारीवाच्यः सवरमनुमानेकल्प्यप्रमाण
भावेऽस्तु किंकल्पनीयप्रमाणभावेनोपमानेनेति अनुमा

नभयात्स्वेविस्तरोत्रान्नेष्टव्यः अर्थापत्तिरप्यनुमानमेवतथाहिदृ
ष्टार्थापत्तिस्तावज्जीवतश्चैत्रस्यगृहासत्त्वेनदृढतरप्रमाणावधृ
तेननवहिःसत्त्वंकल्पयंतितत्रोपपाद्योपपादकयोर्व्याप्यव्या
पकभावावधारणाधीनेववहिःसत्त्वप्रतीतिःभवतिहिजीवतो
गृहासत्त्वंवहिःसत्त्वेनसहचरितंवहिःसत्त्वंविनाजीवतोगृहासत्त्व
मनुपपन्नमितिवाह्यानंतत्राद्येन्वयव्याप्तिरेवांसेतुव्यतिरिक्तव्या
प्तेरेवग्रहइतिव्याप्तिरस्तिनतस्याग्रहणमिहोपयुज्यतइतिचे
न्नव्याप्तिग्रहमंतरेणार्थापत्त्योभासानवकाशात्स्वरूपसत्या
व्याप्त्यावक्तृत्वेयदुपपादकंतस्यैवकल्पनास्यादितिदिक् संश
यकरणिकायाविरोधकरणिकायाश्चानुमानांतर्भावऊहनी
यःविरोधस्यापिसहानवस्थाननियमलक्षणस्यव्याप्तिघटि
तत्वात् श्रुतार्थापत्तिरप्यनुमितानुमानंपीनोदेवदत्तोदिवा
नभुंक्तेइत्यनेनवाक्येनपीनत्वमनुमितंतेनचपीनत्वेनरात्रिभो
जनानुमानंदेवदत्तोरात्रौभुंक्तेदिवाऽभोजित्वेसतिपीनत्वान्म
तवदिति संभवोप्यनुमानमेव तदुदाहारणंहिभवतिखार्यां
द्रोणःसंभवतिद्रोणेआढकंसंभवतिसहस्रेशतमित्यादितत्र
यंखारीद्रोणवतीतद्घटितत्वात्यद्येनघटितंततत्तेनतद्वत्तय
थावयववान्घटःएवमन्यदप्यूह्यंयत्तुसंभवतिब्राह्मणेवि
द्यासंभवतिक्षत्रियेशौर्य्यमित्यादितत्प्रमाणमेवनभवतिअनि।
श्चायकत्वात् अभावोपिनमानांतरंकार्येणकारणानुमान
वत्कार्य्याभावेनकारणाभावानुमानस्याव्याप्तिमूलकत्वेनानु
मानांतर्भावात् भट्टमतंतुभूतलादावभावग्राहकंप्रमाण

मनुपलंभाख्यं तत् क्वचित्प्रत्यक्षे क्वचिच्चानुमानान्तर्भूतं च क्षुरा
दिनैवाभावग्रहात् न चेंद्रियमधिकरणग्रहणएवोपक्षीणं अ
भावग्रहपर्य्यन्तं तद्व्यापारसत्वात् ऐतिह्यमविज्ञातप्रवक्तृ
कं प्रवादपारंपर्य्यमितिहेतिनिपातसमुदायः पराद्वृत्ते वर्त्तते
तस्य भाव ऐतिह्यं तद्यदि वाधितार्थं न भवति तदा शब्दान्तर्निवे
शादनुमानं यदि तु वटेवटे यक्षो मधूकतले गौरीत्यादि तद्यथा
प्तोक्तं तदाप्यपूर्ववदनाप्तोक्तं चेत्तदा न प्रमाणं तदेवं प्रत्यक्षमनु
मानं चेति सिद्धं द्वयमेव प्रमाणमिति लैंगिकं व्याख्यायेदानीं
प्रकरणान्तरमारभते १९ आत्ममनसोः संयोगविशेषात्
संस्काराच्च स्मृतिः ६ उत्पद्यत इति शेषः संयोगविशेषः प्रणिधा
नादिसन्निधानं एतस्मादसमवायिकारणादात्मनि समवायि
नि स्मृतिर्विद्याविशेष उत्पद्यते निमित्तकारणमाह संस्कारा
दिति चकारेण व्यापारी पूर्वानुभवः समुच्चीयते अनुभवया
थार्थ्यायाथार्थ्यमियमनुविधत्ते रज्जुभुजंगतयोपलभ्यपला
यितस्य तथैव स्मृतेः न च सततं स्मृतिप्रसंगः संस्कारोद्बोधाधी
नत्वात् तदुक्तं प्रशस्तदेवपादैः लिंगदर्शनेच्छानुस्मरणाद्यपे
क्षादात्ममनसोः संयोगविशेषात् पट्वभ्यासादरप्रत्ययज
निताच्च संस्काराद्दृष्टश्रुतानुभूतेषु शेषार्थव्यवसायस्मरणे
च्छाद्वेषहेतुरतीतविषया स्मृतिरिति आर्षं ज्ञानं सूत्रकृता
पृथक् न लक्षितं योगिप्रत्यक्षेन्तर्भावितं परार्थप्रदेशाख्ये तु
प्रकरणे तदुक्तं तद्यथा आम्नायविधातॄणामृषीणामती
तानागतवर्त्तमानेष्वतीन्द्रियेष्वर्थेषु धर्मादिषु ग्रन्थोपनिबद्धे

श्रुतलिंगाद्यनपेक्षादात्ममनसोः संयोगाद्धर्म्मविशेषाच्चप्रा
तिभंज्ञानंयदुत्पद्यतेतदार्षमितितच्चकदाचिल्लौकिकानामपि
भवतियथाकन्यकावदतिश्वोमेभ्राताआगंतेतिहृदयंमेकथयती
ति तदेवंचतुर्विधांविद्यांव्युत्पाद्येदानीमविद्यांव्युत्पादयितुम
हमितत्रसंशयविपर्य्ययौप्रसंगात्पूर्वमेवनिरूपितौस्वप्ननिरूप
यितुमाह २० तथास्वप्नः यथात्ममनसोः संयोगविशेषा
त्संस्काराच्चस्मृतिस्तथास्वप्नज्ञानमपीत्यर्थः उपरतेंद्रियग्राम
स्यप्रलीनमनस्कस्येंद्रियद्वारेणेवयदनुभवनंमानसंतत्स्वप्न
ज्ञानंतच्चत्रिविधंकिंचित्संस्कारपाटवात् कामीक्रुद्धोवायमर्थमाद
तश्चिंतयन्स्वपितितस्यमेवस्यायांप्रत्यक्षाकारंज्ञानंपुराणादि
श्रवणजनितसंस्कारवशाज्जायतेकर्णार्जुनीयंयुद्धमिसाका
रंकिंचिद्धातूनांवातपित्तश्लेष्मणांदोषात् तत्रवातदोषादा
काशगमनवसुंधरापर्य्यटनव्याघ्रादिभयपलायनादीनिपश्य
तिपित्तोपचयदोषमहिम्नावह्निप्रवेशवह्निज्वालालिंगनकन
कपर्वतविद्युल्लताविस्फुरणादिग्दाहादिकंपश्यतिश्लेष्मदोष
प्राबल्यात्तुसमुद्रसंतरणनदीमज्जनधारासारवर्षणरजतपर्व
तादिपश्यतिअदृष्टवशादपितज्जन्मानुभूतेषुजन्मांतरानु
प्रसिद्धेषु वा
५ भूतेवासिद्धेपिवस्तुतास्करणस्यज्ञानमुत्पद्यतेतत्रशुभावे
दकंधर्मात् गजारोहणपर्वतारोहणछत्रलाभपायसभक्षण
राजसंदर्शनादिविषयकंअधर्मात्तुतैलाभ्यंजनांधकूपपत
नोष्ट्रारोहणपंकमज्जनस्वविवाहदर्शनादिविषयकंस्वप्नज्ञा
नमुत्पद्यतेतत्रायांमिलितानामेवानकारणत्वंगुणप्रधानं
याणां

वै० सू० वृ०
१०७
107

भावमाश्रित्यायं विभागो द्रष्टव्यः ननु यज्ज्ञानं स्वप्नज्ञानानुभूत
स्यैव स्मृतिरूपं जायते तत्र स्वप्नत्वं न वर्त्तते स्वप्नस्यानुभ
वरूपत्वात्तथा च कस्मात्कारणात्तदुत्पत्तिरित्यत आह २१
स्वप्नान्तिकं तथेति पूर्वसूत्रादनुवर्त्तते तेनात्ममनसोः सं
योगविशेषात् संस्काराच्च यथा स्वप्नस्तथा स्वप्नान्तिकमपीत्य
र्थः एतावानेव विशेषो यत्स्वप्नज्ञानं पूर्वानुभवजनितात् सं
स्कारात् स्वप्नान्तिकन्तु तत्कालोत्पन्नानुभवजनितसंस्कारा
देव तदुक्तं प्रशस्तदेवाचार्य्यैः अतीतज्ञानप्रत्यवेक्षणात्
स्मृतिरेवेति उक्तं च वृत्तिकारैः अनुभूतवस्तुस्फुरणार्थं तथा
न स्मरणादर्थान्तरं स्वप्नज्ञानमिति स्वप्नमध्ये प्रमाणमनुभूतं यज्ज्ञा
नं तत्स्वप्नान्तिकमित्यपि केचित् यथा शय्यायां शयानो
ऽस्मीत्यादि स्वप्नस्वप्नान्तिकयोः कारणं समुच्चिनोति २२ ध
र्माच्च अधर्मसमुच्चयार्थश्चकारः कृतव्याख्यानमेतत्
इदानीं विपर्य्ययमधिकृत्याह २३ इन्द्रियदोषात् संस्कारदो
षाच्चाविद्या अविद्येति सामान्यवाच्यपि यदं विपर्य्यये वर्त्ते
ते प्रकरणात् संशयस्वप्नानध्यवसायानामुक्तत्वात् तत्रेन्द्रि
यदोषो वातपित्ताद्यभिभवकृतमपाटवं संस्कारदोषो विशे
षादर्शनसाहित्यं तदधीनं हि मिथ्याज्ञानं जायते अविद्या
सामान्यलक्षणमाह १४ तद्दुष्टज्ञानं तदिति सव्ययपदं
सर्वनामसमानार्थमविद्यां परामृशति साविद्या दुष्टज्ञा
नं व्यभिचारि ज्ञानं अतस्मिंस्तदिति ज्ञानं व्यधिकरणप्रकार
वच्छिन्नं विशेष्यावृत्तिप्रकारकमिति यावत् दोषश्च ज्ञान

स्यानिश्चयरूपत्वमपि तेनैककोटिसत्वेपि संशयो दुष्टत्वानव
धारणात्मकत्वात् तदनेन संशयविपर्य्ययस्वप्नानध्यवसाया
नां चतुर्णामप्युपग्रहः २५ अदुष्टं विद्या ज्ञानमित्यनुवर्त्तते
अदुष्टमदुष्टेन्द्रियजन्यं यत्र यदस्ति तत्र तदनुभवो वा समानाधि
करणप्रकारानुभवो वा विशेष्यत्वसप्रकारकानुभवो विद्येत्यर्थः
तच्चाध्यक्षं लैङ्गिकं च द्वयमेव नन्वार्षमपि ज्ञानं समानाधिक
रणप्रकारकमेव तच्च नेन्द्रियजन्यं सन्निकृष्टार्थगोचरत्वात् न लैं
गिकं लिङ्गानुसंधानमन्तरेणजायमानत्वात्तथा च तत्करणं तृती
यं प्रमाणमायामत आह २६ आर्षं सिद्धदर्शनं च धर्मेभ्यः
ऋषीणां गालवप्रभृतीनां यदतीतानागतविषयकं ज्ञानं त
दार्षं यच्च सिद्धानां मन्त्रौषधिगुटिकाञ्जनादिना व्यवहितवि
प्रकृष्टार्थगोचरं ज्ञानं प्रतिसिद्धिं गतानां यद्दर्शनं तदुकभ
यं धर्मेभ्योऽप्ययथार्थसाक्षात्कारि ज्ञानं जायते तद्योगिप्रत्यक्षेऽ
न्तर्भावान्न विद्यान्तरमिति वृत्तिकृतः आर्षज्ञानं चतुर्थी विद्ये
वसा च ऋषीणां लौकिकानां च भवति तच्च मानसं प्रत्यक्षमेवो स्ये
ष्टासहकृतेन मनसा जनितं नियमसन्दर्शनादिलिङ्गजनित
मा प्राग्भवीयसंस्काराधीनैवात्र व्याप्तिधीस्तनपाने इष्टसाध
नाव्याप्तिग्रहवत् प्रभास्तत्राचार्याः सिद्धदर्शनं न ज्ञानान्तरमि
त्याहुः तथाहि यदि सिद्धानां गुटिकाञ्जनादिसिद्धनिमित्त
प्रभवं व्यवहितविप्रकृष्टविषयं तदुत्पन्नेतदा प्रत्यक्षमेव य
दि तु दिव्यान्तरिक्षभौमानां ग्रहनक्षत्रसञ्चारादिनिमित्ताधी
नं तदा तल्लैङ्गिकमेव तथा सहचारदर्शने व्याप्तिपरिच्छेदादि

त्ति २७ इतिमिश्रश्रीशङ्करकृतेवैशेषिकसूत्रोपसंस्कारेन
वमोऽध्यायः॥ ९ ॥ आत्मगुणानांकारणतोभेदव्युत्पादनं द
शममाध्यायार्थः तत्रात्मशरीरेन्द्रियार्थबुद्धिमनःप्रवृत्तिदो
षप्रेत्यभावफलदुःखापवर्गात्मकप्रमेयमितिगौतमीयेप्रमे
यविभागसूत्रेसुखस्यानभिधानाद्दुःखाभिन्नमेवसुखमिति
भ्रमनिरासार्थंसुखदुःखयोरेवधर्मभेदमाह १ इष्टानिष्टका
रणविशेषाद्विरोधाच्चमिथःसुखदुःखयोरर्थान्तरभावः सु
खदुःखयोर्मिथःपरस्परमर्थान्तरभावोभेदोवैजात्यमिति
यावत्कुतइत्यतआहइष्टकारणविशेषात् इष्टमिष्यमाणं
स्रक्चन्दनवनितादि अनिष्टमनिष्यमाणमहिकण्टकादि
तद्रूपंयत्कारणंतस्यविशेषाद्वैषाद्वैदात्कारणवैजात्याधी
नंकार्य्येवैजात्यमावश्यकंयतःभेदकान्तरमाहविरोधात्
सहानवस्थानलक्षणाऽनत्वेकस्मिन्नात्मन्येकदासुखदुःखयो
रनुभवः चकारादनयोःकार्य्यभेदं भेदकंसमुच्चिनोतित
थाहिअनुग्रहाभिष्वङ्गनयनादिप्रसादःसुखस्यदैन्यमु
खमालिन्यादिदुःखस्यकार्य्यमितिततोप्यनयोर्भेदःतदुक्तं
प्रशस्तपादैः अनुग्रहलक्षणंसुखंस्रगाद्यभिप्रेतविषयसा
न्निध्येसतीष्टोपलब्धीन्द्रियार्थसन्निकर्षाद्यपेक्षादात्ममनसोः
संयोगाद्यदनुग्रहाभिष्वङ्गनयनादिप्रसादजनकमुत्पद्य
तेतत्सुखमितितदिदमतीतेषुस्रक्चन्दनादिषुस्मृतिजम
नागतेषुसंकल्पजंगौतमीयेसूत्रेसुखापरिगणनंवैराग्याय
सुखमपिदुःखत्वेनभावयतोवैराग्यंस्यादेतदर्थमितिननु

ञा त्वांसुखदुःखेपरस्परंभिन्नेज्ञानादभिन्नेस्यातांस्मृत्यनुभववदि
त्यतआह २ संशयनिर्णयांतर्भावश्चज्ञानानांत्वेहेतुः सु
खदुःखयोर्ज्ञानांतस्त्वेज्ञानानभिन्नत्वेसंशयनिर्णयान्तर्भा
वःसंशयनिर्णयास्वान्तर्नत्वाभावाहेतुर्लिङ्गमित्यर्थः तद
यमर्थः सुखंदुःखंवाज्ञानंभवत्संशयरूपंवास्यान्निर्णयरू
पंवानाद्यःकोटिद्वयानुल्लेखित्वात् नद्वितीयः एककोट्यनुल्ले
खित्वात् तथाचयावद्विशेषवाधात्सामान्यवाधः द्वारेवहिर्ज्ञा
नत्वस्यविशेषोसंशयत्वनिर्णयत्वंचतदुभयंचसुखदुःखेचवा
धितमितिज्ञानत्वमपितत्रवाधितंचकानारनुभववाधंसमु
च्चिनोतिसुखदुःखयोरहंसुखीदुःखीतिमानसोनुभवोनत्व
त्रि हंजानेसंदिग्धेनिश्चिनोमीत्याकारोनुभवइति भेदकांतर
माह ३ तयोर्निष्पत्तिः प्रत्यक्षलैंगिकाभ्यांतयोःसंशयनि
र्णययोर्निष्पत्तिरुत्पत्तिः प्रत्यक्षाल्लिंगाच्चसुखंदुःखंवानप्रत्य
क्षसामग्रीजन्यंनवालिंगजन्यंचतुर्विधंसुखंवैषयिकंमानो
रथिकमाभिमानिकमाभ्यासिकंचतत्रत्रयाणामिंद्रियार्थस
न्निकर्षप्रभवत्वंनास्त्येवप्रथममिंद्रियार्थसन्निकर्षजत्वात्
ज्ञानंस्यादितिचेत् नसामग्र्येकदेशस्यकार्य्यस्यसाजात्याना
पादकत्वात् अन्यथादिक्कालादिसाधारण्येनसकलकार्य्यै
कजात्यापत्तेःकिंचेन्द्रियार्थसन्निकर्षादुत्पद्यमानंसुखंनिर्वि
कल्पकंवास्यात् सविकल्पकंवानाद्यः अतीन्द्रियत्वप्रसंगा
त् नद्वितीयः विशेष्य|विशेषणाभावेनद्वयो[illegible]नाकलनरूप
त्वात् किंचसुखदुःखयोरवश्यसम्वेद्यत्वात् ज्ञानस्यावश्य

वै०सू०वृ०
१०९
109

संवेद्यते ऽनवस्थाप्रसंगात् लैंगिकमिति लिंगमेव वैनयिकव
त् इति कृतस्कतयोर्ज्ञानसुखयोर्निष्पत्तिः प्रत्यक्षलैंगिका
भ्यां प्रत्यक्षलैंगिकज्ञानव्याख्यानाभ्यां व्याख्याता प्रत्यक्षं ज्ञान
मिंद्रियजं लैंगिकं तु लिंगजं सुखादिकं तु नैतादृशमिति वाच
च्यः लैंगिकज्ञानात्सुखादेः प्रकारभेदाधीनं भेदमाह ४
अभूदित्यपि इति शब्दप्रकारे अपि शब्दो भविष्यतीत्याका
रांतरसमुच्चये तथा च पर्वते वह्निरभूद्भविष्यति वेति लैंगिके ज्ञा
ने ऽतीतादिः प्रकारो दृश्यते न चैवं प्रकारकं सुखं दुःखं वोत्पद्यमा
नमुपलब्धं भेदकांतरं समुच्चिनोति ५ सति च कार्यादर्शना
त् सतींद्रियार्थसन्निकर्षे [illegible] सति च व्याप्तिपक्षधर्मतादि
प्रतिसंधाने कार्यस्य सुखस्य दुःखस्य वा ऽदर्शनान्न प्रत्यक्ष
मात्रं सुखं दुःखं वा लैंगिकमात्रं वा तदयमर्थः ज्ञानसामान्यं तावत्
सुखदुःखे न भवत इत्युक्तं ज्ञानविशेषः प्रत्यक्षज्ञानं वा भवेद
नुमितिरूपं वा नाद्यः इंद्रियार्थसन्निकर्षे चंदनादिप्रत्यक्षे
सुखत्वानुभावात् घटादिप्रत्यक्षज्ञाने वा सुखत्वानुभवाभावा
त् न द्वितीयः चंदनाद्यनुमितौ वह्न्याद्यनुमितौ वा सुखदुःख
त्वान्यतराननुभवात् एवं प्रत्यक्षविशेषे ऽनुमितिविशेषे वा सु
खत्वदुःखत्वयोरननुभवान्न तद्विशेषो ऽपीति भेदकांतरमाह
६ एकार्थसमवायिकारणांतरेषु दृष्टत्वात् सुखदुःख
योरिति शेषः सुखं प्रत्येकार्थसमवेतान्यसाधारणकारणा
नि धर्मः सुखे रागः सुखकारणेच्छा तदुपादानयत्नः स्रक्चं
दनादिज्ञानं दुःखं प्रति त्वधर्मः अनिष्टकंटकादिज्ञानं रे

षुएकार्थसमवायिषुकारणेषुदृष्टत्वादित्यर्थः ज्ञानंतुनिर्विक
ल्पकमेकार्थसमवेतमसाधारणंकारणंनापेक्षतएवसविकल्प
कंत्वपेक्षतेविशेषणज्ञानंतत्कारणांतरैःस्वविजातीयंकारणं
नभवतिमनःसंयोगस्त्वसाधारणत्वादविवक्षितः यद्यपिस्मृ
तिःसंस्कारमसाधारणमपेक्षतेतथापितद्भेदःस्फुटसिद्धएवे
त्यनुभवमादायभेदचिंतनात्लैंगिकेयद्यपिव्याप्तिस्मृतिपक्ष
धर्मतादिज्ञानापेक्षातथाप्यंतरशब्देनैवतद्व्युदासः तदयमा
णार्थः सुखदुःखे[illegible]नुभवभिन्नेस्वसमानाधिकरणस्वविजाती
यासाधारणकारणजन्यत्वात्स्मृतिवदाद्यशब्दवच्च ननुयदिका
रणभेदाधीनोज्ञानात् सुखदुःखयोःसुखाच्चदुःखस्यसंभ
कुंभादिवदेवपरस्परंभेदः तदाशरीरस्यतदवयवानांचशिरः
पाणिपादपृष्ठोदरादीनांपरस्परंभेदःस्यात्तत्रहिपरमाण्वद्व्य
णुकादीनांलोहितरेतसोर्वाकारणानामविशेषादित्यतआह
७ एकदेशइत्येकस्मिन्शिरःपृष्ठमुदरंमर्माणितद्वि
शेषस्तद्विशेषेभ्यः एकदेशइतिअवयवइत्यर्थःएकस्मिन्नि
तिशरीरइत्यर्थेशिरइत्येकदेशउदरंपृष्ठंमर्माणिचस्नायुप्र
भृतीनितेषांविशेषोवैजात्यंतद्विशेषेभ्यस्तत्कारणविशेषेभ्यः
तत्रापिकारणवैजात्यादेववैजात्यंनहियज्जातीयंशिरःसम
वायिकारणंतज्जातीयमेवोदरपृष्ठादेरपितंतुकपालाद्युपा
दानवैजात्यात्पटघटादौवैजात्यवत्तत्रापिवैजात्यसंभवात्
तंतुकपालादेरप्यंशुशर्करादिवैजात्यादेवंतत्रतत्राप्यन्तेष
व्यंपरमाणूनांसाधारण्येपिस्वस्वोपादानैर्नवैजात्यस्यसर्वत्र

वैजात्यप्रयोजकत्वात् द्रव्यत्वेन तूपादानसाजात्यं न वैजात्यप्र
योजकमिति दिक्। इति श्रीशंकरे वैशेषिकसूत्रोपस्कारे दश
माध्यायस्य प्रथमाह्निकं इदानीं प्रसंगतस्त्रयाणां कारणानां विशे
षविवेचनमारभते ८ कारणमिति द्रव्ये कार्य्यसमवायात्
कारणं समवायिकारणमिदमिति प्रतीति प्रयोगौ द्रव्ये दृष्टौ कु
त एवमत आह कार्य्यसमवायात् कार्य्याणि द्रव्यगुणकर्माणि त
त्रैव समवयं नियमः तत्किं समवायिकारणत्वंमात्रं द्रव्याणा
मत आह ९ संयोगाद्वा घटोऽसत्तोतन्तूनां समवायिकार
णत्वेऽपि घटं प्रति तन्त्वावा निमित्तकारणत्वात् कर्माणि याद्दश
कारणत्वं तदाह १० कारणे समवायात्तु कर्माणि असमवायि
कारणानीति शेषः असमवायिकारणत्वंच कार्य्यकारणभा
वसंबध्ये कार्यसमवेतत्कारणत्वं तच्च कार्य्ये कार्यसमवायाद्वा
कारणे कार्यसमवायाद्वा तत्राद्या लघ्वी द्वितीया महतीति वै
शेषिकपरिभाषा तत्र कर्म्मणो प्रत्यासत्त्या संयोगविभागसंस्का
रान्प्रति कर्मणां समवायिकारणत्वमित्यत आह कारणे सम
वायात् कारणे संयोगादिसमवायि कारणे कार्य्यसमवा
यात् तथाच कार्य्ये कार्यसमवायलक्षणया लघ्वा प्रत्यासत्त्या
संयोगादौ कर्मणोऽसमवायिकारणत्वमित्यर्थः रूपादीनां गु
णानां नवयवनिनामवयविगुणादिषु कीदृशी कारणतेत्य
पेक्षायामाह ११ तथा रूपे कारणे कार्यसमवायाच्च
रूप इति रूपरसगंधस्पर्शसंख्यापरिमाणपृथक्त्वगुरुत्व
द्रवत्वस्नेहाद्युपलक्षयति तत्र येद्यसमवायिकारणत्वमिति रि

श्रति कारणे कार्यसमवायादिति अवयविरूपादीनांसमवायि
कारणंयदवयविंतेनसहैकार्यसमवायेनमहत्याप्रत्यासत्य वि
रूपादिकमारभतेतद्यथाकपालरूपादिघटेरूपादिकमार
भतसर्वत्रद्रष्टव्यंचकारादमीषांकेचिन्निमित्तत्वमपिसमुच्चिनो
ति द्रव्यारंभेसंयोगस्यासमवायिकारणस्यलघ्वीप्रत्यासत्ति
माह १२ कारणासमवायात्संयोगःपटस्य कारणेसमवा
यिकारणेसमवायात्संयोगोपिपटादेःकार्य्येकार्थसमवा
यलक्षणयाप्रत्यासत्याऽसमवायिकारणमित्यर्थः पटपदेन
कार्य्यद्रव्यमात्रमुपलक्षयतियदित्ववयवावयवसंयोगोपिप
टादेरसमवायिकारणंतदाकारणेकार्थेसमवायोपीतिका
श्चित् संयोगस्यक्वचिन्महत्यापिप्रत्यासत्याकारणत्वमित्याह
१३ कारणाकारणसमवायाच्च तूलपिंडावयवेवर्त्तमानः
प्रचयाख्यःसंयोगेस्थूलकपिंडेमहत्वमारभतेतत्रकारणेका
र्थसमवायःप्रत्यासत्तिरित्यर्थःएवंसमवायिनिरूपितानिरू
प्यनिमित्तकारणतांनिरूपयितुंप्रकरणांतरमारभते १४
संयुक्तसमवायादग्नेर्वैशेषिकं अग्नेर्वैशेषिकंविशेषगुण
अर्ह्यंसंयुक्तसमवायात् पाकजेषुनिमित्तकारणंउपलक्ष
णंचैतत् ज्ञानंप्रतिसर्वेषांनिमित्तकारणत्वंबुद्धिसुखदुःखे
च्छाद्वेषधर्माधर्मभावनानांनिमित्तकारणत्वमेवसुखादी
नांभेदप्रतिपादनायग्रंथेचोयंद्रष्टव्यः इदानीमाम्नाय
प्रामाण्यंद्रढयितुमुक्तमेवार्थमाह १५ दृष्टानांदृष्टप्रयोज
नानांदृष्टाभावेप्रयोगोभ्युदयायदृष्टानांप्रमाणउपलब्धा

वै०सू०वृ० नां कर्मणां यागदानस्नानादीनां दृष्टप्रयोजनायां दृष्टं प्रयोजन
११९ मुपदिष्टं प्रयोजनं येषां तथा हि स्वर्गकामो यजेताग्निहोत्रं जुहु
III यात् स्वर्गकाम इत्यादौ विधिसमभिव्याहृतमेव फलं क्वचिदा
र्थवादिकं यथा य एता रात्रीरधीयीत तस्य पितरो घृतकुल्या म
धुकुल्याः क्षरंतीत्यादौ क्वचिच्चौपादानिकं यथा विश्वजिता य
जेतेत्यादौ अत्र हि न विधिसमभिव्याहृतं नार्थवादोपस्थित
मित्यौपादानिकं काल्पनिकं स्वर्गस्यैव स्वतः सुंदरस्य फलस्य
कल्पनीयत्वात् तथा चाशुतरविनाशिनामेतेषां कर्मणां चिर
भाविने फलाय कारणत्वमनुपपद्यमानं तदेषां प्रयोगोनुष्ठा
नमपूर्वद्वारयापूर्वायेत्यर्थः ननु श्रुतिप्रमाणे सति स्यादेवं त
देव तु दुर्लभं न हि मीमांसकानामिव नित्यनिर्दोषत्वेन श्रुतिप्रा
माण्यं वर्णयिष्यते पौरुषेयत्वेनाभ्युपगमात् पुरुषस्य च भ्रम
प्रमादविप्रलिप्सादिसंभवादत आह तद्दुष्टाभावादिति दुष्टं पुरुषां
तरे समवेतं भ्रमप्रमादविप्रलिप्सादिकं पुरुषदूषणं तदभावे स
तीत्यर्थः क्षितिकर्तृत्वेन वेदवक्तृत्वेनानुमितस्य पुरुषधौरेयस्य
निर्दोषत्वेनैवोपस्थितेः तथा च तद्वचसो न निरभिधेयता न वि
परीताभिधेयता न निष्प्रयोजनाभिधेयता भूतेंद्रियमनसां दो
षाद् भ्रमप्रमादकरणापाटवादिप्रयुक्ता एव च सामग्र्यविशुद्धयः सं
भाव्यंते न त्वेश्वरवचसि तासां संभवः तदुक्तं रागज्ञानादिभिर्व
क्ता ग्रस्तत्वादनृतं वदेत् ते चेश्वरे न विद्यंते स ब्रूयात् कथमन्य
थेति ननु ते नेश्वरेण वेदः प्रणीत इत्यत्र च विप्रतिपत्तिरत
आह १६ तद्वचनादाम्नायप्रामाण्यमिति इतिः शास्त्रप

रिसमाप्तौ॰ तद्वचनात्तेनेश्वरेणवचनात् प्रणयणादाम्नायस्यवेद
स्यप्रामाण्यंतथाहि वेदास्तावत्पौरुषेयावाक्यत्वादितिसाधितंनचा
स्मदादयस्तेषांसहस्रशाखावच्छिन्नानांवक्तारःसंभाव्यंतेअती
न्द्रियार्थत्वात् नचातींद्रियार्थदर्शिनोऽस्मदादयः किंचाप्तोक्ता
वेदामहाजनपरिगृहीतत्वात् यन्नाप्तोक्तंनतन्महाजनपरिगृही
तंमहाजनपरिगृहीतंचवेदंतस्मादाप्तोक्तंस्वतंत्रपुरुषप्रणीतत्वंचा
प्तोक्तत्वंमहाजनपरिगृहीतत्वंचसर्वदर्शनानांतःपतिपुरुषानुष्ठीयमा
नार्थत्वंक्वचित्फलाभावः कर्मकर्तृसाधनवैगुण्यादित्युक्तंकर्तृस्मर
णाभावान्नैवमितिचेत् नतस्मात्तपस्तेपानाच्चत्वारोवेदाअजायंते
त्यादिनाकर्तृस्मरणादिति अर्थवादत्वाप्रमाणमिदमितिचेत्
नकर्तृस्मरणस्यसर्वस्यार्थवादत्वात् ननुतद्वचनादित्यादित्येवा
सिद्धमितिचेत् न तेनेश्वरेणप्रणयणादित्यत्रेश्वरस्यवाऽसिद्धि
र्हिसत्कृतंप्रणयणंवाऽसिद्धंनाद्यः ईश्वरस्यपूर्वमेवसाधितत्वा
त् तत्प्रणीतत्वंचस्वतंत्रपुरुषप्रणीतत्वादेवसिद्धं नत्वस्मदादी
नांसहस्रशाखावेदप्रणयनेस्वातंत्र्यंसंभवतीत्युक्तत्वात् किं
चप्रमायागुणजन्यत्वेनवैदिकप्रमायाअपिगुणजन्यत्वमावश्य
कंतत्रचगुणोवक्तृयथार्थवाक्यार्थज्ञानमेवंवाच्यंतथाचता
दृशएववेदवक्तायःस्वर्गापूर्वादिविषयकसाक्षात्कारवान्
तादृशश्चनेश्वरादन्यइतिसुष्ठु अ[illegible]भवानीतनयोभव
नाथसुतोभवार्चनेनिरतः एतंकणादसूत्रोपस्कारंशंकरः
श्रीमान् श्लाघास्पदंयद्यपिनेतरेषामियंकृतिःस्यादुपहा
स्योम्यातथापिशिष्यैर्गुरुगौरवेणपरःसहस्रैःसमुपास

वै० सू० वृ०
११२
112

नीया इति महामहोपाध्यायमिश्रभवनाथात्मजमिश्रश्री
शंकरकृते वैशेषिकसूत्रोपस्कारे दशमोऽध्यायः समाप्तः १०
॥ ॐ ॥ समाप्तं चेदं शास्त्रमिति ॥ ॐ ॥

(क) ११२
(ख) २५
१९८०

